व्या०—यदि त्वीश्वरमनूद्य तस्य जीवैक्यं बोध्येत, तदा सर्वज्ञत्वादिधर्मैश्वरग्राहकं 'यः सर्वज्ञः' (मु० १।१।९) इत्यादिशास्त्रमुपजीव्यमित्युभयथाऽपि विरुद्धगुणमुखेन भेदपर्यवसायिनोपजीव्यप्रमाणेन विरोधस्यावश्यंभावादिति । तदेतत्सर्वं भेदप्रमाणं विरुद्धगुणवत्त्वोपजीवकमुपन्यस्तामिति विरुद्धधर्माक्रान्तिरेक एव तव भेदसाधको न्यायः पर्यवसितः । तत्र च प्रागेव दत्तमुत्तरम् । जीवे सतामधिकानन्दादीनामावरणेनाल्पानन्दत्वाद्यनुभवस्य त्वया स्वीकृततया तन्न्यायेन ब्रह्मगुणानां निरतिशयसर्वज्ञत्वसर्वशक्तिकत्वादीनां जीवे सतामेव संसारदशायामावरणे नाल्पज्ञत्वाल्पशक्तिकत्वाद्यनुभवसंभवात् । जीवे तत्सत्त्वानभ्युपगमेऽपि ब्रह्मणैश्वर्यवशादणुत्वमहत्त्वाद्यविरोधस्य त्वयाऽङ्गीकृततया तन्न्यायेनाधिकगुणस्यैव ब्रह्मणोऽल्पगुणजीवभावसंभवाच्च जीवब्रह्मणोर्विरुद्धगुणत्वमसिद्धमिति । एवं च रत्नशास्त्रावलोकनप्रभवस्य लक्षणज्ञानस्य किंचिद्रत्नलक्षणे तदन्यरत्नलक्षणविषयतया भ्रमत्वे तन्मूलरत्नविशेषप्रत्यक्षस्येव जीवब्रह्मणोर्विरुद्धगुणवत्त्वासिद्ध्या तज्ज्ञानस्य भ्रमत्वे तन्मूलभेदप्रत्यक्षस्यापि भ्रमत्वावश्यंभावान्न प्रत्यक्षं भेदे प्रमाणम् । हेत्वसिद्ध्यप्रयोजकत्वादेव नानुमानम् । जीवेऽपूर्णत्वबद्धत्वयोरसिद्ध्या पूर्णत्वापूर्णत्वयोर्बद्धत्वमुक्तत्वयोश्च विरोधासिद्ध्या वा तदुभयवत्त्वोपपत्तिमुखेन भेदप्रतिपादने श्रुतेस्तात्पर्यं कल्पयितुं न युक्तमिति श्रुतिरपि न तत्र प्रमाणम् । "भिन्नोऽचिन्त्यः" इति श्रुतिरस्तीति चेत्तस्या अप्यभेदप्रतिपादन एव तात्पर्यं सुवचम् । परमो जीवसंघाद्भिन्नो न चिन्त्यः किंत्वभिन्न एव चिन्त्य इति । पूर्णः पर इत्यादिभेदचिन्तननिषेधापेक्षितनिषेध्यप्रसक्तिपरतया संयोजनम् । जीवब्रह्मणोर्हि प्रत्यक्षागमाभ्यामपूर्णत्वपूर्णत्वे बद्धत्वनित्यमुक्तत्वे चावगम्येते । ते च लोकतो विरुद्धत्वेन प्रतीयेते । तन्मूलेन भेदभ्रमेण भेदानुचिन्तनं प्रसक्तमिति । अपि च नैवात्र विवादितव्यं, कथं विरुद्धगुणसमावेशे भेदाभाव इति । विरुद्धगुणशालिनामप्यर्जुनाखण्डलादीनां त्वया भेदराहित्यस्येष्यमाणत्वात् । त्वया हि "एक आत्मनः शरीरे भावात्" (ब्र० सू० ३।३। ५५) इत्यधिकरणेऽर्जुनादीनामन्योन्यानाभिमतखाण्डवदहनतत्प्रशमनादिकृतवतामाराधकाराध्यत्वादिविषमगुणशालिनामपि निर्भेदत्वं व्यवस्थापितम्[1] । आखण्डलादयोऽ-

टि०— १ व्यवस्थापितमिति । ननु सविशेषाभेदपक्षे विद्यमानानां मुक्तिकालभोग्याधिकानन्दादीनामावरणमुपपद्यते । निर्विशेषाभेदपक्षे च सार्वज्ञ्यादेर्न कथंचिदप्यावरणमिति चेदत्र समाधिः । सविशेषयोर्जीवेशयोरैक्यस्य भवन्मते गगनकमलिनीकल्पत्वेन सविशेषाभेदपक्ष

व्या०—शिनः । अर्जुनाद्यास्तदंशाः पृथग्भूय संचारदशायामप्यंशिना सहाभिन्ना एव । पुनरपि तेनैक्यं च प्रतिपद्यन्त इति तव मतम् । एतेन जीवब्रह्मणोर्भेदाभावे ब्रह्मभोगानां जीवेऽप्यनुसंधानं स्यादित्यपि निरस्तम् । त्वन्मते भेदाभावेऽप्यर्जुनगतेन्द्रभोगानेनुसंधानवज्जीवगतब्रह्मभोगाननुसंधानोपपत्तेः । इन्द्रभोगानामर्जुनादिषु यदननुसंधानं तद्भेदाभावेऽपि भूम्याद्यपकृष्टदेशावस्थानगर्भप्रवेशमानुषान्न-

टि०—इति कथनस्याऽऽश्चर्यकरत्वात् । पूर्वपक्षिमतमवलम्ब्य तथा ब्रवीमीति चेद्भ्रान्तोऽसि । पूर्वपक्षिणाऽपि सविशेषाभेदानभ्युपगमात । किंच तस्मिन्मते सार्वज्ञ्यादीनां कल्पितत्वेन तदावरणाभावस्येष्टत्वात् । "तुरीयं सर्वदृक् सदा" (गौ० का० १।१२) इत्यादिश्रुत्याऽनावृतसर्वप्रकाशकज्ञानस्वरूपत्वेन तस्य बोधनात । ऐश्वर्यस्य परमेश्वरेऽणुत्वमहत्त्वादिविरुद्धधर्मसंघटकत्ववज्जीवभावसंघटकत्वं संभवतीति पूर्वमेव स्थापितत्वेन तस्य जीवभावाविरोधाच्च । एतेन "विरुद्धगुणवत्त्वेन तद्भेदानुमानं सुकरम् । विरुद्धगुणवत्त्वज्ञानस्य भ्रमत्वे विरोधमात्रोच्छेदप्रसङ्गात । नाप्यप्रयोजकत्वं, सर्व सांकर्यस्यैव विपक्षबाधकत्वात्" इत्यपास्तम् । विरुद्धगुणवत्त्वेन प्रमितयोरंशांशिनोः शक्रार्जुनयोरिव जीवेश्वरयोरभेदाविरोधेनाप्रयोजकत्वात । सर्वसांकर्यस्य विपक्षबाधकत्वेऽर्जुनाखण्डलयोरपि तन्न स्यात् । न च तदैक्यं सर्वसंप्रतिपन्नं जीवेशयोस्तन्न तथा" इति शङ्कयम् । "तत्त्वमसि" (छा० ६।८।७) "अहं ब्रह्मास्मि" (बृ० १।४।१०) इत्यादिश्रुतिप्रमितस्य त्वन्मात्रासंप्रतिपत्तौ परित्यागायोगात । न च सा श्रुतिः—तद्गुणसारत्वन्यायेन तत्सदृशपरेति वाच्यम् । परीक्षितप्रमाणावगतस्य भेदस्य सिंहदेवदत्तयोरिव जीवेशयोरभावेन तादृशन्यायाप्रवृत्तेः । किंच तस्मिन्प्रत्यक्षमपि न प्रमाणम् । ससंबन्धिकपदार्थप्रत्यक्षस्य यावत्संबन्धिप्रत्यक्षजन्यत्वयावत्संबन्धिविषयकत्वयोः संयोगस्थले दृष्टत्वेन जीवेश्वरभेदस्य प्रत्यक्षत्ववचनस्य साहसमात्रत्वात् । अपि च प्रत्यक्षतो भेदसिद्धौ त्वदभिमतभेदसाधकश्रुतिसूत्राणामप्रामाण्यापातात् । प्रामाण्यस्याज्ञातार्थघटितत्वात । प्रत्यक्षस्यावच्छेदकभेदविषयकत्वेनाप्युपपत्तेश्च । न च वाच्यं "सिद्धे जीवब्रह्मैक्ये भेदस्यावच्छेदकान्वितत्वं, सति च तस्मिन् जीवब्रह्मैक्यसिद्धिरित्यन्योन्याश्रयः" इति । जीवब्रह्मैक्यस्य पूर्वोक्तश्रुतिसिद्धस्यावच्छेदकभेदसिद्ध्यनधीनत्वात् । त्वन्मतेऽन्नमयादीनामेकत्वे तस्य स्वाश्रयप्रतियोगिकान्योन्याभावासामानाधिकरण्यं सति च तस्मिन् तेषामेकत्वसिद्धिरित्यन्योन्याश्रयाच्च । तस्मात्परमेश्वस्य सर्वेश्वरत्वानिर्वाहाय स्वशक्त्या जीवभावोऽप्यभ्युपगन्तव्य इति यत्किंचिदेतत् ।

१ अननुसंधानेति—ननु विषमो दृष्टान्तः । अर्जुनाखण्डलयोरंशांशिभावोऽस्ति । न जीवब्रह्मणोः । सर्वदा सर्वविषयज्ञानेनाप्रतिहतशक्तिकेनानन्याधीनेन च ब्रह्मणैकतां गतस्य जीवस्य तद्गतभोगानुसंधानमावश्यकमिति चेत्, न । एकीभावस्यैवानुसंधानप्रतिबन्धकत्वात् ।

व्या०—भोगादिकं निमित्तीकृत्याचिन्त्याप्रतिहतशक्तिकेन परमेश्वरेण क्रियत इति हि त्वयोक्तम् । एवं देहविशेषप्राप्त्यादिकं निमित्तीकृत्याचिन्त्याद्भुतशक्तिकेन परमेश्वरेण जीवे पारमेश्वरस्य जीवान्तरगतस्य च भोगस्याननुसंधानं क्रियत इति किमिति त्वया वक्तुमशक्यम् । यत्तु "परमेश्वरस्य जीवाभिन्नत्वे तस्यैश्वर्यमेव न भवेत् । यो जीवाभिन्नो नासावचिन्त्यशक्तिकतारूपैश्वर्यवान् । यथा देवदत्त इति व्याप्तेरिति" तत्तुच्छम् । यो जीवभिन्नो नासावैश्वर्यवान् यथा घट इति वदप्रयोजकत्वेन व्याप्त्यसिद्धेः । यच्चोक्तं " अभेदस्यानुसंधानमात्रं व्यापकं न तु सर्वानुसंधानं, अर्जुनादीनामाखण्डलादिगतानल्पविषयभोगाननुसंधानेऽपि तद्गतोपासनाफलानुसंधानमस्त्येव । एवं च जीवब्रह्मणोर्जीवानां चाभेदे देवदत्तस्य ब्रह्मगतजीवान्तरगतयत्किंचिद्भोगानुसंधानं दुर्वारमिति । तदपि तुच्छम् । यदि ह्यभेदे सत्यप्यननुसंधानं एकस्मिन्नेवाननुसंधानमनुसंधानं च विरुद्धं प्रसज्येतेत्यनुकूलतर्कमुपजीव्यानुसंधास्याभेदव्यापकत्वं गृह्यते तदा सर्वानुसंधानमेव व्यापकम् । कस्यचिदननुसंधाने तद्विरोधसमाधानालाभात् । ब्रह्मणश्च " एकमेवाद्वितीयम् " (छा० ६ । २ । १) इत्यादिश्रुतिभिरेकत्वावधारणात्प्राणादिपर्यायेषु " अन्योऽन्तर आत्मा " इत्यन्यशब्दानां मुख्योऽर्थः परित्यज्यते । स च जीवब्रह्मणोरपि । यदि त्वभेदेऽपि कस्यचिदननुसंधानं संभवति, तदीयाचिन्त्यशक्तिबलेनानुसंधानाननुसंधानाविरोध-

---

टि०—'यो हि यं यद्गतधर्मं चानुसंधत्ते स तद्भिन्नो भवति । यथा घटतद्रूपद्रष्टा देवदत्त इति व्याप्तिदर्शनात् । प्रकृते व्यापकीभूतभेदाभावेन व्याप्यस्यानुसंधानस्याप्ययोगात । अपि च जीवब्रह्मणोरंशांशिभावं निषेद्धुस्तव जिह्वा कुतः सहसा न पतति । भगवतैव जीवानां स्वांशत्वस्य " ममैवांशो जीवलोके जीवभूतः सनातनः " (गी० १५ । ७) इत्यादिना प्रकटीकृतत्वात् । अर्जुनस्य भूम्याद्यपकृष्टदेशादिसंबन्धेनेन्द्रभोगाननुसंधानमुपयतस्तवान्तःकरणादिनिकृष्टोपाधिसंबन्धाज्जीवस्यापीश्वरभोगाननुसंधानमिति कुतो न सिध्येत् । तस्माज्ञ जीवादीश्वरस्य भेदसिद्धिरिति दिक् ।

१ व्याप्त्यसिद्धेरिति—नाप्रयोजकत्वं, जीवत्वस्यानीश्वरात्मत्वरूपतया जीवस्यैवेश्वरत्वे हेतूच्छित्तेरेव विपक्षबाधिकायाः सत्त्वात । अनीश्वरस्येश्वरत्वव्याघाताच्चेति चेन्नैतद्भद्रम् । " अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य ", (छा० ६।३।२) इत्यादिश्रुत्या जीवस्येश्वरात्मत्वावगमेन हेतूच्छित्त्यभावात् । वस्तुत ईश्वरस्यैव सतः स्वाविद्यया जीवत्वमापन्नस्यार्जुनस्येन्द्रत्ववदीश्वरत्वोपपत्तेश्च व्याघाताभावादित्यास्तामेतत् ।

२ अचिन्त्यशक्तिबलेनेति—यत्त्ववच्छेदकभेदेन तयोर्विरोधपरिहारेणानुसंधानमात्र-

निर्भेदत्वं तवेष्टं विषमगुणजुषां शङ्करपार्थादिकाना-
मन्यत्वस्योक्तिरन्योन्तर इति बहुशः संमता भेदहीने ॥ २९ ॥

व्या०-विधूननात्सर्वानुसंधानस्य व्यापकत्वं नेष्यते, तदाऽनुसंधानमात्रमपि न व्यापकम् । तद्बलेनैव क्वचिन्न कस्याप्यननुसंधानमित्यपि वक्तुं शक्यत्वात् । सहचारदर्शनमात्रस्याप्रयोजकत्वादित्यास्तामेतत् ।

स्यादेतत् । मा भूद्विरुद्धगुणाक्रान्त्या भेदसिद्धिः। अन्यत्वव्यपदेशेन तु स्यात् । दृश्यते हि साक्षादेव जीवब्रह्मणोरन्यत्वव्यपदेशः " तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति " (मु० ३।१।१) " अन्यश्च परमो राजंस्तथाऽन्यः पञ्चविंशकः " (   ) " भेदव्यपदेशाच्चान्यः " (ब्र० सू० १।१।२१) इत्यादिश्रुतिस्मृतिसूत्रेषु । नैतत्सारम् । त्वन्मते ब्रह्मण्यन्यत्वव्यपदेशस्य भेदासाधकत्वात् । त्वयाऽऽनन्दमयादीनां पञ्चानामपि ब्रह्मभावमभ्युपगच्छताऽन्नमयाद्यभिन्नेष्वेव प्राणमयादिष्वन्योऽन्तर आत्मेति व्यपदेश इतीष्यमाणत्वात् । " अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् । प्रोच्यते भगवान्विष्णुरैश्वर्यात्पुरुषोत्तमः " इति वचनमुदाहृत्य त्वया तस्य निर्वाहाच्च । जीवब्रह्मान्यत्ववचनस्यापि तन्न्यायेन भगवदैश्वर्यबलादेव निर्वाहसंभवाच्चेति भावः ॥२९॥

ननु शब्दानां स्वार्थे वृत्तिरौत्सर्गिकी, अन्यशब्दस्य च भिन्नत्वमेव मुख्यार्थः । तथाऽप्यानन्दवल्ल्यामन्नमयादिपर्यायेषु पञ्चस्वपि " येऽन्नं ब्रह्मोपासते " (तै० उ० २।२) " आनन्दं ब्रह्मणो विद्वान् " (तै० उ० २।९) " विज्ञानं ब्रह्म चेद्वेद " (तै० उ० २।५) " अस्ति ब्रह्मेति चेद्वेद" (तै० उ० २।६) इति ब्रह्मशब्दाम्नानेन " एतमानन्दमयमात्मानमुपसंक्रामति " (तै० उ० २।८) इत्यादिपर्यायेषु मुक्तप्राप्यत्वात्मशब्दयोः श्रवणेन चान्नमयादीनां पञ्चानामपि ब्रह्मरूपत्वावधारणाद्ब्रह्मणश्च "एकमेवाद्वितीयम् " (छा० ६।२।१) इत्यादिश्रुतिभिरेकत्वावधारणात्प्राणमयादिपर्यायेष्वन्योऽन्तर आत्मेत्यन्यशब्दानां

टि०-मेवाभेदव्यापकम् । किंचाभेदकार्यस्य कस्याप्यभावेऽभेदोक्तिः पारिभाषिकी स्यात् " इति । तत्तुच्छम् । अवच्छेदकभेदेन विरोधपरिहारे भेदस्यापि तथा वक्तुं शक्यत्वेन श्रुतिबोधितवास्तवाभेदापरिहारात् । सुषुप्तौ विशेषविज्ञानाभावस्य जागरूकत्वेनाभेदस्य मुख्यत्वसंभवात् । जीवब्रह्मणोर्जीवानां च सत्यप्यभेदेऽनुसंधानकारणाभावादेव तदननुसंधानादिति दिक् ॥ २९ ॥

१ एकत्वावधारणादिति-एतेनेदं सूचितम्-" नान्योऽतोऽस्ति द्रष्टा" बृ० ३।७।२३)

प्राबल्यं भवतोऽप्यभेदवचसां भेदश्रुतिभ्यो मतं
नो चेदन्नमयादयो वद कथं भिन्ना भवेयुर्न ते ।
भेदे सत्यपि युज्यते हि भगवच्छक्त्यैव निर्दोषता
शक्तः किं न स एक एव बहुधा भिन्नो हरिः क्रीडितुम् ॥३०॥

व्या०—मुख्यार्थः परित्यज्यते। न च जीवब्रह्मणोरन्यत्वव्यपदेशे मुख्यार्थबाधकमस्ति। एवं विरुद्धगुणाक्रान्त्याऽपि भेदसिद्धिरौत्सर्गिकी, अणुत्वविभुत्वादीनामेकस्मिन्नेव ब्रह्मणि प्रमाणबलेनावधृतत्वात्तत्र विरुद्धगुणवत्त्वमैश्वर्यबलादिति समाधीयते। न चेह तथा बाधकमस्ति । तस्माज्जीवब्रह्मणोर्विरुद्धगुणवत्त्वेन साक्षादन्यत्वव्यपदेशेन च भेदसिद्धिः स्यादेवेत्याशङ्कामपाकरोति—प्राबल्यमिति । "एकमेवाद्वितीयम्" (छा० ६।२।१) "नेह नानाऽस्ति किंचन" (क० ४।११) इत्याद्यभेदश्रुतीनां भेदश्रुतिभ्यः प्राबल्यं तवापि संमतम् । अन्यथा 'अन्योऽन्तर आत्मा' इति भेदश्रुत्यनुसारेणान्नमयादीनां भेदो दुर्वारः। न वाऽभेदश्रुतीनां ब्रह्मभेदश्रुतिभ्य एव प्राबल्यं न जीवब्रह्मभेदश्रुतिभ्य इत्यत्र विशेषहेतुरस्ति। "एकमेवाद्वितीयम्" (छा० ६।२।१) इत्यादिशब्दस्वारस्यस्यास्मदुक्तषड्विधतात्पर्यलिङ्गवत्त्वस्य च लाघवस्य वा प्राबल्यहेतोरुभयत्राप्यविशेषात्[1] ।

टि०—इति चेतनान्तरनिषेधादात्मैक्यमप्यवधृतामिति तत्सहितं "तत्त्वमसि" (छा० ६।८।७) इति वाक्यं जीवेशाभेदबोधकमित्यतः " तत्त्वमसीतिवाक्यस्याखण्डार्थात्मकतयाऽबाधकत्वोक्तिः कस्यचिदतीवापेशला । अभेदवाक्यस्याबाधकत्वेऽन्नमयादीनामैक्यासिद्धिः, तस्य बाधकत्वे जीवब्रह्मणोरप्यभेदसिद्धिः" इति ।

१ अविशेषादिति । अत्राऽऽह कश्चित्—प्रत्यक्षादिविरोधेन जीवब्रह्माभेदश्रुतीनामात्मलाभासंभवः। मानान्तरविरोधे तात्पर्यलिङ्गस्याकिंचित्करत्वात् । अन्यथा यजमानप्रस्तरत्वादेरपि सिद्धिप्रसङ्गात्। लाघवाज्जडप्रपञ्चचैतन्ययोरप्यैक्यापाताच्च। अन्नमयादीनां पञ्चानामपि कारणत्वब्रह्मत्वाद्यवगमेन भेदश्रुतीनामेवाऽऽत्मलाभात् । मानान्तरविरोधाभावेन भेदश्रुतीनामेव षड्विधतात्पर्यलिङ्गवत्तया प्रबलत्वात्" इति । तत्र प्रतिविधीयते—प्रत्यक्षविरोधस्तावदसिद्धः। ब्रह्मणोऽप्रत्यक्षत्वेन तदनुयोगिकस्य तत्प्रयोगिकस्य वा भेदस्याप्रत्यक्षत्वस्य पूर्वं सयुक्तिकं व्यवस्थापितत्वात्। अनुमानस्य प्रत्यक्षमूलत्वेन मूलोच्छेदे तद्विरोधस्य गजा अपि पलायन्त इति न्यायग्रस्तत्वात्। किंच मानान्तरविरोधे तात्पर्यलिङ्गैरेव श्रुत्यर्थस्य निर्णेयत्वात्। तात्प-

व्या०—स्यादेतत्। नाभेदश्रुतिप्राबल्याद्ब्रह्मभेदश्रुतीनां मुख्यार्थं परित्यजामः। किंतु सकलवेदमहातात्पर्यविरोधात्। तथा हि—"सर्वेषामपि वेदानां मोक्ष एव प्रयोजनम्। तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते" (...........) इत्यादिवचनात्। मोक्षस्य च तत्प्रयोजनत्वं न साक्षात्तत्साध्यतया। तस्यानेकश्रुतिस्मृतिपुराणैर्भगवत्प्रसादेनैव साक्षात्साध्यत्वावधारणात्। किंतु यज्ज्ञानेन मोक्षहेतुर्भगवत्प्रसादः संपाद्यते, तत्प्रतिपादनद्वारेति वाच्यम् (?)। तत्प्रसादश्च तदीयनिर्दोषगुणोत्कर्षज्ञानाद्भवतीति लोकतः "यो मामेवमसंमूढः" (गी० १५। १९) इत्यादिभगवद्वचनैश्चावधारितम् (?)। ततः सर्वेषामपि वेदानां भगवतो निर्दोषाशेषगुणपूर्णत्व एव महातात्पर्यम्। तद्विरुध्यते ब्रह्मभेदश्रुतीनां स्वार्थपरत्वे, भिन्नानां गुणतारतम्यानुग्राह्यानुग्राहकभावादिदर्शनेन ब्रह्मरूपेष्वपि तत्प्रसक्त्या निर्दोषाशेषगुणवत्त्वासिद्धेः। जीवब्रह्मभेदश्रुतीनां स्वार्थपरत्वे तु तन्न विरुध्यते। प्रत्युत तासामतत्परत्व एव विरुध्यते, जीवब्रह्माभेदे जीवदोषैर्ब्रह्मणोऽपि सदोषत्वापत्तेः। तस्माद्ब्रह्मभेदश्रुतीनामेव स्वार्थपरित्यागो न जीवब्रह्माभेदश्रुतीनामिति विशेषो युक्त इति चेन्नैवम्। अन्नमयादीनां विश्वतैजसादीनां च ब्रह्मरूपाणां भेदश्रुत्यनुसारेण विरुद्धगुणवत्त्वानुसारेण भेदे. सत्यपि भगवदैश्वर्यबलादेव निर्दोषाशेषगुणपूर्णतो-

टि०—र्यवत्याः श्रुतेरेव प्राबल्येनार्थवादवाक्येन यजमाने प्रस्तरत्वस्यासिद्धेः। प्रमाणाभावेन चिज्जडयोरैक्यासिद्धेश्च। भेदश्रुतीनामेवाऽऽत्मलाभ एकमेवेति श्रुतेर्द्वितीयान्नमयादिनिषेधपरत्वेन ब्रह्मैक्यासिद्ध्या त्वदिष्टार्थासिद्धेः। भेदश्रुतीनां तात्पर्यनिर्णायकशास्त्रान्तरस्याद्याप्यसिद्धेः। सिद्धो चैतच्छास्त्रस्य त्वत्सिद्धान्तेऽप्यनारम्भादिति दिक्।

१ ऐश्वर्यबलादेवेति—सर्वगुणपूर्णत्वरूपसर्वैश्वरत्वसिद्ध्यर्थं ब्रह्मरूपाणामन्नमयादीनां भेदस्य श्रुत्यादिसिद्धस्यापि पारमेश्वरशक्त्या समाधाय तेषामपरिच्छिन्नपरमेश्वररूपत्वमङ्गीकर्तव्यम्। अन्यथा त्वदीयपरमेश्वरस्य स्वगतभेदेन परिच्छिन्नत्वापत्तेरिति भावः। एतेन "भगवदैश्वर्यमपि लोकमर्यादानुरोधि, ब्रह्मभेदाभ्युपगमे ब्रह्मणः समाभ्यधिकद्वितीयराहित्यरूपाद्वितीयत्वाविरोधेन तस्य तथा संकल्पानुदयात्। भिन्नत्वे तत्साम्यापातात्, न्यूनाधिकभावापाताच्च। नहीश्वरोऽपि स्वस्यैश्वर्यविरोधिभूतमर्थं संकल्प्य करोति। तस्य प्रेक्षावत्त्वात्। तस्माद्ब्रह्माभेदश्रुतीनां जीवब्रह्मभेदश्रुतीनां च प्राबल्यम्। ब्रह्मभेदश्रुतीनां जीवब्रह्माभेदश्रुतीनां च दौर्बल्यम्" इति केनचित्प्रलपितं परास्तम्। ब्रह्मभेदाभ्युपगमे समाभ्यधिकद्वितीयराहित्याविरोधवज्जीवभेदाभ्युपगमेऽपि "ब्रह्मदासा ब्रह्मदाशा" (   ) इतिश्रुत्युक्तजीवाभेदविरोधस्यापि

व्या०—पपत्तेः । नहि भगवानशेषमपि स्वेच्छया कर्तुमकर्तुमन्यथा कर्तुं शक्त इति वदतस्तव लीलयाऽभिन्नो भवन्नप्यहं निर्दोषाशेषगुणपूर्णः स्यामिति स्वसंकल्पेन भेदमास्थाय क्रीडितुं न शक्त इति वक्तुं शक्यम् । न च वाच्यं तथा संकल्पमेव भगवान्न करोतीति । भेदश्रुत्या विरुद्धधर्मान्क्रान्त्या चान्नमयादीनां विश्वादीनां च स्वतः प्राप्तस्य भेदस्यापवादकाभावेन तस्यावश्यमङ्गीकर्तव्यत्वेन तथा संकल्पं करोतीत्येव वक्तव्यत्वात् । तस्माद्गत्यन्तराभावाद्भेदनिषेधश्रुतीनां प्रबलत्वेन भेदापवादकत्वमास्थायैव तथा संकल्पं करोतीति निर्वहणीयम् । प्राबल्यं च भवज्जीवब्रह्मभेदश्रुतिभ्योऽपि भवेत् । विशेषहेत्वभावात् । न च ब्रह्मनिर्दोषत्वश्रुत्यनुरोधविरोधौ विशेषहेतू । दुःखादिदोषाश्रयत्वं सदोषत्वमित्यभ्युपगमे त्वन्मतेऽपि दुःखादीनामन्तःकरणधर्मत्वेन जीवस्यापि निर्दोषत्वात् । दुःखादिस्वामित्वं तदित्यभ्युपगमे त्वन्मते ब्रह्मण एव वा ब्रह्मणोऽपि वा दुःखादिस्वामित्वेन तत्सदोषत्वानिवारणात् । दुःखादिमत्त्वाध्यासशालित्वं तदिति चेन्न । तस्याप्यशेषविशेषदर्शिनि ब्रह्मण्यसंभवात् । ब्रह्मणो विशेषदर्शनेनैव तदभिन्नजीवस्यापि विशेषदर्शनवत्त्वेऽपि ब्रह्मतद्धर्माणां जीवं प्रति तदीयानन्दवदावृतत्वस्य तवापि संमतत्वेन ब्रह्मणो विशेषदर्शनस्य जीवं प्रत्यसत्कल्पत्वात् । ब्रह्म प्रति स्वाभिन्नजीवगतदुःखाध्यासस्यानावृतत्वेऽपि देवदत्तमुखाभिन्नप्रतिमुखगतश्यामत्ववक्रत्वादेर्विशेषदर्शनं देवदत्तं प्रतीव ब्रह्म प्रति हेयत्वाभावात् । मन्मते बिम्बौ भिन्नौ । प्रतिबिम्बगतवक्रत्वादयोऽपि सत्या इति चेन्न । येषां तावभिन्नौ ते च वक्रत्वादयोऽध्यस्ता इति मतं तेषामपि स्वप्रतिबिम्बगतवक्रत्वादिदर्शनेन विषादाद्यभावात् । प्रत्युत " प्रतिबिम्बगताः पश्यन्नृजुवक्रादिविक्रियाः । पुमान्क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः" (ब्र० सू० २ । १ । ३३) इति कल्पतरूक्तरीत्या हर्षदर्शनात् । एतेन जीवगतासर्वज्ञत्वाल्पशक्तिकत्वपारतन्त्र्यादिकं दोष इत्यपि निरस्तम् । जीवस्य ब्रह्माभेदसिद्धौ तस्य सर्वस्याप्यध्यस्तत्वोपपत्तेः । तस्मान्नाभेदश्रुत्यवलम्बनेन भेदकश्रुत्यवलम्बनेन वा जीवब्रह्मभेदसिद्धिं प्रत्याशा कर्तव्येति भावः ॥३०॥

टि०—दुर्वारेण जीवभेदसंकल्पानुदयात् । परस्य जीवभिन्नत्वे वस्तुपरिच्छेदापत्त्या मिथ्यात्वापत्तेः । महीश्वरः स्वस्यापरिच्छिन्नत्वविरोधिद्वितीयचेतनरूपं संकल्पयति । तस्माद्ब्रह्माभेदश्रुतीनामिव जीवब्रह्माभेदश्रुतीनां प्राबल्यं भेदश्रुतीनां दौर्बल्यमिति श्रुत्यैव जीवो ब्रह्माभिन्न आत्मत्वाद् ब्रह्मवदित्यनुमानसहकृतया जीवब्रह्माभेदसिद्धिरिति दिक् ॥ ३० ॥

शब्दान्तरादिकथनं त्विह भेदसिद्ध्यै
हासास्पदं सदसि दर्भपवित्रनीत्या ।
पूर्वत्र तन्त्र इव काल्पनिकेऽपि भेदे
तेषां घटेत किमिहापि न चारितार्थ्यम् ॥ ३१ ॥

व्या०–यत्त्वत्राऽऽधुनिकोक्तं–कर्ममीमांसायां व्युत्पादितैः शब्दान्तरादिभेदप्रमाणैर्जीवब्रह्मणोर्भेदः सिध्यति । अस्ति हि "एष एव जीवं प्रबोधयति । एतस्माज्जीव उत्तिष्ठति" (.........) इति विरुद्धार्थधातुनिष्पन्नाख्यातरूपं शब्दान्तरम् । "नित्यः परो नित्यो जीवः" (............) इत्यप्रतिज्ञायमानः पुनः श्रुतिरूपोऽभ्यासः। "द्वा सुपर्णौ" (मुं० ३ । १ । १) इत्यादि संख्या । "अनश्नन्नन्यः" (मुं० ३ । १ । १) इत्यादिभेदको गुणः । "यतो वाचो निवर्तन्ते" (तै० उ० २।४) इत्यादि प्रकरणान्तरम् । "जीवेशौ" (नृ०उ०ता०९) इति नामधेयभेदश्चेति । तदिदं [२]प्रत्यक्षादिषु भेदप्रमाणेषु पराहतेषु शब्दान्तराद्युपन्यसनं प्रतिग्रहलब्धं हस्तिनमविक्रीय स्वगृहे स्थापयितुकामस्य मुग्धश्रोत्रियस्य हस्तिपकेन घासे पृष्टे स्वगृहे संपादितान्सर्वान्दर्भमुष्टीन्क्रमेण तदग्रे निहितवतस्तेषु क्षणेन निगीर्णेष्वन्ततः स्वकरस्थदर्भपवित्रनिधानमनुकरोतीति सोपहासं दूषयति–शब्दान्तरादीति । कर्ममीमांसकैरिदं शब्दान्तरादिकं मुख्यभेदे प्रमाणतया नोपन्यस्तम् । न हि तैः शब्दान्तरादिकं प्रदर्श्योपपाद्यमानस्तदभावे प्रदर्श्योपपाद्यमानश्च कर्मभेदः शास्त्रभेदो वाऽन्योन्याभावादिरूपो मुख्यः। "सप्तदश प्राजापत्यान्पशूनालभते" इत्यत्र "दधिमधुघृतमापो धानाः करम्भास्तण्डुलास्तत्संसृष्टं प्राजापत्यम्" इत्यत्र "ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायाम्" इत्यत्र च प्राजापत्यपशूनां प्राजापत्यदध्यादीनामैन्द्रदधिपयसोश्च प्रधानयौगपद्येन प्राजापत्याद्युद्देशेन तत्तद्द्रव्यविषयसंकल्परूपाणां यागानामेकैकत्वेऽपि सप्तदश प्राजापत्ययागाः सप्तदश दध्यादियागा द्वौ दधिपयोयागा-

टि०– १ पूर्वत्र तन्त्र इति । पूर्वमीमांसायामित्यर्थः ।

२ कर्मभेदे शास्त्रभेदे च प्रमाणत्वेन क्लृप्तानां शब्दान्तरादीनां चेतनभेदे प्रमाणत्वेनोपन्यासे सहस्रनामवशाद्विष्णोरपि चेतनस्य नानात्वप्रसक्त्या तन्मतहानिरिति दोषे जाग्रत्येव दूषणान्तरमाह—प्रत्यक्षादिष्विति । प्रत्यक्षस्य जीवब्रह्मभेदविषयकत्वं नास्तीति पूर्वमेव प्रतिपादितत्वेन तन्मूलकश्रुतिविरुद्धभेदप्रमाणानि सर्वाण्यपि पराहतानि। अतः "प्रत्यक्षादीनां भेदे प्रामाण्येन शब्दान्तरादीनामपि तत्र प्रामाण्योपपत्तिः" इति कस्यचित्प्रलापो नावकाशं लभत इति भावः ।

व्या०–विति भेदोपपादनात् । "सोमेन यजेत" इत्यत्रेन्द्रवाय्वाद्युद्देशेन तत्तत्पात्रस्थितसोमरससंकल्परूपाणां यागानां भिन्नत्वेऽप्यग्निहोत्रं जुहोतीत्यत्राऽऽहवनीयादिषु हविःप्रक्षेपरूपाणां होमानां भिन्नत्वेऽपि भेदनिरासात् । सप्तदश प्राजापत्यानीतिवाक्यरूपस्य शास्त्रस्यैकत्वेऽपि भेदोपपादनात् । "व्रीहिभिर्यजेत" "व्रीहीनवहन्ति" इत्यादिवाक्यरूपाणां शास्त्राणां भिन्नत्वेऽपि भेदनिरासाच्च। यद्यपि–कर्मापि गोत्वादिवदेकमेव नित्यमनेकानुगतं, न त्वाश्रयभेदेन तद्भेदोऽस्ति । 'अयं चलति, अयमपि चलति, इत्यादिप्रत्यभिज्ञया तदैक्यसिद्धेस्तद्भेदबुद्धेराश्रयभेदादुपपत्तेः । संततानुपलब्धेश्च शब्दवद्व्यञ्जकाभावेनोपपत्तेः । एवमन्यत्रापि कर्मैक्ये यत्र शब्दान्तरादिद्वैतीयीकप्रमाणमस्ति तत्र कर्मभेदोऽङ्गी क्रियते । अतः शब्दान्तरादिप्रमाणषट्कावधिः कर्मभेदो न ततः परं तद्भेद इति । कौमारिलानां क्वचित्पक्षे "सोमेन यजेत, अग्निहोत्रं जुहोति" इत्यत्र शब्दान्तराद्यभावान्न यागहोमभेदः, किंत्वेकैकस्यैव यागस्य होमस्य च देवताभेदेनाधिकरणभेदेनाभ्यासमात्रमिति मुख्याभेद उपपादयितुं शक्यते । तथाऽपि–सप्तदश प्राजापत्यानीत्यादिषु तस्मिन्नपि पक्षे मुख्याभेद उपपादयितुं शक्यत एव । अत एव स्वारस्यात्सर्वलोकसिद्धभेदप्रत्यक्षतोऽपि बलवती प्रत्यभिज्ञा शब्दान्तरादितः कथं बलवती न स्यात्' इत्यस्वारस्याच्च सर्वकर्मैक्यपक्षे शब्दान्तरादिस्थलेऽप्यमुख्यभेद एव कौमारिलैराश्रितः । "शब्दान्तरे कर्मभेदः (जै० सू० २ । २ । १)" इत्यादिसूत्रस्वारस्यं प्रौढ्या समर्थयितुं परं शब्दान्तरादिस्थले मुख्यः कर्मभेद इति कश्चित्पक्ष उपन्यस्तः । तस्मादनुष्ठानविशेषोपयोग्यपूर्वभेदाद्युपाधिकः काल्पनिको भेदः शब्दान्तरादिसूत्रावसेय इत्येव सर्वेषामपि कर्ममीमांसकानां मतम् । उक्तं हि तन्त्ररत्ने–"क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात्" (जै० सू० ६ । ३ । ११) इत्यधिकरणे । तथाऽपि सर्वत्रलोकयवर्तिन्येकैव कर्मव्यक्तिः, अनुष्ठानमात्रं तु भिद्यते । यावदेकापूर्वानुबन्धेमकेन शास्त्रेण विषयीकृतं तावदेकं कर्म, तदन्यत्तु भिद्यत इति भेदाभेदव्यवहारसिद्धिरिति" । उक्तं च वरदराजीये-

टि०– १ प्रत्यभिज्ञयेति–अत्र–"अयं दण्डी, अयमपि दण्डी, अयं घटो रूपी, अयमपि घटो रूपी, अयं घटो ध्वस्तोऽयमपि घटो ध्वस्तः" इति प्रत्यभिज्ञां विषयैक्यासाधिकां प्रतिवक्ति यदि कश्चित्, स कर्मैक्यप्रस्तावे द्रव्यगुणध्वंसानैक्योदाहरणस्य वैषम्यबोधनेन प्रतिबोधनीयः । गुणैक्यस्य संमतत्वेन 'अयं रूप्ययमपि रूपीति' गुणभेदोदाहरणस्यात्यन्तमयुक्तत्वाद्विति च । अयं रूपीत्यादिना गुणैक्यस्य सिद्धेरिति दिक् ॥

व्या०–शब्दान्तराद्यधिकरणे (जै० सू० २।२।१) भिन्नापूर्वानुबन्धप्रतिपादनयोग्यताज्ञानं यत्तदेव शास्त्रभेदज्ञानमित्युच्यते " इति । तत्रैव संख्याधिकरणेऽप्युक्तम् (तै० सू० २ । २।७) । न च सप्तदशप्राजापत्यादिवाक्यस्यैकत्वान्न शास्त्रभेदः । न वाक्यभेदः शास्त्रभेदे तन्त्रम् । किंतु निरपेक्षभिन्नालौकिकार्थप्रतिपादकत्वमेव । तच्चेहाप्यस्ति " इति ।

एवं च यथा पूर्वतन्त्रे शब्दान्तरादेर्वस्तुतो भेदराहित्येऽपि काल्पनिकभेदविषयत्वेन चारितार्थ्यमेवमिहापि तस्य जीवब्रह्मणोर्भेदाभावेऽपि काल्पनिकभेदवि·

टि०– १ काल्पनिकेति– यदाऽनुष्ठानप्रयोजकापूर्वमेकमेकशास्त्रजन्यप्रमितिविषयस्तदा तत्कारणमेकं कर्म, अपूर्वभेदेऽपि कर्मैक्ये कल्पिततद्भेदमादायैव व्यवस्था तद्वच्छब्दान्तरादिभिः सिध्यज्जीवेशभेदोऽपि काल्पनिक इति त्वन्मनोरथो विफल इति भावः । यत्त्वत्र—" कर्मणां स्वत एव भेदो वाच्यः, नत्वपूर्वभेदोपाधिकः । अपूर्वभेदस्य कर्मभेदप्रयुक्तत्वात् । कार्यभेदस्य सामग्रीभेदप्रयोज्यत्वात् । अन्यथाऽपूर्वभेदाभावप्रसङ्गात् " इति । तन्न । विकल्पासहत्वात् । कार्यभेदो वास्तवकारणभेदव्याप्य उत वास्तवकारणभेदः कार्यभेदव्याप्यः । नाद्यः । सप्तदश प्राजापत्यानीतिशास्त्रप्रतिपाद्यापूर्वे व्यभिचारात् । न द्वितीयः । शतचण्डालस्पर्शरूपनिमित्तेषु विभिन्नेष्वपि स्नानरूपकार्यभेदाभावेन व्यभिचारात् । अपि चानेकोद्देशेन सकृदनुष्ठानं तन्त्रमिति मीमांसकमर्यादा । एवंरूपमेवेदं तन्त्रं गृहीत्वा समग्रैकादशाध्यायो महर्षिणा प्रवर्तितः । प्रत्युदाहरणत्वेन कर्मणामावृत्तिश्च साधिता । " एकधा वपां जुहोति " (तै० ब्रा० १ । ३ । ४ । ५) इत्यादिना प्राजापत्ययागोपयुक्तानां वपादीनामेकैव प्रक्षेपक्रिया प्रतिपत्तिरूपा बोध्यते तन्त्रेण । नवमे– " एकधाऽस्य त्वचमाछ्यतात् " (तै० ब्रा० ३ । ५ । ६ । २) इति वाक्यार्थविचारे—एकप्रयत्नसाध्यत्वमेकधाशब्दार्थ इति निर्णीतम् । एवं पञ्चमेऽध्याये—" पशुगणे तस्य तस्यापवर्जयेत् " (जै० सू० ५ । २ । १०) इत्याद्यधिकरणेषु—' स्विष्टकृदिडाभक्षणे तन्त्रेणैव ' इत्याद्यनेकस्थलेषु कर्मण एकत्वं मीमांसकसंमतं द्रष्टव्यम् । एवं प्राजापत्यपशुयागानां सप्तदशानां सप्तानां प्राजापत्ययागानां द्वयोर्दधिपयोयागयोश्च सकृदनुष्ठानं कार्यमिति शास्त्रार्थे सिद्धे साऽपि यागक्रिया, एकैकैव तत्तद्वाक्येषु निर्णेतव्या न तु युगपदनेका यागक्रियाः । तथात्वे द्वित्रिपश्वादिरूपद्रव्यहानावपि स स यागो देवतोद्देशेन द्रव्यत्यागात्मकः सिद्ध एवेति शास्त्रार्थोऽनुष्ठित एव स्यात् । तथा च प्राजापत्यपश्वादिषु सप्तदशत्वादिबोधिका श्रुतिः पीड्येत । अतस्तदबाधायापूर्वजननं द्वारीकृत्य तत्सिद्ध्यर्थं तावत्पशुद्रव्यग्रहणानियमोऽङ्गीकार्यः । तथा च वाजपेयसाद्गुण्यजनकानां सप्तदशापूर्वाणां फलजनकक्रियाव्यापाररूपत्वेन व्यापारिभिरपि तत्समसंख्याकैर्भाव्यमिति वस्तुतः क्रियाया एकत्वेऽपि सप्तदशत्वादिकं कल्प्यते । किंच ज्ञानमिच्छा कृति-

निर्मर्यादप्रवृत्ते तव तु हतमते सोऽपि भेदो न सिध्ये-
यस्त्वं नानाधिकारश्रुतपरगुणसांकर्यमिच्छस्युपास्तौ ।
अंशानां खल्वभेदेऽप्यथ च भगवता सन्ति शब्दान्तराद्या-
स्तत्स्यान्मत्स्यादिरीत्या सकलजनिमतां वासुदेवांशभावः ॥३२॥

व्या०—षयतया चारितार्थ्यसंभवान्न ततस्तयोर्मुख्यभेदासिद्धिरित्यर्थः ॥ ३१ ॥

एवं पूर्वमीमांसामर्यादया शब्दान्तरादीनां काल्पनिकभेदविषयतयाऽपि चारितार्थ्यं संभवतीत्युक्तम् । परमर्यादया तु तैस्तथाभूतोऽपि भेदो न सिध्यतीत्याह—निर्मर्यादेति । दहरविद्याशाण्डिल्यविद्यावैश्वानरविद्याषोडशकलाविद्योपकोसलविद्यापर्यङ्कविद्येत्यादिसंज्ञाभेदेन प्रसिद्धा ब्रह्मविद्या यथा यथा शब्दान्तरादिप्रमाणैः परस्परं भिन्नाः । भिन्नत्वादेव तत्तद्विद्याम्नाततत्तदुपास्यगुणा वाजपेयाश्वमेधादिकर्मणामङ्गकलापवद्यथाप्रकरणं व्यवस्थिताः । न तासु परस्परं गुणोपसंहारः । किंत्वेकैकस्यां विद्यायां नानाशाखाम्नातगुणोपसंहारमात्रमिति । सर्वासामपि तासामुपास्यगुणतारतम्येनोपासनाकालतारम्येन सहकारियज्ञादितारतम्येन च फलभोगतारतम्यवती देवयानमार्गप्राप्या सगुणब्रह्मलोकावाप्तिरपरमुक्तिरूपा फलमित्यस्माकं मतम् । त्वया त्वत्रैवमङ्गीकृतं—सर्वविद्याम्नातानां कर्मकाण्डगताग्नेयसौर्यादिसूक्ताम्नातानां च सर्वेषां गुणानामुपासनायामुपसंहारः कार्य इति । न विद्याभेदेन गुणानां प्रतिप्रकरणं व्यवस्था किंतु मानुषाद्या हिरण्यगर्भान्ता मुक्त्यधिकारिणः फलतारतम्येन मुक्तिभाज इत्यधिकारिभेदेनैव । तत्र हिर-

टि०—श्चेति हि त्रयमप्येकैकस्मिन्क्षण एकैकमेव जायत इति सर्वतीर्थकरसिद्धान्तः । कृतिरेवेह यत्न इति, अर्थभावनेति च कौमारिलानां व्यवहारः । कथमेवं सति युगपदनेके यत्नास्तदन्वनेकाः क्रिया युगपज्जायेरन् प्रत्यक्षी क्रियेरन्निति च वदन्प्रामाणिकानां ग्राह्यवचनो भवेत् । अन्यथा "द्वितीये द्विगुणं प्रोक्तं तृतीये त्रिगुणं भवेत् । चतुर्थे नास्ति निष्कृतिः" । इत्यादिमहापातकसमसंख्याकप्रायश्चित्तविधिरनर्थकः स्यात् । भवदुक्तयुक्त्या सकृदनुष्ठानेऽपि महापातकसमसंख्याकप्रायश्चित्तक्रियायाः सिद्धत्वात् । तस्मात्सर्वप्रमाणविरुद्धोऽयं वास्तवयागादिक्रियाभेदवादः शास्त्रापार्थीकरणं चातीव साहसमिति दिक् ॥ ३१ ॥

१ अधिकारिभेदेनैवेति—एवं च कार्यभेद एव कारणभेदव्यवस्थापक इत्यवश्यं त्वयाऽङ्गीकार्यत्वेन कारणभेदात्कार्यभेदोक्तिः स्वमूलक्षतिकरीति भावः । ननु तत्र प्रमाणबलेन बाधकसत्त्वेन च तथात्वेऽपि प्रकृते शब्दान्तरादिभिर्जीवेशभेदसिद्धिरिति चेन्न । द्वैतसत्यत्वे " नेह

व्या०-ण्यगर्भः सर्वोत्कृष्टमुक्त्यर्हतया यावत्कर्मब्रह्मकाण्डाम्नातासंकुचितसकलगुणोपसंहारयोग्यः। अन्ये तु स्वस्वभाविमुक्त्यनुसारिगुणोपसंहारयोग्याः। यद्यप्यस्मदादिभिर्मुक्त्यधिकारिभिरुपासनारम्भसमये स्वस्वभाविमुक्तिस्वरूपं प्रतिपुरुषमनादियोग्यतानुसारेण व्यवस्थिततारतम्यमजानद्भिः स्वस्वोपासनायोग्यगुणा निर्णेतुं न शक्यन्ते । अयोग्यगुणोपसंहारप्रयत्नश्चानर्थफलः । "अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्यासाभ्याम् " इति संकर्षणसूत्रात् । "अधिकाराधिको यत्नः प्रायशो नोपपद्यते । कथंचिदधिके यत्ने दोषः कश्चित्समापतेत् " इति वचनाच्च। तथाऽपि स्वस्वगुरोरन्यस्माद्वा कुतश्चित्सर्वज्ञाद्भाविस्वस्वमुक्तिफलरूपं ज्ञात्वा तदनुसारेण स्वस्वयोग्यगुणानपि तत एवावगम्य तेषामुपसंहारः कार्यः । न च बह्वल्पगुणप्रतिपादकविशेषपरिग्रहेण मुक्त्यधिकारिणां फलोत्कर्षापकर्षनिर्वाहात् प्रकरणाद्युल्लङ्घनेन गुणोपसंहारो न कार्य इति वाच्यम् । सकलगुणोपासनायोग्यहिरण्यगर्भस्य सकलगुणपरिग्रहायान्येषामपि स्वस्वमुक्तियोग्यगुणविशेषपरिग्रहाय च नानाप्रकरणविप्रकीर्णगुणोपसंहारावश्यंभावात् । क्वचिदपि विद्यायां सर्वगुणाम्नानादर्शनात् । तत्तन्मुक्त्यनुरूपगुणविशेषाम्नाननियमाभावाच्चेति । तदेतत्सर्वम्—"उपसंहारोऽर्थाभेदात् । विधिशेषवत्समाने च " (ब्र० सू० ३ । ३ । ६) "प्राप्तेश्च समञ्जसम् " (ब्र० सू० ३ । ३ । १०) "इतरे त्वर्थसामान्यात् " (ब्र० सू० ३ । ३ । १४) "पुरुषविद्यायामपि चेतरेषामनाम्नानात् " (ब्र० सू० ३ । ३ । २५) इति सूत्राणि लिखित्वा रचितेषु त्वदीयाधिकरणेषु स्पष्टमेवमङ्गीकृतवता त्वया शब्दान्तरादीनां भेदकत्वमेव त्यक्तं भवति । तेषां भेदकत्वे तैरापाततो विद्याभेदस्यानिवार्यत्वात् । विद्याभेदे सति तत्तविद्याव्यवस्थितगुणोपसंहारायोगात् । न ह्येकाग्निमुपासीनस्याऽऽयुरादिकमपेक्षितमिति ।

टि०—नानाऽस्ति किंचन" (क०उ०४।११) इत्यादिश्रुतिबाधसत्त्वेन "तत्त्वमसि"(छा०६।८।७) इत्यादिप्रमाणसद्भावेन चाद्वैतब्रह्मात्मभावस्याप्यङ्गीकरणीयत्वात्। "अन्योऽन्तर आत्मा प्राणमयः', इत्यादिस्थले शब्दान्तरादिभिर्भेदानङ्गीकाराच्च । यच्च तत्त्वमसीत्यादिश्रुतीनां त्वदुक्तार्थमादाय लब्धस्थितिकत्वाभावेन वैषम्यमिति। तन्न। त्वन्मत एवोक्तवाक्यस्य लब्धस्थित्यभावात्। त्वया हि तत्र अतत्—इति पदं छित्त्वा जीवब्रह्मभेदस्ताहशवाक्यप्रतिपाद्यत्वेनाभिप्रेयते । ततश्चाभेदनिषेधपरं तद्वाक्यम् । अभेदश्च जीवेशयोः प्रमाणान्तरेणासिद्धः । तन्निषेधेऽप्रसिद्धप्रतियोगिकनिषेधबोधकत्वात्तद्वाक्यमलब्धात्मकं निरर्थकं च । तथैव ताहशानि वाक्यान्तराणि च बहूनि । किंबहुना शास्त्रमेव निरर्थकम् । ब्रह्मोत्कर्षस्याविप्रतिपन्नत्वेन जीवेशभेद एव

इत्थं जीवब्रह्मभेदे निरस्ते
शास्त्रारम्भस्थापनार्थं त्वदिष्टे ।
जीवाभेदेऽप्यावृतत्वाद्विचार्यं
ब्रह्मेत्यस्मद्रीतिरेवाऽऽश्रयस्ते ॥ ३३ ॥

व्या०—"आयुराशास्ते । सुप्रजास्त्वम्" इत्यादिसूक्तवाकमन्त्रार्पितायुरादिकं दर्शपूर्णमासाङ्गं, प्रस्तरप्रहरणं पुरुषापेक्षमात्रेणौपासनादिकर्मसूपसंहारार्थं भवेत् । अपि च शब्दान्तरादयः कर्मणि भेदका भवन्तु मा वा भूवन् । ब्रह्मणि तु ते भेदका न भवन्त्येव । तथा हि—"एष ह्येव जीवं प्रबोधयति । एतस्माज्जीव उत्तिष्ठति" (   ) इति विरुद्धार्थधातुनिष्पन्नाख्यातरूपस्य शब्दान्तरस्य भेदकत्वमुद्बोधकत्वावच्छिन्नस्योद्बोध्यत्वावच्छेदो विरुद्ध इत्यन्ततो विरोधमूलमेव वाच्यम् । न तु तद्युक्तम् । ब्रह्मणि त्वया विरुद्धधर्मसमावेशस्य बहुधाऽङ्गीकृतत्वात् । "नित्यः परो नित्यो जीवः" इति नित्यत्वाभ्यासस्य परजीवयोरेकत्वे परनित्यत्वश्रुत्यैव जीवस्यापि नित्यत्वसिद्धेस्तत्पुनः श्रुत्यानर्थक्यमूलं वाच्यम् । तदपि न युक्तम् । कार्यकारणाभेदवादिना शक्तिव्यक्त्यभेदवादिना च त्वया नित्यत्वादिसांकर्यस्याङ्गीकृततया तथैव परनित्यत्वेऽपि जीवानित्यत्वं स्यादिति शङ्कावारणेन तत्सार्थकत्वात् । संख्याया गुणस्य च भेदकत्वं "यस्मिन्पञ्च पञ्चजनाः" (बृ० उ० ४ । ४ । १७) "अणोरणीयान्महतो महीयान्" (क० उ० २ । २०) इत्यादौ त्वयैव प्रतिषिद्धम् । प्रकरणभेदो न भेदक इति तु स्पष्टमेव । भारतादिषु रामकृष्णादिचरितप्रतिपादकप्रकरणभेदेऽप्यभेदानपायात् । सृष्टिसंहारप्रतिपादकप्रकरणभेदेऽपि त्वया सृष्टिसंहारादिक्रियाणामभेदस्याङ्गीकृतत्वात् । एतेन जीवेशाविति नामभेदस्यापि भेदकत्वं प्रत्याख्यातम् । तस्मात्परस्परविरुद्धधर्मवतामवतारादीनामिव जीवानामप्यभेदश्रुत्यनुसारेणाऽऽपतदत्यन्ताभिन्नवासुदेवांशत्वं त्वया निवारयितुं न शक्यत इति भावः ॥ ३२ ॥

नन्वस्त्वेवं जीवब्रह्मणोरभेदस्तथाऽपि निर्दोषाशेषगुणपूर्णस्य ब्रह्मणो जीवं प्रत्यभेदेऽप्यावृतत्वोपपादनाद्विचार्यत्वं संभवतीति न मन्मते शास्त्रमारम्भणीयमिति परमसिद्धान्तस्य किंचिद्दूषणमिति मन्दशङ्कामपाकुर्वन् सिद्धान्तदूषणमुपसंहरति—इत्थमिति । न वयं सर्वथैव ब्रह्ममीमांसाशास्त्रारम्भमाक्षेप्तुं प्रवृत्ताः ।

टि०—शास्त्रप्रतिपाद्य इति त्वदभिमततया तस्य च तव प्रत्यक्षादिनैव सिद्धेः । वेदान्तानां तदर्थनिर्णायकशास्त्रस्य चापार्थीकरणदोषस्त्वच्छिरसि वज्रलेपायित इत्यलं पल्लवितेन ॥ ३२ ॥

अप्पदीक्षितसुधीविनिर्मिते मध्वदर्शनमुखापमर्दने ।
आदिमाधिकरणस्य दूषणं भूषणं भवतु धीमतामिदम् ॥३४॥

॥ इति जिज्ञासाधिकरणसिद्धान्तदूषणप्रकरणम् ॥

व्या०—अस्माभिस्तदारम्भस्य स्थापनीयत्वात् । किंतु ब्रह्मभेदमाश्रित्य ब्रह्मणो विषयत्वोपपादनेन तदारम्भमाक्षेप्तुम् । तदाक्षेपश्च संस्थिर एव । त्वद्रीत्यैव जीवब्रह्मभेदस्य निराकृतत्वात् । अतस्तं पक्षं विहाय जीवाभेदेऽप्यावृतत्वाद्ब्रह्म विचार्यमिति पक्ष आश्रीयते चेत्, साऽस्मद्रीतिरेव न दूषणीया । न च सगुणस्यैव ब्रह्मणः परपक्षे जीवाभेदोपपादनाद्रीतिभेदोऽस्तीति शङ्कनीयम् । परमते गुणगुणिनोर्भेदाभावाद्भेदप्रतिनिधेस्तदाभिमतस्य विशेषस्याऽऽवश्यकब्रह्मशक्त्यैवोपपन्नतया निराकृतत्वात् । अस्मन्मतेऽप्यविद्याशक्तिवशाद्गुणगुणिभावप्रतीतेरिष्यमाणत्वात् । यदाहुः पद्मपादाचार्याः—"आनन्दो विषयानुभवो नित्यत्वं चेति । सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते" इति । इयांस्तु विशेषः—जीवे प्रत्यक्षतोऽवभासन्ते । ब्रह्मणि तु "आनन्दं ब्रह्मणो विद्वान्" (तै० उ० २ । ९) इति श्रुतिबलादवभासन्ते । तस्मात्सिद्धमेतज्जीवब्रह्मभेदावलम्बनेन शास्त्रारम्भसमर्थनमयुक्तमिति ॥ ३३ ॥

टि०— जीवाभेद इति । निर्विशेषजीवाभिन्नब्रह्मविषयमादायैव शास्त्रप्रवृत्तिरिति तात्पर्यम् । यत्त्वत्र—जिज्ञास्ये ब्रह्मपदश्रवणात्, "तद्विजिज्ञासस्व । तद्ब्रह्मेति" (तै० उ० ३ । १) ब्रह्मशब्दश्च गुणपूर्तितां वक्ति । "अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन्गुणाः" इति श्रुतेः । तथा च कथं तस्य जीवाभेदः । जीवस्याल्पगुणानुभवात्" इति । तन्न । उक्तश्रुतौ जिज्ञास्ये ब्रह्मपदश्रवणेऽपि तस्य जीवभेदासिद्धेः । अल्पगुणवतो घटादेरनित्यत्वदर्शनेन श्रुत्या ब्रह्मणि गुणबाहुल्यबोधनेऽनित्यत्वस्य कैमुतिकन्यायग्रस्तत्वात् । अत एवोक्तं सूत्रकृता—"रूपादिमत्त्वाच्च विपर्ययो दर्शनात्" (ब्र० सू० २ । २ । १५) इति । उक्तं हि त्वद्भाष्ये—"रूपादिसत्त्वाच्च परमाणूनामनित्यत्वं, तथा दृष्टत्वाल्लोके" इति । यद्रूपादिमत् तस्य घटादेरनित्यत्वदर्शनादिति तत्त्वप्रकाशिका । अतो निर्गुणत्वमेव नित्यत्वप्रयोजकं संमतं च । उक्तं च भगवता कृष्णेन—"अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः" (गी० १३ । १८) इति । ततश्च भवन्मार्गस्य मूलक्षतिकरत्वेन ब्रह्मणि गुणानां सत्त्वं नाभ्युपगन्तव्यम् । उक्तश्रुतौ कल्पितगुणानां ब्रह्मणि कल्पितानां बोधकत्वेनाप्युपपत्तेः । वस्तुतस्तु तादृशश्रुतेस्तत्कल्पितत्वं पूर्वमेवोक्तमिति सा नेदानीमुदाहर्तव्या । अतो देशकालवस्तुपरिच्छेदराहित्यमेव ब्रह्मशब्दार्थ इति जीवब्रह्माभेद एव सूत्रकृत्संमतः । न च जीवाणुत्वस्य वक्ष्यमाणत्वेन कथं महतो ब्रह्मणस्तदभेद इति वाच्यम् । ब्रह्मगुणानामिवाणुत्वस्यापि मिथ्यात्वस्याऽऽषाढवातन्याय-

व्या०— ॥ अथ जन्माद्यधिकरणदूषणप्रकरणम् ॥

जन्मादिसूत्रे परकीयमधिकरणं यदुक्तं—" तद्विजिज्ञासस्व । तद्ब्रह्म " (तै० उ० ३ । १) इति विचारविधिवाक्ये ब्रह्मपदेन जीवविलक्षणस्य ब्रह्मणो विचार्यस्य समर्पणात्सविषयमिदं शास्त्रमिति । तन्न घटते । तत्र ब्रह्मपदस्य जीवपरत्वात् । तथा हि—" ब्रह्मशब्दस्तावज्जीवस्यापि वाचकः । बृह बृहि वृद्धाविति धातोरिव 'बृह—जातिजीवकमलासनशब्दराशिषु' इति धातोरपि मनिन्प्रत्यये सति ब्रह्मशब्दनिष्पत्तेः[१] । तस्य च जीववाचकत्वं रूढ्यैव । जीवे गुणपूर्त्यादियोगासंभवात् । परब्रह्मवाचकत्वं तु योगेन । ततश्च रूढेर्योगतो बलवत्त्वादिह ब्रह्मशब्दस्य जीवपरत्वमेव युक्तमिति पूर्वपक्षे । राद्धान्तः—सत्यं रूढिर्बलीयसी । इह त्वस्य बाधकं जागर्ति । 'यतो वा इमानि भूतानि जायन्ते' (तै० उ० ३।१) इत्यादौ श्रुतं ब्रह्मपदनिर्देश्यस्य जगज्जन्मादिकारणत्वम् । तद्धि विष्ण्वेकनिष्ठमिति तल्लक्षणमिति श्रुतिस्मृतिपुराणादिभ्योऽवगतम् । अतस्तदनुसारेण योगतः परिपूर्णगुणविष्णुपर एवायं ब्रह्मशब्दः" इति ।

तत्र पूर्वपक्षोक्ता ब्रह्मशब्दस्य जीवे रूढिरसिद्धा[२] । शरीरबृंहकत्वादिक्लृप्तयोगेनैव तत्र प्रवृत्त्युपपत्तेः । धात्वन्तरस्य चाप्रामाणिकत्वादिति दूषणं स्पष्टमे-

---

टि०—ग्रस्तत्वात् । अणुत्वादिप्रतिपादकश्रुतीनां भगवत्पादैरेव तद्गुणसारत्वाधिकरणे गतिवर्णनान्नात्र लेखनीं व्यापारयामः । एवं च जीवेशाभेदमादायैव शास्त्रारम्भः समर्थनीय इति शिवम् ॥ ३३ ॥ ३४ ॥

इति टिप्पण्यां जिज्ञासाधिकरणदूषणं समाप्तम् ॥

१ निष्पत्तेरिति । बृहि वृद्धाविति धातोः " बृंहेर्नोऽच्च " (उणादिसू० ५८'१) इत्यौणादिकसूत्रेण मनिन्प्रत्यये नोऽकारे उर्यणि च ब्रह्मशब्दनिष्पत्तिवत्, बृह—जातिजीवकमलासनशब्दराशिष्विति धातोस्तादृशरूपानिष्पत्तिः । 'तदनुबन्धकग्रहणे' (परिभा० ८४) इति न्यायेन तादृशसूत्रस्य तत्राप्रवृत्तेः । तथाऽप्यभ्युपगम्य तथोक्तिरिति भावः । एतेन " बृहि वृद्धौ " इति धातोः " बृंहेरम् नलापश्च " इति मनिन्प्रत्ययेऽमागमे नलोपे च ब्रह्मेति रूपम् " इति प्रलपनं परास्तम् ।

२ असिद्धेति । उक्तब्रह्मशब्दस्य संकोचे प्रमाणाभावेन देशकालवस्तुपरिच्छेदराहित्यविशिष्टं वस्त्वेवार्थः । उक्तपरिच्छेदवतो घटादेरब्रह्मत्वदर्शनाच्च । ततश्च भगवत्पादीयभाष्योक्तयोगमर्यादया निर्विशेषब्रह्माभिन्ने " बृहत्वाद्बृंहणत्वाद्वा " इत्यादिभामत्युक्त्या तथा सविशेषे च जीवे तस्य प्रवृत्ते रूढिरसिद्धेति भावः । एतेन " यत्केनचित्प्रलपितं 'विष्णौ पुष्कलयोगेन मुख्यत्वमन्यत्र तदभावेनामुख्यत्वमिति सिद्धावपि लोकरूढ्या

तद्ब्रह्मेत्यस्य रूढ्या तनुधरपरतामुज्झतोऽनूक्त्ययोगा-
त्किं न्वन्नाद्येषु युक्ता भवति तव मते सा यतो वेत्यनूक्तिः ।
ब्रह्मैक्यात्तेषु युक्ता यदि किमिति तदा जीववर्गे न युक्ता
जीवान्भेदेऽप्यभिन्नानपि कथयसि भो ब्रह्मणा तद्गुणेन ॥३५॥

व्या०·· वेति मत्वा सिद्धान्तं दूषयति तद्ब्रह्मेति—यदि जगत्कर्तृत्वानुवादस्य जीवे पर्यवसानायोगाद्विचारविधिवाक्यगतस्य ब्रह्मशब्दस्य रूढ्यर्थो जीवः परित्यज्यते, तदा येष्वन्नप्राणमनोविज्ञानानन्देषु तस्य ब्रह्मशब्दस्य वृत्तिस्तवाभिमता तेष्वपि वृत्तिरियं तव परित्यक्तव्या स्यात् । जगत्कारणत्वानुवादपर्यवसानासंभवस्य तेष्वपि तुल्यत्वात् । तथा हि—वरुणेन ब्रह्मविद्यार्थमुप-

टि०—जीवपरत्वे बाधकाभावः । एतादृशशङ्कायाः क्वचिन्निराकर्तव्यत्वात् । अस्मिन्नेवाधिकरणे पूर्वपक्षं कृत्वा तन्निरासात् । रूढाववान्तरभेदस्याप्यसिद्धेश्चेति ’ तत्परास्तम् । लोके ब्रह्मशब्दस्य जीवे रूढिग्राहकप्रमाणाभावेन तादृशशङ्काया एवानुदये तन्निराकरणार्थं प्रकृताधिकरणे प्रयासानौचित्यात् । देहबृंहकत्वादिरूपयौगिकार्थेनैव ब्रह्मशब्दस्य जीवे प्रवृत्त्युपपत्तेः । ननूक्तयौगिकार्थस्य मानाभावात्, गुणपूर्त्यादेर्जीवेऽसंभव इति कथं योगमर्यादया तत्र ब्रह्मशब्दप्रवृत्तिः । किंचास्मदाचार्येण सर्वज्ञतमेनोदाहृतस्य चिरंतनव्याकरणसिद्धाभिधानस्य संभवात् । तस्य चार्वाचीनेन त्वयाऽपलपितुमशक्यत्वादिति चेन्न । देहबृंहकत्वरूपार्थे पूर्वोक्तवचनस्यैव प्रमाणत्वात् । योगार्थगुणपूर्तेस्त्वत्साक्षिमात्रगम्यश्रुतिकल्प्यायाः शास्त्रीयव्यवहारानुपयोगात् । ईश्वरव्यतिरिक्तसर्वज्ञे विप्रतिपत्त्योक्तधातुपाठाभिधानस्य सर्वज्ञतमोदाहृतत्ववचनस्याज्ञानविजृम्भितत्वात् । धातोः क्रियावाचकत्वनैयत्येन बृहधातोर्जात्यादिपरत्वोक्तेरतीव गर्ह्यत्वात् । अपि च “ रूढिर्लब्धात्मिका योगं बाधते न त्वलब्धिका । तत्रैव चाऽऽत्मलाभोऽस्या यत्र नावयवार्थता ” (   ) इत्यभियुक्तोक्त्याऽवयवार्थवतो ब्रह्मशब्दस्य रूढ्यनुन्मेषात् । उन्मेषे च बृहत्त्वादिवचनमूलरूढेर्योगमूलत्वेन विद्वद्रूढितया प्राबल्यात्त्वदुक्तरूढ्या प्रकृताधिकरणपूर्वपक्षस्य तव मतेऽनुत्थितिरिति यत्किंचिदेतत् ॥

१ तुल्यत्वादिति । ब्रह्मशब्देन यदि जीवो विवक्षितः, तर्हि जगत्कारणत्वमपि पूर्ववाक्योक्तं तस्मिन्नेव स्थापनीयम् । तच्च यथा परिच्छिन्नशक्तिके जीवे न संभवति, तथा परिच्छिन्नान्नमयादिकोशाधिष्ठातृष्वनिरुद्धादिष्वपि न युज्यते । यदि “ एतन्नानावताराणां निधानं बीजमव्ययम् ” (   ) इति पुराणवचनानुसारेणैतेषां मूलरूपाभिन्नत्वेन तद्युक्तमित्याशंससे, तर्हि तद्ब्रह्माभिन्ने जीवेऽपि युक्तं तौल्यादिति भावः । ननु विष्णोर्नानारूपत्वेऽपि सर्वरूपाणां सर्वगुणयुक्तत्वेऽप्यनभिव्यक्तिमात्रेण तत्तद्व्यापाराणां

व्या०—सन्नं भृगुं प्रति यज्जगज्जन्मादिकारणं तद्ब्रह्म तपसा विजिज्ञासस्वेत्युपदिष्टे सोऽपि तपसैवान्नं जगज्जन्मादिकारणं ब्रह्मेत्यवगम्य पुनः पुनर्गुरूपसत्त्या क्रमेण प्राणं मनो विज्ञानमानन्दं तथाऽवगतवानिति भृगुवल्ल्यां श्रूयते । तत्र “ आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते ” (तै० उ० ३ । ६) इत्यानन्दवाक्यमेव प्रथमं सामान्यतो लक्षणमुखेनोपदिष्टस्य ब्रह्मणो निर्णयवाक्यम् । आनन्द एव च जगज्जन्मादिकारणं मुख्यं ब्रह्म । अन्नादयस्तु चत्वारोऽपि कोशाः ‘ अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते ’ (तै० उ० ३ । २) इत्यादीनि च स्थूलारुन्धतीन्यायेन प्रवृत्तानीत्यस्माकं मतम् । तव तु “ अन्नादिवाक्यानि पञ्चापि तन्निर्णायकानि । अन्नादिषु पञ्चस्वपि ब्रह्मशब्दस्य जगत्कारणत्वलक्षणयोजनस्य च दर्शनात् । पुनः पुनरुपसत्तिस्त्वन्नमयादिकोशानां पञ्चानां ब्रह्मरूपाणां मध्ये पूर्वपूर्वरूपापरोक्षीकरणानन्तरमुत्तरोत्तररूपापरोक्षीकरणार्थं तपोनुज्ञाप्राप्तये, प्रतिपर्यायं “ तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ” । तपसा ब्रह्म विजिज्ञासस्व ” इति च श्रवणात् ” इति मतम् । एवं च तव मते “एतन्नानावताराणां निधानं बीजमव्ययम्” (.........) इत्यादिपुराणप्रसिद्धेन मूलरूपेणैव ब्रह्मणश्चतुर्मुखादिसकलभूतजातजन्मादिकर्तृत्वं, न तु प्रतिशरीरं कोशाधिष्ठातृतयाऽभिव्यक्तैरित्यन्नादिष्वप्यनुवादयुक्तिस्तुल्यैव । यद्यपि तव मते सर्वाणि भगवद्रूपाणि सविशेषाभिन्नानि,

टि०—व्यवस्थाऽङ्गी क्रियते । “ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ” (गी० १० । ८) इत्यादिस्मृतेः । “ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ” (ब्र० सू० ३।२।११) इत्यादौ सर्वरूपाणां निर्दोषाशेषसद्गुणत्वस्य सूत्रकृतैव प्रतिपादितत्वाच्चान्नमयादीनां तद्रूपाणां युक्तं जगत्कारणत्वं न जीवस्य, अतद्रूपत्वादिति चेदनधिगतभावोऽसि । अन्नमयादीनां ब्रह्मरूपत्वमभ्युपगम्य ब्रह्मगुणानां तत्र केषांचिदभिव्यक्तिः केषांचिन्नेति कल्पने जीवेऽपि ब्रह्माभिन्ने सत्त्वचेतनत्वादीनां तद्गुणानामभिव्यक्तिरन्येषामनभिव्यक्तिरिति कल्पनसंभवादित्यभिप्रायात् । एतेन “ जीवे कारणत्वयोजनमप्रामाणिकं सर्वप्रमाणविरुद्धं च ” इत्यपास्तम् । मूलरूपाभेदप्रमाणबलादन्नमयादीनामिव जीवब्रह्माभेदप्रमाणबलेन जीवस्यापि कारणत्वसंभवेन तद्व्यावृत्त्ययोगात् । तस्माद्ब्रह्मशब्दस्योक्तरूढित्यागायोगेन सिद्धान्तानुत्थितिरिति हृदयम् ॥

१ ननु पञ्चानां ब्रह्मत्वेऽन्नस्य प्राणस्य वा ब्रह्मणो ज्ञानेनेष्टलाभे पुनः पुनरुपसत्तिर्व्यर्था स्यादत आह—पुनः पुनरुपसत्तिरिति । एतेन पञ्चानामपि ब्रह्मणामत्यन्ताभेद इति मध्वसिद्धान्तासिद्धिः सूचिता ॥

यतो वेत्याद्युक्तिः कथमिव हि जीवे न घटते
कथं तद्ब्रह्मेतिश्रुतिरपसरेद्रूढिविषयात् ।
जगत्स्रष्टुं सर्वं प्रभवति खलु ध्यानविषयः
समस्तोऽयं मानोरथिक इति जीवस्तव मते ॥ ३६ ॥

व्या०—तथाऽपि तत्तत्कृत्यानि व्यवस्थितान्येव । न हि रावणवधादिकं शिशुपालवधादिकृष्णचरितमध्ये वर्ण्यते ।

स्यादेतत् । तात्त्विकाभेददृष्ट्या रूपान्तराविष्कृतोऽपि महिमा रूपान्तरे वर्णयितुं युक्तः । "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" (गी० १०।८) इत्यादिकृष्णवाक्यश्रवणात् । रावणवधादेः कृष्णरूपाविष्कृतचरितमात्रसंग्रहप्रस्तावेष्ववर्णनेऽपि सर्वरूपाभिमानिपरब्रह्मरूपतया कृष्णवर्णनप्रस्तावेषु कृष्णेऽपि वर्णनदर्शनाच्च । अतोऽन्नादिरूपेषु मूलरूपाभेददृष्ट्या जगत्कर्तृत्वानुवादो युक्त इति चेदेवं तर्हि जीवेऽपि स युक्त एव । जीववर्गोऽपि ज्ञानानन्दादिब्रह्मगुणशालितया ब्रह्माभिन्न इति त्वयाऽङ्गीकृतत्वात् । 'तत्त्वमसि' इति जीवे प्रकृतजगत्कर्तृपरामर्शितत्पदोक्तब्रह्माभेदप्रतिपादनस्य ज्ञानानन्दादिगुणैक्यप्रयुक्ताभेदविषयतया "सर्वं खल्विदं ब्रह्म" (छा० ३ । १४ । १) इति ब्रह्मणि सर्वप्रपञ्चाभेदप्रतिपादनस्य "सर्वभूतगुणैर्युक्तम्" (.........) इति स्मृतेः पृथिव्यादिगन्धारकत्वादिगुणा ब्रह्मणि सन्तीति तत्तद्गुणैकरूप्यप्रयुक्तपृथिव्याद्यभेदविषयतया च त्वया "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" (ब्र० सू० २ । ३ । २९) इति सूत्रे व्यवस्थापितत्वाच्चेति भावः ॥३५॥

एवं यतो वेत्यादिनाऽनुवाद्यस्य ब्रह्मणि सतः कारणत्वस्य तदभेददृष्ट्या जीवे वर्णनं युक्तमिति प्रतिपादितम् । इदानीं साक्षादपि जीवे तदनुवाद्यं संभवतीत्याह—यतो वेति । इत्थं हि तव मतम्—स्वस्वध्यानमनोराज्येष्वनुभूयमानाः सरि-

---

टि०- १ तद्गुणसारत्वादिति । अत्र त्वदीयं भाष्यम्— "ज्ञानानन्दादिब्रह्मगुणा एवास्य सारः स्वरूपम् । अतोऽभेदव्यपदेशः । यथा सर्वगुणात्मकत्वात्सर्वात्मकं ब्रह्मोच्यते— "सर्वं खल्विदं ब्रह्म" इति । एतेन जीवस्य ब्रह्मगुणवत्त्वकथनेन त्वदाचार्याणामपि जीवब्रह्माभेद एवैकान्ततः संमत इति व्यज्यते । अन्यगुणानामन्यत्र सत्त्वायोगेन ज्ञानानन्दादीनां जीवेऽभ्युपगम तथात्वावश्यंभावात्" इति ॥ ३५ ॥

२ यतो वेति । तव मते ध्यानविषयोऽयं समस्तो नद्यादिर्मानोरथिक इति हेतो-

स्थूलप्रपञ्चो यदि चानुवाद्यः सोऽप्यस्ति ते ध्यानमनोरथार्थः ।
सन्त्येव तत्राप्यतिदुर्घटानि सर्वापरोक्षादिषु को विरोधः ॥३७॥

व्या०—त्समुद्रगिरिनगरगजतुरगादयो न बहिः सन्तः। नापि भ्रान्तिमात्रविषयाः, किंतु स्वप्नादिद्रष्टृपुरुषान्तःकरणगतानादिकालप्रवृत्ततत्तद्विषयानुभवजन्यवासनोपादानास्तदानीमेवान्तरुत्पन्नास्तत्र ध्यानमनोरथविषयाः पुरुषप्रयत्ननिर्वर्तिता न स्वप्नविषया इति । तदुक्तं न्यायसुधायाम्—“ संध्ये सृष्टिराह हि ” (ब्र० सू० ३ । २ । १) इत्यधिकरणे यथा मनोरथे ध्याने च संस्कारयोनीनर्थान्मनसाऽनुभवति, एवं स्वप्नेऽपीति किमनुपपन्नम् । इयांस्तु विशेषः—मनोरथादौ प्रयत्नपूर्विका पदार्थसृष्टिः, स्वप्ने पुनरीश्वरेच्छाधीनैवेति ” । तत्रैव प्रथमसूत्रेऽपि ध्यानं मानसी क्रियेति शङ्कानिराकरणार्थमुक्तं—यदि क्रिया परिस्पन्दस्तर्हीन्द्रियाश्रितोऽतीन्द्रिय इत्यपरोक्षावभासाविरोधः । रूपरहितत्वेन तदवभासाविरोधश्च । यदि च मानसी सृष्टिरिति च मतं—अनुमतमेतत् । श्रवणदर्शनादिजनितमानसवासनामयस्य वस्तुनो मानसावलोकनं ध्यानमित्यङ्गीकारात् । अनीन्द्रियोपादानकस्यापि द्रव्यस्यातीन्द्रियत्वाभावस्त्र्यणुकादेरिवोपपद्यते । नीरूपाद्वायो रूपवत्तेजसो जन्म वेदान्तिनां प्रसिद्धमेवेति ” । एवं ध्यानमनोरथयोरसंभावितो विषयः कोऽपि नास्तीति । तद्विषयस्रष्टृजीवे साक्षादप्यनुवाद्यान्वयः संभवतीति भावः ॥ ३६ ॥

ननु “यतो वा इमानि” (तै० उ० ३।१) इति दर्शनाद्वक्तृश्रोतृसाधारणसकलस्थूलप्रपञ्चस्रष्टृत्वमनुवाद्यम्। तत्तु जीवे न संभवतीत्याशङ्क्याऽऽह—**स्थूलप्रपञ्चेति** । स्थूलप्रपञ्चस्रष्टृत्वमपि जीवस्य संभवति । तस्य चिरंतनहिरण्यगर्भादिजीवध्यानमनोरथादिप्रभवत्वोपपत्तेः । न चेश्वरस्य स्रष्टृत्वश्रुतिविरोधः । तस्यापि प्रपञ्चान्तरस्रष्टृत्वेन घटादिष्विव ध्यानजादिष्वपि स्रष्टृत्वेन च तदुपपत्तेः । न च वासनामयत्वे सर्वापरोक्ष्यसर्वार्थक्रियाकारित्वादिविरोधः । अतिसूक्ष्मवासनोपादानत्वेऽपि स्वप्नध्यानमनोरथादिविषयाणां भूगोलकमहार्णवादीनामतिमहत्त्वम् । एतेषां च स्वल्पशरीरावस्थानम् । मुहूर्तमात्रानुवृत्तिषु स्वप्नध्यानमनो-

टि०— जीवः सर्वं जगत्स्रष्टुं हि यतः प्रभवति । अतो यतो वेत्याद्युक्तिः कथमिव जीवे न घटते । कथं तद्ब्रह्मेति श्रुतिरपि रूढिविषयादपसरेदिति योजना ।

१ प्रसिद्धमेवेति । एवं च मनोजन्यानामपि नदीनगरसमुद्रादीनां वायुजन्यतेजोवत्प्रत्यक्षविषयत्वं संभवतीति भावः ॥ ३६ ॥

यद्येवं रोचयेथाः कथमपि न गतिं स्वेष्टसंसिद्धबुद्ध्या
लब्धुं ते वृद्धिमृद्धां ध्रुवमभिलषतो मूलमेव प्रणश्येत् ।
अत्यन्ताभेद एव परतनुधरयोरापतेत्तद्विरोधे
राजन्योक्थ्यादिरीत्या बत विपरिणमेद्वाध्यतेऽत्रानुवाद्यम्॥३८॥

व्या०—राज्यादिष्वनेकशतवर्षादिवहनमित्यादेरपि दुर्घटस्य दर्शनेन तद्वदेव ध्यानमनोरथप्रभवे प्रपञ्चे सर्वापरोक्ष्यादेरप्यविरोधात् । वासिष्ठरामायणे भार्गवनन्दनमनोराज्यादिविषयप्रपञ्चेषु सर्वापरोक्ष्यादेर्वर्णितत्वेन मनोराज्यादिसृष्टिमङ्गीकुर्वतस्तव तदनुसरणौचित्याच्चेति भावः ॥ ३७ ॥

नन्विदं जीवेऽनुवाद्यसमर्थनप्रकारद्वयमप्ययुक्तम् । आद्ये हि प्रकारे महावाक्यार्थोऽपि गौणः। द्वितीये त्वनुवाद्यपरावान्तरवाक्यार्थः । तथा हि—ब्रह्मपदस्य जीवपरत्वे परजीवयोरभेदो महावाक्यार्थः। स च जगज्जन्मादिकारणत्वजीवत्वावच्छिन्नाभेदो मुख्यो न संभवतीति ताभ्यां रूपाभ्यां तयोर्भेदाङ्गीकारात् । यस्तु ज्ञानानन्दत्वादिरूपेणाभेदः संभवतीत्युक्तः स तु गौणः। शब्दानुपात्तधर्मावच्छिन्नत्वात् । अत एव प्रबलश्रुतिभिर्भेदसिद्धेः "तत्त्वमसि" (छा० ६।८।७) इति वाक्यं गौणाभेदपरमित्येव " तद्गुणसारत्वात् " (ब्र० सू० २ । ३ । २९) इति सूत्रे दर्शितम् । न चेह तथा गौणो वाक्यार्थः स्वीकार्यः । ब्रह्मपदमात्रस्य योगेन परब्रह्मपरत्वे मुख्यवाक्यार्थलाभात् । एवं जगत्कारणत्वमनुवाद्यपरावान्तरवाक्यार्थः । तच्चासंकुचितं वेदप्रसिद्धं ग्राह्यम् । बलवत्संकोचकाभावात् । वेदप्रसिद्धिसत्त्वे तस्यैव वेदेनानुवदितुं युक्तत्वाच्च । न च जीवानां ध्यानमनोरथादिविषयस्रष्टृत्वमसंकुचितम् । जीवान्तरध्यानादिविषये जीवान्तरस्य स्रष्टृत्वाभावात् । नापि " तत्तेजोऽसृजत " (छा० ६।२।३) इत्यादिवद्वेदप्रसिद्धम् । न च ब्रह्मपदमात्रस्य रूढित्यागेन मुख्यानुवाद्यग्रहणसंभवे तत्त्यागो युक्त इत्याशङ्क्याऽऽह—यदीति ।

टि०— १ वासिष्ठरामायण इति। तत्र हि स्थितिप्रकरणे पञ्चमसर्गे रामं प्रति वसिष्ठोक्तिः " पुरा मन्दरशैलस्य सानौ कुसुमसंकुले । अतप्यत तपो घोरं कस्मिंश्चिद्भगवान्भृगुः " इत्युपक्रम्य षष्ठे सर्गे "आरब्धवान्मनोराज्यमिदमेकः किलोशना:" इति भार्गवमनोराज्यादिसृष्टिं द्वित्रसर्गैरभिधायोपसंहारः कृतः । तन्मध्ये " अथ सादरमुत्थाय शुक्रः शक्रेण पूजितः " इति तत्सृष्टस्येन्द्रप्रत्यक्षविषयत्वं, " इत्युक्त्वा पुष्पमृद्वङ्गी सा तस्य पतितोरसि " इत्यादिना

व्या०—जीवे कथंचिद्योजितमिदं प्रकारद्वयमपि ब्रह्मपदरूढित्यागेन स्वेष्टं लब्धव्यमिति लोभाद्यदि न रोचयेथास्तदा वृद्धिमिच्छतो मूलमेव नष्टमिति न्याय आपतेत् । उक्तप्रकारद्वयानङ्गीकारे ह्यनुवादब्रह्मपदस्वारस्यविषययोर्जीवपरयोर्विरुद्धधर्मवत्तया ताभ्यामुपस्थितयोरपि "यतो वा" इत्यादिमहावाक्यप्रामाण्यादत्यन्ताभेदः प्राप्नोति । विरुद्धधर्मवत्त्वस्य तयोरभेदाविरोधितायाः प्रथमाधिकरणभङ्गे प्रपञ्चितत्वात् । अविरोधे च मुख्यार्थत्यागायोगात् । यदि तु तस्याभेदविरोधित्वमेवेत्यभिमानस्तदाऽत्यन्तमेव त्वन्मतमूलहानिः । तथा ह्यनुवाद्यरूपतया जीवब्रह्मसमर्पकस्य भागद्वयस्य महावाक्यार्थभूताभेदपरिपन्थिधर्मिद्वयोपस्थापकतया विरोधे सत्यप्यविरोधाय कस्यचिद्भागस्यार्थबाधे कर्तव्ये विधेयभागस्य तात्पर्यवत्तया प्रबलत्वात् । "न विधौ परः शब्दार्थः" इत्यनुवाद्यस्वारस्यसिद्धये विधावमुख्यार्थपरिग्रहस्य न्यायविद्भिर्निराकृतत्वाच्चानुवादभागस्यैवार्थबाधः प्राप्नुवञ्जीवगतध्यानादिविषयस्रष्टृतागोचरत्वलक्षणस्य संकोचकरूपबाधस्य त्वदसंमततया गत्यन्तराभावाद्ब्रह्मण्येवानुवाद्ये जीवाभेदपरिपन्थिजगत्कारणत्वोपमर्दात्मा बाधः प्राप्नोतीति । दृष्टश्च पूर्वतन्त्रेऽप्यनुवाद्यगतधर्मस्य विधेयविरोधेनोपमर्दः । अत्र हि "उक्थ्याग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात्सति हि संस्थान्यत्वम्" (जै० सू० १०.५.४९) इत्यधिकरणेऽग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्य इति राजकर्तृकयोरुक्थ्याग्निष्टोमयोर्विधीयमानः षोडशिग्रहः स्तुतशस्त्ररहितः स्यात् । तद्वत्त्वे षोडशिसंस्थयोक्थ्याग्निष्टोमसंस्थाप्रसङ्गेनोक्थ्यस्याग्निष्टोमस्य च सतः षोडशिग्रहविध्ययोगादिति पूर्वपक्षं कृत्वा सिद्धान्तितम्—स्तुतशस्त्रवत्त्वेन निर्ज्ञातः षोडशिग्रहस्तत्र विधीयमानस्तथैव प्राप्नोति । न च संस्थाभङ्गे दोषः। पूर्वसंस्थोपमर्देन संस्थान्तरविध्युपपत्तेः । "उक्थ्यसंस्थो हि यः प्राप्तस्तथाऽग्निष्टोमसंस्थकः । राजन्यस्य तथा नासौ किंतु षोडशिसंस्थकः" (   ) इत्येवं विधेः पर्यवसानामिति । एवं षोडशिग्रहविध्यर्थप्राप्तेनापि स्तुतशस्त्रेण यदा तद्विरोधिनोरनुवाद्ययोरुक्थ्याग्निष्टोमसंस्थयोरुपमर्दस्तदा किमु वक्तव्यं साक्षाद्विधीयमानजीवत्वेन तद्विरुद्धस्यानुवाद्यस्य जगत्कारणत्वस्योपमर्द इति। एवं च पूर्वोक्तप्रकारद्वयानङ्गीकारे जीवपरयोरत्यन्ताभेदप्रसक्त्या त्वदभिमतभेदहानात् । विरुद्धधर्मवतोरत्यन्ताभेदो न संभवतीत्यनुशये ब्रह्मणो जगत्कारणत्वस्यापि हानाच्च त्वन्मतस्य मूलहानिरेव स्यादिति भावः ॥ ३८ ॥

टि०—तस्याप्सरोभिर्दर्शनपूर्वकं भोगादिकं शुकस्यानेकजन्मादिप्राप्तेः कालेन दर्शनं च स्पष्टं वर्णितमस्ति ॥ ३७ ॥

१ प्रपञ्चितत्वादिति । २१ । २९ श्लोकव्याख्यानावसरेऽर्जुनाखण्डलादिदृष्टान्तेनेत्यादिः ॥ ३८ ॥

उक्थ्याग्निष्टोमसंस्थापरिकरविधयो विप्रजाताविवैते
सर्वस्रष्टृत्ववादाः परपरिपठिताः सन्तु कस्मिन्कृतार्थाः ।
अत्रैवाऽऽरोपबाधद्वितयमनुभवन्त्वद्वितीयत्वसिद्ध्यै
चित्यग्नावाग्निहोत्रे विधय इव पयःशस्तये जर्तिलादेः ॥३९॥
तद्ब्रह्मेत्येक एव प्रभवति निखिलस्रष्टृतावादवृन्दं
विष्णोर्नानाश्रुतिस्थं विधिरपवदितुं त्वन्मते पूर्वरीत्या ।
सर्वाद्वैतश्रुतिभ्यो यदि हि स बलवान्यौगिको ब्रह्मशब्दः
सर्वद्वैतश्रुतिभ्यः कथमिव न भवेत्तत्र रूढिं प्रपन्नः ॥ ४० ॥

व्या०— स्यादेतत् । विरुद्धधर्मवतोरत्यन्ताभेदो न संभवत्येव । तथाऽपि नोक्थ्याग्निष्टोमन्यायेन जगत्कारणत्वबाधप्रसक्तिः । तन्न्यायवैषम्यात् । राजन्यप्राप्तयोरुक्थ्याग्निष्टोमसंस्थयोर्बाधेऽपि हि न तदनुबन्धिविधीनामत्यन्तबाधः । वर्णान्तरे चरितार्थत्वात् । ब्रह्मणि जगत्कारणत्वबाधे तु सृष्टिप्रलयादिवाक्यानामत्यन्तबाधः स्याद्विषयान्तराभावात् । तस्मादानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायाद्विधेयपरस्यापि ब्रह्मशब्दस्य रूढित्यागो लभ्यत इत्याशयवतीमाशङ्कामुद्भाव्य परिहरति—उक्थ्येति। सृष्ट्यादिवाक्यानां विषयान्तरभावो न दोषः। ब्रह्मणोऽद्वितीयत्वसिद्ध्यर्थमध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रसिध्यतीत्युक्तरीत्या ब्रह्मणि कर्तव्यप्रपञ्चापवादापेक्षितेन तदारोपेण चारितार्थ्यम् । दृष्टं च पूर्वतन्त्रे प्रयोजनान्तरसिद्ध्यर्थापवादापेक्षिताऽऽरोपमात्रेण चारितार्थ्यमग्निचयनेऽग्निहोत्रे जर्तिलयवाग्वादिषु तद्वदिहापि स्यादित्यर्थः ॥ ३९ ॥

स्यादेतत् । एकस्य ब्रह्मशब्दस्य रूढिपरिपालनाय यतो वेत्यनुवादस्य तत्पुरोवादानां सृष्ट्यादिवाक्यानां चैवमुपमर्दकल्पनमयुक्तमित्याशङ्क्याऽऽह—तद्ब्रह्मेति। सत्यमेकानुरोधेन बहूनामुपमर्दो न युक्तः । स तु न्यायस्त्वया तद्ब्रह्मेत्यत्र ब्रह्मशब्दे त्यक्तः । त्वया हि पूर्वाधिकरणे ब्रह्मशब्दस्य जीवब्रह्मभेदसाधकत्वमङ्गीकृत्य तेनैकेन पूर्वपक्षाभिमतसकलाद्वैतश्रुतीनां बाधो वर्णितः । तद्रीत्यैवात्र वक्तुं

टि०—१ जर्तिलयवाग्वादिष्विति। "जर्तिलयवाग्वा वा जुहुयात् । गवीधुकयवाग्वा वा जुहुयात्" इत्यादौ जर्तिलयवाग्वादेर्होमसाधनत्वस्य " अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च " इति निन्दायाश्च " अजक्षीरेण जुहोति " इति विध्येकवाक्यतया तद्वाक्यस्य तत्परत्वाभावो यथा तद्वदित्यर्थः ॥ ३९ ॥

२ वर्णित इति । एनेन मध्वमते पूर्वापरविरोधः स्पष्टीकृतः । पूर्वाधिकरणे ब्रह्मशब्दस्यो-

किंच श्रुत्येकगम्ये रव इव रसनं साधनं बाधनं वा
कर्तुं शक्तं न मानान्तरमखिलजगत्कर्तरीति स्वरीतिः ।
स्मृत्यारूढां कथं न व्यपगमयति ते लोकदृष्ट्या निरूढा-
मेकत्वायोगशङ्कां परतनुधरयोर्वल्गनं तन्मुधैव ॥ ४१ ॥

व्या०—सुगमम् । "तेनैव ब्रह्मशब्देन जीवरूढिन्यायतः प्राप्तेन जगत्कारणब्रह्मा-भेदबोधपर्यन्तेन सृष्टिवाक्यादिसर्वाद्वैतश्रुतीनामुपमर्द इति" । न ह्ययं ब्रह्मशब्दो यौगिकत्वेन बलवान्न तु रूढत्वेनेति वक्तुं युक्तमित्यर्थः ॥ ४० ॥

एवं ब्रह्मविरुद्धगुणवत्त्वमभेदविरोधीति परोक्त्यनुसारेण तथा सत्यनुवाद्यगत-विरुद्धगुणवत्त्वस्यैवोपमर्दनं स्यान्न तु विधेयाभेदस्येत्यापादितम् । वस्तुतस्तु परमते जीवब्रह्मणोर्विरुद्धधर्मवतोरप्यभेदबोधने लौकिकविरोधदृष्टिर्न परिपन्थिनी। त्वन्मते परमेश्वरस्याचिन्त्याद्भुतशक्तिमहिम्ना विरोधसमाधानादिति प्रथमाधिकर-णदूषणे प्रपञ्चितमेव । अधुना तमेवार्थं युक्त्यन्तरेण साधयति—किंचेति ।

टि०—त्पत्तिस्थानीयत्वेन प्राबल्यात्सर्वश्रुतिबाधकत्वमुक्तम् । अस्मिंश्चाधिकरणे तस्य रूढ्या जीवे सावकाशत्वेन निरवकाशजगत्कारणत्ववाचकसकलवेदान्तवाक्यैर्बाध्यत्वमुच्यत इति । अपि चान्तरधिकरणे सावकाशनिरवकाशयोर्निरवकाशं प्रबलमित्यस्य वक्ष्यमाणतयाऽधि-करणमिदं व्यर्थमिति ॥ ४० ॥

१ परिपन्थिनीति । अत्र कश्चिच्चोदयति—जीवपराभेदस्याप्रामाणिकत्वादनेकमानाविरुद्ध-त्वाच्चाचिन्त्यशक्त्या विरोधघटना नाङ्गी क्रियते । प्रामाणिकस्यैवाचिन्त्यशक्त्या घटनाङ्गी-कारात् । अल्पशक्तिजीवाभेदे चाचिन्त्यशक्तेरेव हानिप्रसङ्गेन तयाऽभेदकृतविरोधसमाधानस्य कपोणिगुडायितत्वात् । "नारायणोऽसौ" इत्यादिसमाख्याश्रुतौ स्पष्टं भेदादेः प्रतिपादना-च्चेति" । तत्र ब्रूमः—अन्यत्वेन प्रतिपन्नानां परस्परविरुद्धानामप्यन्नमयादिब्रह्मणामिव जीवब्र-ह्मणोरप्यभेदस्य पूर्वमेव स्पष्टं व्यवस्थापितत्वात । "एकमेवाद्वितीयं ब्रह्म" (छा० ६ । २ । १) इत्यादिश्रुतीनामन्नमयादिष्विव "त्वं स्त्री त्वं पुमानसि" (श्वे० ४ । ३) इत्यादीनां जीवब्रह्मणोरभेदबोधकत्वाविशेषात । न च "त्वं स्त्री" इत्यादेस्तदन्तर्यामिपरत्वमिति शङ्क्यम्, "अन्नं ब्रह्म" इत्यादीनामपि तथात्वापत्तेः । अल्पशक्तिकजीवाभेदेऽपि तस्या-चिन्त्यशक्तिमत्त्वाहानस्य पूर्वमेव प्रतिपादनात् । "नारायणोऽसौ" इत्यादिश्रुतेः । "अन्योऽ-न्तर आत्मा" इतिवत्कल्पितभेदविषयत्वेनाप्युपपत्तेः । किंच जीवस्य ब्रह्माभेदे तस्यैवाल्पश-क्तिकत्वाभावेन ब्रह्मणि तदापादनस्यातीव मौढ्यात् । तस्माद्बहुश्रुतितदनुसारिन्यायैरे वाद्वैतब्रह्मात्मैक्यसिद्धावद्वैतद्वेषं स्मृत्वा श्रुतेरपार्थं वदन्प्रामाणिकैर्दूरतस्त्याज्य इति दिक् ।

व्या०-श्रोत्रैकगम्ये शब्दे रसनेन्द्रियस्येव वेदैकगम्ये ब्रह्मणि मानान्तरस्य साधकत्ववद्बाधकत्वमपि हि नास्तीति त्वन्मर्यादा सा च " श्रुतेस्तु शब्दमूलत्वात् " (ब्र० सू० २ । १ । २८) इत्यधिकरणे त्वया दर्शिता । इत्थं किल तदधिकरणम्-' ईश्वरो जगत्कर्ता चेत्क्षुद्रकार्येषु कृत्स्नशक्त्या प्रवर्तते तदेकदेशेन वा । नाऽऽद्यः । क्षुद्रकार्येष्वपि कृत्स्नशक्त्या प्रवृत्तौ तस्य प्रेक्षावत्त्वहानिप्रसङ्गात् । न द्वितीयः । तस्य निरवयवत्वात् । तस्माज्जीवस्य स्वतन्त्रकर्तृत्वे यदुक्तं कृत्स्नप्रसक्त्यादिदूषणं तदीश्वरस्य स्वतन्त्रकर्तृत्वेऽपि तुल्यम् । न चेश्वरस्य निरवयवत्वेऽपि सांशतया बहुत्वशालित्वादेकदेशेन कर्तृत्वोपपत्तिः । " व्यतिरेको गन्धवत् " (ब्र० सू० २ । ३ । २६) इत्यधिकरणे जीवानामपि सांशतया व्यवस्थापितत्वेन तौल्यात् । जीवस्यांशांशिभावेन बहुत्वाङ्गीकारे बहुत्वस्य भेदव्याप्तत्वेन भेदस्यापि प्रसक्त्या पुनरपि स एव निरवयवत्वशब्दव्याकोप इति तदाक्षेपे, ईश्वरेऽपि तथैवाऽऽक्षेपसंभवात् । विशेषवशादीश्वरस्यांशांशिभावेन बहुत्वोपपादने जीवेऽपि तथैव तदुपपादनसंभवात् । भेदेनोपपादनीयस्यांशांशितया बहुत्वस्य चेतने विशेषेणोपपादने घटादावचेतनेऽपि तेनैवोपपादनप्रसङ्ग इति तदाक्षेपस्य परमेश्वरसाधारणत्वात्, इति प्राप्ते राद्धान्तः-वेदैकगम्ये ब्रह्मणि यथाश्रुति यस्य कस्यचिदर्थस्याङ्गीकारे लौकिकाः शुष्कतर्का न प्रतिभटी भवितुमीशते । नहि श्रोत्रैकगम्ये शब्दे चक्षुरादिकं साधकं बाधकं वा भवितुमर्हति । अत एव योऽसौ " मनुरमनुरवाग्वागिन्द्रोऽनिन्द्रः प्रवृत्तिरप्रवृत्तिरपरमः परमात्मा " ( ) इति श्रुतिरेव लोकदृष्टिविरुद्धानामपि धर्माणां परमात्मन्यविरोधं बोधयति । तस्मान्मानान्तरगम्यस्य जीवस्य स्वतन्त्रकर्तृत्व एव कृत्स्नप्रसक्त्यादिलौकिकतर्काः प्रवर्तेरन्नेश्वरस्येति यथाश्रुति निरवयवोऽपि परमेश्वरः कार्यानुरूपमेकदेशेन जगन्निर्माणे प्रवर्तते । जीवेनापि निरवयवेन कार्यानुरूपमेकदेशेन कृत्स्नशक्त्या वा कारयतीत्यभ्युपगतौ न कश्चिद्दोषः " इति ।

एवमीश्वरस्य तर्कागोचरत्वेन तस्मिन्निरवयवत्वैकदेशकर्तृत्वयोर्विरोधमपह्नुवानः कथं तस्य जीवाभेदे तर्कागोचरत्वं विस्मरसि । येन लौकिकविरोधमूलान्पुनः पुनः शुष्कतर्कानेवोद्घाटयसि । न च नैते शुष्कतर्काः, किंतु जीवब्रह्मभेदाभेदश्रुत्योर्विरोधभेदश्रुतिप्राबल्यापादकतया वाक्यार्थनिर्णायकश्रुत्यनुग्राहकतर्का एव । न चैतेऽप्युपेक्षणीयाः । मीमांसावैयर्थ्यापत्तेः । तत्रैव "श्रुतेस्तु

व्या०—शब्दमूलत्वात् ” (ब्र० सू० २।१।२८) इति मदीयाधिकरणे “ यद्वाक्योक्तं न तद्युक्तिर्विरोद्धुं शक्नुयात्क्वचित् । विरोधे वाक्ययोः क्वापि किंचित्साहाय्यकारणम् ” इति स्मृतिमुदाहृत्य वाक्यार्थनिर्णायकतर्काणामुपादेयताप्रतिपादनाच्चेति वाच्यम् । तथा सति जीवब्रह्मभेदश्रुत्यनुग्राहकत्वेन त्वदभिमतानां विरुद्धधर्मवत्त्वमूलतर्काणामपवादकत्वेन तदभेदश्रुतिप्राबल्यापादका जीवे प्रत्यक्षसिद्धकर्मकर्तृत्वस्य ब्रह्मणि श्रुतिप्राप्तसृष्टिपालनसंहारादिकर्मकर्तृत्वस्य च प्रतिक्षेपकतया कर्तृत्वविशेषतदनुबन्धिगुणरूपाञ्जीवब्रह्मणोः सर्वानपि धर्मान्विचारासहान्मिथ्याभूतान्कुर्वन्तः कृत्स्नप्रसक्त्यादितर्का एव श्रुत्यनुग्राहका इत्युपादेयाः, विरुद्धधर्मवत्त्वमूलकतर्कास्तदपोदिताः श्रुत्यननुग्राहकाः शुष्का उपेक्षणीया इति वैपरीत्यस्यैवाऽऽपत्तेः । तस्माद्ब्रह्मणस्तर्कमात्रागोचरत्वाङ्गीकारे शुष्कतर्कगोचरत्वाङ्गीकारे च विरुद्धगुणवत्त्वमूलतर्कगोचरत्वमवश्यंभावि । ब्रह्मणस्तर्कागोचरत्वनिर्वाहाय त्वदुदाहृतश्रुतावपि हि “ इन्द्रोऽनिन्द्रः ” इत्यपरमः परमात्मेति च तस्यानीश्वरत्वापरमत्वरूपविरुद्धधर्मवताऽपि जीवेनाभेदनिर्देशो दृश्यते । तेनापि तस्य विरुद्धगुणवत्त्वमूलकजीवाभेदप्रतिक्षेपकतर्कागोचरत्वं स्पष्टमेव । अतो न तानुपादाय पुनः पुनर्वल्गनं युक्तमिति भावः ॥

तस्मात्पूर्वपक्षे त्वयाऽङ्गीकृतब्रह्मपदस्य रूढिः कथमपि सिद्धान्ते त्याजयितुं

टि०— १ जन्मादिसूत्रे मध्वमते पूर्वपक्षसिद्धान्तावित्थम्—ब्रह्मशब्दस्य जीवे रूढत्वाद् रूढेश्च योगाद्बलीयस्त्वेन जीव एव “ तद्ब्रह्म ” इत्यत्रत्यब्रह्मशब्दार्थः स एव जगत्कारणमिति पूर्वपक्षः । ब्रह्मशब्दस्य योगमाश्रित्य विष्णुरेव जगत्कारणमिति सिद्धान्तः । एवं सत्यस्याधिकरणस्यैवानुत्थितिः । प्रथमाधिकरणे मध्वभाष्यम्—‘ ब्रह्मशब्दश्च विष्णावेव ” इति । तत्र तत्त्वप्रकाशिका विष्णावेव मुख्य इति शेषः । ब्रह्मशब्दस्यानेकार्थत्वेऽपि विष्णावेव मुख्यत्वात् । मुख्यस्यैव ग्राह्यत्वात्, स एव सूत्रकारविवक्षितो ज्ञायते । न च ब्रह्मशब्दस्यान्यत्रापि रूढत्वेन रूढेरेव ग्राह्यत्वेन कुतो विष्णावेवासौ मुख्य इति वाच्यम् । अन्यत्राज्ञरूढित्वात् । भगवति च विद्वद्रूढित्वात् । “ कवीनां तदेव परमं ब्रह्म ” इति श्रुत्युक्तत्वाद्विद्वदविद्वद्रूढ्योर्विद्वद्रूढेरेव मुख्यत्वादिति । आभ्यां भाष्यटीकाभ्यामन्यत्र रूढिनिरासपूर्वकं ब्रह्मशब्दस्य विष्णुरेव मुख्यार्थ इति निर्णीतत्वेन प्रकृताधिकरणे संशयस्यैवानुदयेन पूर्वपक्षसिद्धान्तयोरनुदयात् । इत्येवं दोषे

द्वैतीयीकाधिकरणदूषणमस्तु त्रयीविदां प्रीत्यै ॥ ४२ ॥

इति जन्माद्यधिकरणदूषणप्रकरणम् ।

कथं निरस्या कथय त्वयाऽनुमा प्रसाधयन्तीदमनेककर्तृकम् ।
तथैव तात्पर्यमपि श्रुतेर्हि सा नये तदेकार्थनियत्यभावतः ॥ ४३ ॥

व्या०—न शक्यत इति जन्मादिसूत्रसिद्धान्तस्तवासमञ्जस इति सिद्धम् ॥४१॥४२

अथ शास्त्रयोनित्वाधिकरणदूषणप्रकरणम् ।

शास्त्रयोनित्वादिति सूत्रे (ब्र० सू० १ । १ । ३) परस्येत्थमधिकरणम्— " यदुक्तं जगज्जन्मादिकारणत्वं विष्ण्वेकनिष्ठं तल्लक्षणमिति । तदयुक्तम् । जगदनेककर्तृकं महाकार्यत्वात्प्रासादादिवत् । शिवो जगत्कारणं सर्वज्ञत्वात् । अत एव विरिञ्चिरपि जगत्कारणम् । न च हेत्वसिद्धिः । शिवस्य सर्वज्ञनाम्ना विरिञ्चस्य " ज्ञानमप्रतिघं यस्य (.........) इत्यादिस्मृत्या च तत्सिद्धेः, इत्याद्यनुमानैरन्यत्रापि जगत्कारणत्वावधारणादिति चेन्न । जगत्कारणत्वस्य धर्मादिवच्छास्त्रप्रमाणकत्वाच्छास्त्रस्य विष्ण्वेकनिष्ठजगत्कारणत्वप्रतिपादकत्वात् । अनुमानस्य संभवदुपाधिमत्त्यनुमानादिदोषशङ्काकलङ्कितस्यादृष्टार्थे स्वतो निश्चायकत्वाभावादिति । तत्र परमते शास्त्रमर्यादयाऽपि जगतोऽनेककर्तृत्वमापतति । तथा तत्तात्पर्यनिर्णायकोपपत्तिरूपलिङ्गतयोदाहृतस्यानुमानस्यैव तदनुग्राहकत्वसंभवात्तत्र तेषां दूषणमयुक्तमित्याह—कथमिति ।

त्वन्मते ह्येकस्य श्रुतिवाक्यस्यैक एवार्थ इति नास्ति नियमः । अतः " सदेव सौम्येदमग्र आसीत् " (छा० ६।२।१) इत्यादिसृष्टिवाक्यानामप्यनेकस्रष्टृपरत्वं संभवति । ततश्च यदि जगतः सामान्यतोऽनेककर्तृकत्वसाधकानुमानं विशिष्य ब्रह्मविष्णुशिवकर्तृकत्वसाधकानुमानानि च तथा तात्पर्यनिर्णायकान्यु-

---

टि०— सत्यपि स्पष्टत्वादुपेक्ष्य पूर्वपक्षसिद्धान्तोन्मेषमङ्गीकृत्य सप्तभिः श्लोकैरुक्तदूषणमुपसंहरति -- तस्मादिति । इति शिवम् ॥ ४१ ॥ ४२ ॥

इति टिप्पण्यां जन्माद्यधिकरणदूषणं समाप्तम् ॥

१ साधकानुमानानीति । एतानि " श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च " (   ) इति भवद्भाष्यानुसारेण श्रुतिस्मृतिसहितत्वात्तात्पर्यग्राहकाणि । " श्रुतिश्च—यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासञ्छिव एव केवलः " (श्वे० ४ । १८) ' प्रजापतिर्वा इदमग्र आसीत् ' (   ) इत्यादिः । स्मृतिश्च " सिसृक्षुरेक एवाग्रे समासीनः शिवः स्वयम् " (आश्व० स्मृ०)।

कर्मब्रह्मोभयार्थं खलु सकलमपि व्याकरोः कर्मकाण्डं
ब्रह्मस्वार्थोभयार्थानुपनिषदुदितानप्यतद्वाचिशब्दान् ।
अन्यांश्चोमादिवागाद्युभयविधपरान्वाङ्मनःप्राणमुख्या-
न्केन स्याद्वाक्यमर्थत्रयमपरिमितार्थं च वह्न्यादिसूक्तम् ॥४४॥

व्या०—पपात्तिरूपतात्पर्यलिङ्गान्यवतरेयुस्तदा तत एवाऽऽपततसृष्टिवाक्यानामनेक-कर्तृपरत्वं दुर्वारम् । एवं च जगत्कारणे वस्तुनि साक्षादनिर्णायकान्यप्यनुमानानि तात्पर्यलिङ्गतया "तेजसा सौम्य शुङ्गेन सन्मूलमन्विच्छ" (छा० ६।८।४) इत्यादिश्रुतिदर्शितानुमानवत्तन्निर्णयोपयोगीनीति कथं त्वया निराकर्तुं शक्यत इत्यर्थः ॥ ४३ ॥

परमते श्रुतिवाक्यानामेकार्थत्वनियमाभावमेव तदङ्गीकृतानेकार्थश्रुत्युदाहरणै-र्दर्शयति—कर्मेति ।

"ज्योतिरुपक्रमात्तु तथा ह्यधीयत" (ब्र० सू० १।४।९) इत्यधिकरणे तावत्—कृत्स्नकर्मकाण्डस्त्वया कर्मब्रह्मोभयपरतया व्याख्यातः। उदाहृतं च तत्र ब्रह्मपरत्वं स्थालीपुलाकन्यायेन केषुचिद्वाक्येषु । तत्र वसन्तवाक्यं यथा—

टि०—ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः "(   ) इत्यादिः । न चैतासां " सर्वः शर्वः शिवः स्थाणुर्ज्येष्ठः श्रेष्ठः प्रजापतिः "इति सहस्रनामान्तर्गतशिव-प्रजापतिशब्दघटितत्वाद् विष्णुपरत्वमिति वाच्यम् । " यानि नामानि गौणानि " इति प्रतिज्ञानुसारेण गौणानामेव सहस्रनामसु प्रवेशेन विष्णोर्गौणार्थत्वे विष्णवन्यस्य शिवब्रह्मादेरेव मुख्यार्थत्वात् । ततश्चोक्तान्यनुमानानि श्रुतिस्मृतिसहितानि तत्तात्पर्यग्राहकाणि न त्वया निरसनीयानि" इत्याशयः। एतेन " प्रत्यक्षाद्यमूलानामनुमानानामदृष्टार्थासाधकतया " तात्पर्यधीहेतुत्वस्याप्यसंभवः । " श्रुतिस्मृतिसहायं यत " इत्यादिस्मृत्या च प्रमाणान्तरमूलकयुक्तेरेव तात्पर्यलिङ्गत्वोक्तेः। उक्तं च टीकायां—" सत्यमस्त्येवानुमानस्यौपनिषदपदार्थ-निश्चायकत्वम् । श्रुत्यादिसहकारियुक्तस्य, नतु नियतप्रामाण्यं स्वातन्त्र्येणादृष्टार्थनिश्चा-यकत्वम् । तादृशं च प्रकृतम् " इति परास्तम्। प्रथमानुमानस्य प्रत्यक्षमूलत्वेन द्वितीयतृतीययोश्च श्रुतिस्मृतिमूलकत्वस्य पूर्वमेवोक्ततयौपनिषदशिवप्रजापतिशब्दार्थनिर्णायकत्वात्। यत्तु—न चैतानि श्रुत्यादिपरिगृहीतानि, प्रत्युत " एकमेवाद्वितीयम् " (छा० ६। २।१।) "एको दाधार " (......) इत्यादिश्रुतिस्मृतिविरुद्धानि । तादृशैस्तर्कैः श्रुति-तात्पर्यं कल्पयतस्तवैवेयं शोभा न परीक्षकाणाम् " इति तदपि न। तासां सामान्यतः प्रवृत्तत्वेन भवद्विष्णुपरत्वानिर्णयादिति दिक् ॥ ४२ ॥

व्या०—वसतीति वसः। पचाद्यच्। तनोतीति तिः। औणादिको डिप्रत्ययः। पूर्वपदस्य नकारागमः। वसश्चासौ तिश्चेति वसन्तिः। सर्वत्र व्याप्य वर्तमानो जगत्कर्ता चेत्यर्थः। तत्र संबुद्धिर्वसन्ते। द्विरुक्तिरादरार्था। जि—जातं पूर्ववज्जने-र्डिप्रत्यये—जिः। अवतेः क्तिः, ओतीति। जातं जगत्, ओति ओतं—प्रविष्टं यस्मिन् स ज्योतिः। षः प्राणः। चेष्टकत्वात्। "षकारः प्राण आत्मेति श्रुतिः। ज्योतिश्चासौ षश्च ज्योतिषः। तत्र संबुद्धिर्ज्योतिषेति। आयजेतेत्यपि संबुद्धिः। आ समन्तात्। यजैर्यज्वभिरितः प्राप्त इत्यर्थः। "यजेर्घञर्थे कविधानम्" इति कप्रत्ययः। संप्रसारणाभावश्छान्दसः। "इन्द्र आगच्छ" इत्यत्र इन्द्रेति आ इति गच्छेति संबोधनानि। गमेश्छदेश्च डप्रत्यये+गं—गतं, छं छादनं यस्मादसौ गच्छः। निरवद्य इत्यर्थः। तत्संबुद्धिर्गच्छेति। स्वाहाशब्दे—स्वं स्वात्मीयं यज्ञादिषु दत्तं हविराहरति स्वी कुरुत इति स्वाहः। हञो डप्रत्ययः। आ इति विष्णुनाम। तयोः समासे संबुद्धिः स्वाहेति। नमःशब्दे नमतेरधिकरणार्थेऽसुन् प्रत्ययः। नमन्ति नियमेनास्मिन् वर्तन्ते कल्याणगुणा इत्यर्थः। इत्येवं बहुषु स्थलेषूदाहृतानि विस्तरभयान्न लिख्यन्ते।

तथोपनिषत्स्वप्यब्रह्मवाचिशब्दा ब्रह्मस्वार्थोभयपरतया व्याकृताः। तद्यथा— "प्राणो वा आशाया भूयान्" (छा० ७। १५। १) इति प्रकरणे प्राणशब्दो भूमाधिकरणे (ब्र० सू० १। ३। ८) ब्रह्मपरतया व्यतिहाराधिकरणे (ब्र० सू० ३। ३। ३८) मुख्यप्राणपरतया च भाष्ये व्याकृतः। उक्तार्थद्वयपरमिदमिति टीकायामुक्तम्। तथा "इन्द्रियेभ्यः परा ह्यर्थाः" (क० ३। १०) इत्यादीनां तदधीनत्वन्यायेन ब्रह्मणि समन्वय उक्तः। इन्द्रियशब्दप्रवृत्तिनिमित्तस्येन्द्रियत्वस्य ब्रह्माधीनत्वादिन्द्रियशब्दो ब्रह्मपरः। इन्द्रियगतपरत्वावधित्वस्य पञ्चम्यर्थस्य ब्रह्माधीनत्वात्पञ्चम्यपि ब्रह्मपरेत्यादिप्रकारेणेन्द्रियदेवतातदुत्कर्षप्रतिपादकत्वं चेति तेषामङ्गीकृतम्। एवमन्यान्यपि भूयांस्युदाहरणानि। "वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि" (छा० ६। १५। २) इत्यादिवाक्ये वाङ्मनःप्राणशब्दा उत्तरोत्तरस्मिँल्लीयमानोमारुद्रहिरण्यगर्भपरा इति। मृतावुत्तरोत्तरस्मिँल्लीयमानवागिन्द्रियादिपरा इति चानेकार्थता वाङ्मनसि दर्शनात् (ब्र० सू० ४। २। १) इत्यधिकरणे दर्शिता। "केन स्याद्येन स्यात्तेनेदृश एव" (बृ० उ० ३। ५। १) इति बृहदारण्यकवाक्यं ज्ञानिनो विहितनिषिद्धसाधारण्येन नियन्त्रणयथेष्टाचरण-

श्लेषप्राये कवित्वे प्रमितपरतया श्लाघनीये च सूत्रे ।
नानाकर्मोपयोगश्रुतिसमधिगतानेकबोध्ये च मन्त्रे ।
एकार्थत्वव्यवस्थात्यजनमनुमतं सर्वमीमांसकाना-
मन्यत्रापीच्छया तद्यदि भवति तव ब्रह्मवाक्येष्वपि स्यात् ॥४५॥

व्या०–विधिपरमिति विहितमध्य एव केषांचिदाचारः केषांचित्परित्याग इत्येतदनुज्ञापरमिति, सवर्मपि विहितमेव कर्मविधिनिबन्धनं विना स्वेच्छया कार्यमित्येवंपरमिति चार्थत्रयस्य हिरण्यगर्भतदितरदेवतामनुष्यविषयत्वेनाविरोध इति "स्तुतयेऽनुमितिर्वा (ब्र० सू० ३।४।१४) इत्यधिकरणे निरूपितत् । वह्न्यादिदेवताप्रतिपादकाः सूक्तमन्त्रास्तदुत्तमसकलदेवताविषयत्वेनाभिमतार्था इति " अङ्गावबद्धाधिकरणे (ब्र० सू० ३ । ३ । ५७) प्रतिपादितम् । एवमनेकार्थत्वेन सकलमपि श्रुतिवाक्यमाकलयतस्तव सृष्टिवाक्येऽप्यनेकस्रष्टृपरत्वं संभवतीति भावः ॥ ४४ ॥

ननु केषुचिद्वाक्येष्वनेकार्थत्वाङ्गीकारमात्रेण सृष्टिवाक्येष्वपि तदापादने मतान्तरेष्वपि तदापद्यते । श्लिष्टकवित्वेषु सूत्रनिबन्धनेष्वनेकत्र विनियुक्तेषु मन्त्रेषु चानेकार्थत्वस्य सर्वैरप्यङ्गीकृतत्वादित्यत आह–श्लेषप्राय इति । शब्दानां व्यवस्थितैकार्थपरत्वमौत्सर्गिकम् । वक्तृविवक्षायां विनियोगेन वा क्वचित्तदपोद्यत इति सकलमीमांसकमर्यादामुल्लङ्घ्य स्वकल्पितार्थनिर्वाहाय स्वेच्छयैव श्रुतिवाक्येष्वनेकार्थकत्वं कल्पयतस्तदर्थं शब्दानां यावन्तोऽर्था योगरूढ्यादिभिः संभवन्ति तावदर्थपरत्वमौत्सर्गिकं, पौरुषेयवाक्येषु वक्तृविवक्षावशादेकार्थनियतत्वमित्यभ्युपगच्छतस्तव वसन्तादिवाक्येष्विव सर्वेष्वपि ब्रह्मवाक्येष्वन्यथापदविभागैर्योगरूढ्यादिभिश्चानेकार्थत्वप्रतीतिः संभवत्येवेत्यनिवार्यमनेकस्रष्टृपरत्वमित्यर्थः ॥ ४५ ॥

टि०–१ अनेकार्थत्वेनेति । ननु प्रमाणवशेन क्वचिदनेकार्थत्वे सर्वत्र तथात्वापादनं न युक्तम् । मानवशेनानेकार्थत्वस्य " ज्योतिरुपक्रमात् " (ब्र० सू० १ । ४ । ९) इत्यत्र सर्वतान्त्रिकैरभ्युपगतत्वादिति चेन्न । श्रुतीनामनेकार्थत्वेऽभियुक्तसंमतस्य कस्यापि प्रमाणस्यानुपलब्धेः । प्रत्युतार्थभेदे वाक्यभेदस्यैव दोषस्य जागरूकत्वात् । ज्योतिराद्यधिकरणे मानाधीनानेकार्थत्वस्य सर्वतान्त्रिकसंमत्युक्तेर्विस्मरणमूलत्वात् । सृष्ट्यादिवाक्यानामनेकार्थत्वाभावस्याद्वैतिमते संभवेऽपि द्वैतिनां शैववैष्णवानामसंभवात् । तेषां मते नियम्यनियामकभावस्वातन्त्र्यास्वातन्त्र्यव्यवस्थाभावेन सृष्ट्याद्यप्रतिहतेरवश्यंभावात् । हरेरन्येषां कर्तृत्वविरोधिपारतन्त्र्योक्तेर्ब्राह्मशैवश्रुतिस्मृतिपुराणाद्यनवगाहनमूलत्वेनातीव हेयत्वात् । किंच द्वैतिनां शैववैष्णववादीनां यावच्चन्द्रदिवाकरं कलहस्यापरिहार्यतया तैरपि श्रीमच्छंकरभगवत्पादीयमद्वैतमतमेव शरणीकर्तव्यमिति रहस्यम् ॥ ४४ ॥ ४५ ॥

सृष्ट्यादिश्रवणैर्विशेषवचनान्नारायणैकान्तिभिः ।
स्पृश्या नेतरदेवता इति वचस्त्वेकार्थवादोचितम् ॥
तस्मात्तत्परता भवेत्तव परं नान्यार्थधीवारणं
स्रष्टॄणां च विमुक्तवत्तव मते नाऽऽशङ्क्यमीर्ष्यादिकम् ॥४६॥

व्या०— ननु " सदेव सौम्येदमग्र आसीत् " (छा० ६ । २ । १) " ब्रह्म वा इदमग्र आसीत् " (बृ० १ । ४ । १०) " आत्मा वा इदमेक एवाग्र आसीत् " (ऐ० उ० १ । १) इत्यादिसृष्टिवाक्यगतानां सत् ब्रह्म आत्मादिपदानां " एको ह वै नारायण आसीत् " (महा० १) इत्यादिविशेषवचनबलेन विष्णवेकनिष्ठत्वमिति नानेकस्रष्टृत्वपरत्वं प्रसज्यत इत्याशङ्कां निराचष्टे—सृष्ट्यादीति । इयं शङ्का श्रुतीनामेकार्थवादिनः शोभते । सृष्टिवाक्यानां विशेषबलान्नारायणपरत्वावश्यंभावे सत्यर्थान्तराणामवकाशाभावेन निरासात् । तव तु श्रुतीनामनेकार्थपरत्वसंभवं मन्वानस्य सृष्टिवाक्यानां नारायणपराणां सतामन्यपरत्वमपि संभवतीत्यबाधेन तेभ्यस्तद्धीरुदीयमाना दुर्वारा । नन्वन्यत्र श्रुतिवाक्यानामनेकार्थत्वसंभवेऽपि सृष्टिवाक्यानां नानेकस्रष्टृपरत्वं संभवति । स्रष्टृबाहुल्ये कदाचित्तेषां परस्परमीर्ष्यादिना वैमत्येन प्रपञ्चसृष्टिनिवृत्तिप्रसङ्गादिति चेन्न । त्वन्मते मुक्तानामिव स्रष्टॄणामपि निर्दोषतयेर्ष्याद्यनुदयोपपत्तेः । इत्थं हि तव मतं—सायुज्यमुक्तिभाजो देवाः स्वोत्तमं देवतानुप्रवेशक्रमेणैव भगवद्देहमनुप्रविश्य ग्रहावेशन्यायेन भगवद्देहेन्द्रियैस्तद्भुक्तानेव भोगान्कदाचिद्बहिर्निर्गत्याऽऽत्मस्वरूपाभिन्नैश्चिन्मात्रदेहेन्द्रियैः स्वसंकल्पोपनतांश्च भोगान्भुञ्जाना आनन्दवल्ल्यामुक्तक्रमेण स्वरूपानन्दे ज्ञानैश्वर्यभोगेषु चोत्तरोत्तरं शतगुणोत्कृष्टाः पूर्वदेवमुक्तावपि यथास्वं ब्रह्मेन्द्रवरुणचन्द्रसूर्यादितत्तदाधिकारिकदेवतापदं तदनुसारिणमुत्तमाधमभावं पूज्यपूजकत्वादिव्यवस्थां चानुभवन्तो विहरन्ति । न चैवं मुक्तानां तारतम्यवत्त्वे देवव्यतिरिक्तास्तु सालोक्यादिमुक्तिभाजो यथाधिकारं भूरादिषु सप्तसु भगवल्लोकेषु च स्थितानि भगवतः स्थानानि प्राप्य स्वेच्छागृहीतबाह्यदेहैश्चिन्मात्रदेहैर्वा स्वसंकल्पोपनतान् भोगान्भुञ्जानाः पूर्ववद्वर्णाश्रमादिभेदं तदनुसारिणीं पूज्यपूजकत्वादिव्यवस्थां ज्ञानानन्दैश्वर्यभोगतारतम्यं

टि०— १ वादिन इति । अद्वैतिन इति शेषः । तन्मते तत्पदार्थप्रसिद्ध्यर्थं श्रुत्यादिषु जगत्कारणत्वं ब्रह्मणोऽध्यारोपापवादाय निरूपितम् । तद्विशिष्टस्य तत्पदवाच्यस्य लक्ष्यस्य चाभेदेन श्रुतीनामेकस्रष्टृपरत्वं संभवतीति भावः ॥ ४६ ॥

स्रष्टुं प्रत्येकमीशाः सकलमपि परब्रह्मभूतास्त्रयश्चे-
त्संभूयैते सृजेयुः किमिति भजति ते नात्र शङ्कावकाशम् ।
स्रष्टुं शक्तो विनैव स्वयमुपकरणैरच्युतस्तद्व्यपेक्षा
सृष्टौ लीलाऽस्य दण्डग्रहणमिव गतौ जाङ्घिकस्येतिगन्तुः ॥४७॥

व्या०—च प्राप्ता विहरन्ति। न चैवं मुक्तानां तारतम्यवत्त्वे तद्दर्शनकृतदुःखद्वेषेर्ष्यादिभिर्मुक्तेरपुरुषार्थत्वप्रसङ्गः । निर्दोषाणां तेषां गुरुशिष्यवत्तदप्रसक्तेः ' इति । यदैवं स्वाधिकज्ञानानन्दभोगैश्वर्यवतः पश्यतां स्वयं तत्सेवकत्वादिना ततो निकर्षमनुभवतामपि दुःखेर्ष्याद्यभावस्तदा किमु वक्तव्यं नित्यनिर्धुतनिखिलदोषसकलकल्याणगुणाकरपरब्रह्मरूपाणामवाप्तसकलकामानां स्वाधिकानन्दादिकं क्वचिदप्यपश्यतां कुतोऽपि निकर्षमननुभवतामीश्वराणामीर्ष्यादिना वैमत्यं न संभववीति । यदि चेर्ष्यादीनामन्तःकरणधर्मत्वान्मुक्तानामन्तःकरणाभावात्तदभावः समर्थ्यते, तदेश्वराणामपि तथाभूतान्तःकरणवत्त्वमनङ्गीकृत्यैव तदभावः समर्थ्यतामिति भावः ॥ ४६ ॥

ननु यदि सृष्टिवाक्यप्रतिपाद्यपरब्रह्मरूपजगत्कर्तारो बहवस्तदा तेषां “पराऽस्य शक्तिर्विविधैव श्रूयते ” (श्वे० ६ । ८) इत्यादिश्रुतिबलात्प्रत्येकमचिन्त्यापरिमितशक्तिमत्त्वमङ्गीकरणीयमित्यन्योन्यानपेक्षया निखिलजगत्स्रष्टुं शक्तानां तेषां संभूयस्रष्टृत्वकल्पनमयुक्तम् । लोके प्राकारगोपुरादिषु शिल्पिनां संभूयकारित्वस्य प्रत्येकाशक्तिनिबन्धकत्वात् । अतः सृष्टिवाक्यानामेकस्मिन्नेव स्रष्टृत्वपर्यवसानावश्यंभावे विशेषवचनबलान्नारायणे पर्यवसानं स्यादित्याशङ्क्याऽऽह—स्रष्टुमिति ।

इयमाशङ्कैव तव भवितुं नार्हत्येव । त्वयेश्वरस्य जगत्सृष्टौ नियमेन प्रकृत्यादिकमुपादानत्वेनैव कालादिकं निमित्तत्वेनैवापेक्ष्यैव प्रकृत्यैव महान्तं महतैवाहं-

टि०— १ परब्रह्मभूता इति । निर्विशेषचैतन्यमेकमेवोद्भूतसत्त्वगुणमायावच्छिन्नं पालयितृ विष्णुरिति व्यपदिश्यते । तदेवाऽऽविर्भूतरजोगुणमायाक्रान्तं स्रष्टृ ब्रह्मेति गीयते । अतिरोहिततमोगुणमायावच्छिन्नं संहर्तृ चैतन्यं शिवशब्दवाच्यतां भजति । “ अथ यो ह खलु वावास्य राजसोंऽशोऽसौ स योऽयं ब्रह्मा । अथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुः । अथ यो ह खलु वावास्य तामसोंऽशोऽसौ स योऽयं रुद्रः” (मै० उ० ५.२) इति मैत्रेयोपनिषदि तथाऽवगतेः । तथा च ब्रह्मादीनां मायावच्छिन्नत्वलक्षणपरमेश्वरत्वेनैक्येऽपि तत्तद्गुणविशिष्टमायाया भिन्नत्वेन तद्गुणाधिभेदेन तेषां परस्परं भेदो युज्यत इत्यन्तरार्थः ॥ ४७ ॥

कर्त्रेकत्वं वदन्ती कलयतु फणितिर्वारणेनार्थवत्ता
एकैकस्यैव कर्तुर्बहुभवनमुखानीतभेदप्रसक्तेः ।
येन त्वं नेह नानाप्रभृतिमुपनिषद्भारतीं विप्रलब्धुं
निर्द्वैतब्रह्मचौर्यव्यसनमनुभवन्नीहसे साहसेन ॥ ४८ ॥

व्या०—कारमित्यादिक्रमनियमं चापेक्ष्य सृजतः किं नाम स्वातन्त्र्यं, तदपेक्षणस्य शक्त्यभावनिबन्धत्वात्स्वातन्त्र्ये च सति प्रकृत्यादिकमनपेक्ष्य तन्निमित्तोपादानकार्यक्रमादिकं वा व्यत्यस्य सृष्टिप्रसङ्गादित्याशङ्क्य साधनान्तरतद्व्यवस्थातत्क्रमनियमापेक्षणेऽपि निरङ्कुशमेव तस्य स्वातन्त्र्यं, तदपेक्षणस्य शक्त्यभावनिबन्धनत्वाभावात् । स्वयमेव गन्तुं शक्तस्यापि गमनसमये लीलया दण्डावष्टम्भवत्स्वेच्छामात्रनिबन्धनत्वादित्यारम्भणाधिकरणादिषु परिहृततया तन्न्यायेन प्रत्येकमखिलजगत्सृष्टिशक्ता अपि परमेश्वराः केवलं लीलया संभूय जगत्सृजन्तीति वक्तुं शक्यत्वादिति भावः ॥ ४७ ॥

ननु " द्यावाभूमी जनयन्देव एकः " (श्वे० ३.३) इत्यादिकर्त्रैक्यश्रुतिविरुद्धं सृष्टिवाक्यानामनेककर्तृपरत्वकल्पनमित्याशङ्क्याऽऽह—कर्त्रेकत्वमिति । कर्त्रैक्यश्रुतिर्ब्रह्मविष्णुरुद्राणां मध्य एकैकस्यैव कर्तुः " तदैक्षत । बहु स्यां प्रजायेयेति " (छा० ६ । २ । ३) इत्यादिषु श्रुतबहुभवनमुखैरुपस्थापिताया भेदप्रसक्तेर्निवारणेनार्थवती स्यात् । एवमेव हि त्वया निष्प्रपञ्चब्रह्मापलापव्यसनिना " नेह नानाऽस्ति किंचन " (क० ४.११) " एकधैवानुद्रष्टव्यम् " (......) इत्यादिश्रुतीनां विष्णोरन्नमयादिरूपाणि शिरःपक्षपुच्छाद्यवयवा ज्ञानानन्दादयो गुणाः सृष्टिसंहाररक्षणादिक्रियाः सर्वगतत्वादयो भावरूपधर्मा अदृश्यत्वादयश्चाभावरूपधर्मा विष्णोः सकाशात्परस्परस्माच्च भिद्यन्त इति शङ्कावारणेनार्थवत्ता दर्शितेति भावः ॥ ४८ ॥

टि०— कर्त्रैक्यश्रुतिरिति । सा हि सांख्यमते कारणीभूताया मृदो घटशरावामत्रादिबहुरूपभवनेन नानात्वाभ्युपगमवत् । शैववैष्णवादिमतेऽपि कारणस्य तथात्वापत्त्या तद्वारणेन गतार्था कर्तृनानात्वाविरोधिनीति भावः । एतेन " एकमेवाद्वितीयं, जनिता, एक एव " इत्यादिसावधारणश्रुत्युक्तकारणैकत्वस्य स्वाश्रयप्रतियोगिकभेदासामानाधिकरण्यरूपतया तद्विरोधेनानेककर्तृसिद्धेरवायोगेनैकैकस्यानेकभवनशङ्कानुदयः । " नेह नानाऽस्ति " इत्यादौ न्यायामृताद्युक्तरीत्या गुणकर्मादिभेदस्य प्राकरणिकप्रसक्तिवत् " एको दाधार " इत्यादावेकैकस्य बहुभवनप्रसक्तेरभावाच्च । कर्तुर्बहुभवनस्य " यदेकमव्यक्तमनन्तरूपम् " इति श्रुत्युक्तत्वेन तन्निरासायोगाच्च । " न ब्रह्मा न च शंकरः " अन्येऽल्पस्य वा न वा " इति

यो यस्योपास्तियोग्यः स्फुरति नियमतस्तस्य कर्ता स एवे-
त्यर्थं तं तावदैक्यश्रुतिरनुवदतु श्रोतृधीभेदभिन्नम् ।
क्लृप्तो यस्याल्पभूयो निखिलगुणपरोपास्तियोग्यत्वभाजा-
मात्मेत्येवेत्युपासाविधिरवधृतिमानित्थमर्थं ब्रुवाणः ॥४९॥

व्या०—प्रकारान्तरेणापि कर्त्रैक्यश्रुतिनिर्वाहः संभवतीत्याह—य इति। ईश्वराणां मध्ये यदुपासने यस्य पुरुषस्यानादियोग्यता स एव जगत्स्रष्टा नान्य इति तस्य स्फुरतीति तत्तदधिकारिबुद्धिविषयं तमेवार्थं तस्य तस्याधिकारिणः श्रवणकर्तुर्बुद्धिभेदेन भिन्नभिन्नं कर्त्रैक्यश्रुतिरनुवदतीत्येवं वा निर्वाहोऽस्तु। न च श्रुतीनामनेकार्थत्वसंप्रतिपत्तावपि श्रोतृभेदेन भिन्नाभिन्नार्थबोधकत्वं न संप्रतिपन्नामिति वाच्यम्। "आत्मेत्येवोपासीत"(बृ० १।४।२) इत्येव विधौ तव तत्संप्रतिपत्तेः। इत्थं हि तव मतं—ब्रह्मोपासनायामधिकारिणस्तावदुपास्यगुणभेदेन त्रिविधाः-सत्यज्ञानादिभिरल्पैर्गुणैर्मर्त्याः। संभूतिद्युव्याप्त्यादिभिर्भूयोभिर्गुणैरिन्द्रादिदेवताः। अखिलैर्गुणैश्चतुर्मुखादयः। देवेषु मर्त्येषु च स्वस्वभाविमुक्त्यर्थोपासनीयगुणविशेषोपसंहारानुपसंहाराभ्यां गुणभूयस्त्वाल्पत्वावान्तरभेदैः सन्ति बहवोऽधिकारिणः। सर्वान्प्रति तत्तद्योग्यगुणविशिष्टब्रह्मोपासनाभेदानां विधायकम् "आत्मेत्येवोपासीत" इति वाक्यम्। तत्तद्देवेषु मर्त्येषु च यस्य यावद्गुणोपासने योग्यता तं प्रति तावद्गुणविशिष्टं ब्रह्माऽऽत्मशब्दोऽभिधत्ते। एवकारस्तदयोग्यगुणव्यवच्छेदकः। चतुर्मुखादीन्प्रति सकलगुणविशिष्टं ब्रह्माभिधत्ते। एवकारस्तदयोग्यव्यवच्छेदक इति।

स्यादेतत्—युक्तमुपासनाविधिवाक्यस्य पुरुषभेदेन विरुद्धानेकार्थप्रतिपादकत्वं, न तु वस्तुपरवाक्यस्य। उपासनावाक्यस्य तत्तत्पुरुषं प्रति तत्तद्योग्यगुणविशि-

टि०—विशिष्य कर्त्रन्तरनिषेधाच्चेति" परास्तम्। "पशुना यजेतेत्यादौ" एकत्वस्य स्वसजातीयद्वितीयराहित्यस्य मीमांसकनैयायिकाऽङ्गीकृतत्वेन भवदुक्तनिर्वचनस्यासंप्रतिपन्नत्वात्। प्रत्युताऽऽत्माश्रयदोषग्रासाच्च। उपादानस्यैकस्य बहुभवनस्य "बहु स्यां प्रजायेय" इति श्रुतिसिद्धत्वेन नानात्वप्रसक्तेरुक्तत्वात्। कर्त्रनेकत्वाभ्युपगमे तव मूलोच्छेदाच्च। "न ब्रह्मा न च शंकरः" इत्यादेः परमात्मविभूतिरूपब्रह्मशंकरपरत्वात्। अभिन्ननिमित्तोपादानस्य वैदिकस्याभ्युपगमे दोषगन्धाभावेनैकत्वश्रुतिसामञ्जस्येन चागत्या त्वया तस्यैव शरणीकरणीयत्वादिति दिक् ॥ ४८ ॥

१ उपासीतेति—नन्वात्मनि तत्तद्योग्यगुणानामिव स्रष्टृनानात्वस्यानभ्युपगमेन तत्संप्रतिपन्नत्वोक्तिरयुक्ता। तत्तदीयानादिमिथ्याज्ञानवासनया तवैवान्येषामपि शिवादिषु स्रष्टृत्वप्रतीतावपि तस्या अनेकमानविरोधेन भ्रान्तित्वमवश्यं कल्पनीयमिति चेन्न। त्वयैवाऽऽत्मनि "यत्रैकमव्यक्तमनन्तरूपम्" इत्यादिश्रुत्युदाहरणेन कर्तृनानात्वस्य समर्थितत्वादिदानीं

पूर्णत्वं ते निमित्तं निरवधिगणनं भूमशब्दस्य वृत्तौ
वैकुण्ठे तद्गुणानां तदपि किल ततस्तारतम्येन वेद्यम् ।
इत्थं वस्तुस्वभावं क्वचिदविगणयन्बोध्यधीवृत्तिभेदा-
द्भेदः स्यादस्तिवादी यदि तव भवति व्यासकः काऽत्र चिन्ता॥५०॥

व्या०—इष्टमेव ब्रह्मोपासनीयं नायोग्यगुणविशिष्टमिति बोधकत्वे हि न प्रामाण्यं हीयते। हीयते तु " सदेव सौम्येदम् " (छा० ६।२।१) इति वस्तुपरवाक्यस्य तत्तत्पुरुषं प्रति शिव एव जगत्कर्ता नान्य इत्यादिबोधकत्वे पुरुषभेदेनानुष्ठान-बद्वस्तुस्वरूपस्य भेदासंभवादिति—चेन्मैवम् । त्वया पुराणेषु रामकृष्णाद्यवतार-रूपाणां भेदश्रवणं लौकिकैर्भ्रान्त्या गृहीतस्य भेदस्यानुवादकमिति " सर्वथाऽपि त एवोभयलिङ्गात् " (ब्र० सू० ३ । ४ । ३१) इत्यधिकरणेऽनुव्याख्यान-न्यायसुधयोरुक्तत्वेन तथैव कर्त्रैक्यश्रुतेरप्यनुवादकत्वोपपत्तेः । न च वाच्यम-वतारेषु तत्कालवर्तिनां लौकिकानां केषांचिद्भेददृष्टिः संभवति । अन्येषां च बहुत्वादिलिङ्गकानुमानाभासेनेति युक्तस्तस्यानुवादो न तु जगत्कर्त्रैक्यस्य तस्य श्रुतिं विना लोकतः प्रत्येतुमशक्यत्वादिति " त्वया पुरुषाणां योग्यता-वन्माहात्म्यज्ञानपूर्वकस्नेहरूपा भक्तिरप्यनादिरिति " स्थानविशेषात्प्रकाशा-दिवत् " (ब्र० सू० ३ । २ । ३५) " अनुबन्धादिभ्यः " (ब्र० सू० ३ । ३ । ५१) इत्यधिकरणयोरुक्तत्वेन शिवादिभक्तान्तर्गतस्य शिव एव जगत्कर्ता नान्य इत्यादिरूपेण तत्तन्माहात्म्यज्ञानस्याप्यनादित्वसंभवात् । त्वया सर्वेषां मतानामनादित्वस्योक्ततया तत्तन्मताभिमतमाहात्म्यज्ञानपरम्परानादित्व-संभवाच्चेति भावः ॥ ४९ ॥

परसंप्रतिपन्नश्रुत्युदाहरणेनापि कर्त्रैक्यश्रुतेरसदर्थबोधकत्वं संभवतीत्याह—पूर्ण-त्वमिति । " यो वै भूमा तत्सुखम् " (छा० ७ । २३ । १) इति श्रुतौ भूम-

टि०—तत्प्रतिक्षेपे मदिरान्धतापत्तेः । शिवादिषु कर्तृत्वे शैवादिभिर्मानान्तराविरोधस्य स्पष्टं तत्र तत्र व्यवस्थापिततया तत्र कारणत्वप्रतीतेर्भ्रान्तित्वकल्पनायोगाच्च । न च वस्तुन एक-रूपतया तस्य नानात्वबोधने श्रुतेर्भ्रामकत्वेनाप्रामाण्यापात इति वाच्यम् । श्रुतेरेकार्थपर-त्वानियमस्य त्वयैव निरासात् । तत्प्रकारस्तु मूल एव स्पष्टः । तस्माच्छ्रुतेरैकार्थ्यनिर्वाहायाद्वै-तमतमेव प्रविश्य स्थेयमिति यत्किंचिदेतत् ॥ ४९ ॥

१ भूमशब्द इति—अत्र दीक्षितपञ्चास्यदर्शनेन कश्चिद्रौति—" सम्यक्तव मूर्धानम-ध्यारोहदुन्मादः । यदविद्यमानान्यप्रामाण्यकराणि पूर्वोत्तरानुसंधानहीनान्येव बहुलमभा-षथाः । सातिशयं निरतिशयत्वेन भूमादिशब्दो वक्तीत्यस्यैवासत्त्वादिति "—तत्तु तस्य स्वग्रन्थपौर्वापर्याद्यविदुषः स्वमुखदोषमजानतः पुरुषस्य दर्पणचूर्णीकरणकृत्यमनुकरोति ।

व्या०—शब्दस्तवापि ब्रह्मपरः। तत्रायं तव मते विशेषः—"बहोर्लोपो भू च बहोः" (पा० सू० ६ । ४ । १५८) इति भावे निष्पन्नोऽपि भूमशब्दः " यो वै भूमा तदमृतम् " (छा० ७ । २४ । १) इत्यादिषु धर्मिण्येव प्रयोगाद्धर्मिणि रूढः । तस्य च परब्रह्मणि धर्मिणि वैकुण्ठे प्रवृत्तौ निमित्तमवधिविशेषगणनानिरपेक्षं पूर्णत्वं, न त्वस्मादेवायं पूर्ण इति प्रतियोगिविशेषापेक्षम् । प्रकरणोपपदादितत्संकोचकाभावात् । नामवागाद्युत्तरोत्तरोत्कृष्टनिरूपणचरमकक्ष्यापन्नत्वात् । " नाल्पेषु सुखमस्ति " (छा० ७ । २३ । १) इति निरुपपदेनाल्पपदेन सर्वस्याल्पस्य प्रतियोगित्वेन निर्देशाच्च । तत्तु निरवधिकं पूर्णत्वं न धर्मिण एव परममहत्त्वरूपं, किंतु तद्गुणानामानन्दादीनां निरतिशयत्वरूपम् । " वाग्वाव नाम्नो भूयसी " (छा० ७ । २ । १) इत्यादौ वैपुल्यरहितेषु वाक्संकल्पध्यानादिष्वपि तत्तत्प्रकरणे भूमशब्दसमानार्थभूयःशब्ददर्शनेनात्रापि तदैकरूप्याय गुणतो वैपुल्यस्यैव तदर्थतौचित्यात् । तच्च पूर्णत्वं सर्वेषामधिकारिणामनेकप्रकारेण श्रवणमननध्यानसाक्षात्कारेषु प्रतीयते, किंतु तत्तद्योग्यतानुसारेण । न च पूर्णत्वे तारतम्यासंभवः । आनन्त्य इव तदुपपत्तेः । अस्ति हि पूर्वोत्तरकल्पापेक्षतयाऽतीतक्षणेषु सतोरानन्त्ययोस्तारतम्यमिति "। तदेतत्सर्वं " भूमा संप्रसादादध्युपदेशात् " (ब्र० सू० १ । ३ । ८ । " भूम्नः क्रतुवज्ज्यायस्त्वम् " (ब्र० सू० ३ । ३ । ५९) " ब्रह्मदृष्टिरुत्कर्षात् " (ब्र० सू० ४ । १ । ५) " नानाशब्दादिभेदात् " (ब्र० सू० ३ । ३ । ६०) इति त्वदीयाधिकरणेषु स्पष्टम् । तत्रेदमुच्यते—इयत्तापरिच्छेदराहित्यमात्ररूपे संभवति तारतम्ये समासेन तु निरतिशयत्वसर्वोत्तमत्वसर्वोत्कृष्टत्वापरपर्यायतया तेष्वधिकरणेषु त्वयोद्घोषिते भूमब्रह्मशब्दयोः प्रवृत्तिनिमित्ततया त्वदभिमते ब्रह्मानन्दादीनां पूर्णत्वे निरतिशयत्वादिस्वरूपव्याघातात् । न हि ये तारतम्यशालिनस्ते निरतिशयाः सर्वोत्तमा इति च युज्यते । तेषु यस्य यदपेक्षया निष्कर्षस्तस्य तेन सातिशयत्वस्योत्तमत्वस्य चावर्जनीयत्वात् ।

यद्युच्येत—परमेश्वरस्याचिन्त्यशक्तिमहिम्ना तदानन्दादिविशेषाणां परस्परतारतम्यवतामपि निरतिशयत्वादि संभवतीति । तदा परमेश्वराणामचिन्त्यशक्तिमहिम्ना परस्परभिन्नानामप्येकत्वं संभवतीति किमिति वक्तुं न शक्यम् । तस्मात्परब्रह्मानन्दैकदेशान् सातिशयत्वेनाभूम्न एव भूमरूपतया तत्तदधिकारिणं प्रति भूमशब्दः प्रतिपादयतीति त्वया वक्तव्यम् । ननु सातिशयानामपि ब्रह्मानन्दैकदेशानां वागादीनां भूयस्त्ववद्भूमरूपत्वमुपपद्यत एव । भूमशब्दस्य तन्निरति-

किंच स्थाणुविरिञ्चयोरपि जगत्कर्तृत्वमावेदय-
न्नास्त्येव श्रुतिमस्तकेषु बहुधा वैशिषिको गीर्गणः ।
ऐकार्थ्यं सहते स सृष्टिवचसां नैव त्वदीये मते
तत्तन्नामपदप्रसिद्ध्यतिगतौ हेतुश्च नास्त्येव ते ॥ ५१ ॥

व्या०—शयवाचकता त्वशेषब्रह्मानन्ददर्शनयोग्याधिकारिविशेषमपेक्ष्य कल्पत इति चेन्न । त्वन्मते तथाभूताधिकारिण एवासिद्धेः। हिरण्यगर्भपर्यन्ताः सर्वेऽप्यधिकारिणो मुक्त्यनन्तरमपि ब्रह्मानन्दैकदेशस्यैव द्रष्टारः । नित्यमुक्ता श्रीरपि तथैवेति त्वदभिमतमोक्षनिरूपणप्रस्तावेऽनुव्याख्यानन्यायसुधयोरुक्तत्वात् । त्वदीयान्प्रति ब्रह्मानन्दैकदेशबोधकभूमशब्दस्य तन्निरतिशयत्वबोधकत्वाभावे त्वदीयग्रन्थेषु निरतिशयत्वापरपर्यायं भूमत्वमित्यादिव्यवहारायोगाच्च । तस्माद्यस्याधिकारिणो यावद्दर्शनयोग्यता, तं प्रति तावन्तमेव सातिशयं ब्रह्मानन्दैकदेशं निरतिशयतया भूमशब्दः प्रतिपादयतीत्यकामेनापि त्वया स्वीकरणीयम् । तथा च यदि वेदः क्वचिदस्तित्ववादिनं प्रति स्यादस्ति स्यान्नास्तीत्यादिविरुद्धप्रकारान्वदन् क्षपणक इव वञ्चकः स्यात्तदा तद्वदेव सृष्टिवाक्यानामपि शैववैष्णवान्प्रति विरुद्धनानाप्रकारबोधकत्वं संभवतीति तत्र तव विशेषेण का विचिकित्सेति भावः ॥ ५० ॥

एवं नारायणस्यैव स्रष्टृत्वे विशेषवचनानि सन्ति नान्येषामित्यङ्गीकृत्य तथाऽपि परमते विरोधाभावात्सदेवेत्यादिवाक्यान्यनुमानानि तत्तात्पर्याणि शिवविरिञ्चयोरपि स्रष्टृत्वपराणि स्युरित्यापादितम् । तदुपपादनार्थं च परमते सृष्टिवाक्यानामनेकस्रष्टृपरत्वे शब्दतोऽर्थतश्च विरोधाभाव उपपादितः। इदानीं शिवविरिञ्चयोरपि स्रष्टृत्वे विशेषवचनानि सन्तीति सुतरां तानि तत्प्रतिपादकानि स्युरित्याह—किंचेति ।

" यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासञ्छिव एव केवलः । तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी " (श्वे० ४ । १८) " प्रजापतिर्वा इदमेक आसीत् " (तै० सं० २ । १ । ४) " नाहरासीन्न रात्रिरासीत् । सोऽन्धे तमसि प्रासर्पत् (.........) इत्यादीनि शिवविरिञ्चयोरपि जगन्मूलकर्तृत्वमावेदयन्ति सन्त्येव विशेषवचनानि । न च तेषु स्थितानि शिवप्रजापत्यादिपदानि प्रसिद्धस्वस्वार्थादपनीय नारायण एव स्थापयितुं तत्तन्नामपदानामन्यत्र योगसंभवादिविचारस्तव युज्यते । त्वन्मते सृष्टिवाक्यानामने-

---

टि०—" भूमा संप्रसादात् " (ब्र० सू० १ । ३ । ८) " स्थानविशेषात " (ब्र० सू० ३।२। ३५) " अनुबन्धादिभ्यः " (ब्र० सू० ३ । ३ । ५१) इत्याद्यधिकरणेषु तद्भाष्यानुव्याख्यानादिषु स्पष्टं तस्यार्थस्य निरूपितत्वादित्यलमसंभाव्यसंभाषणेन ॥ ५० ॥

व्या०—कपरत्वस्याविरुद्धतया प्रसिद्ध्यतिक्रमायोगात्। विरुद्धे खलु तेषामनेकस्रष्टृपरत्वे तत्तत्सृष्टिवाक्यस्थस्रष्टृप्रतिपादकानां पदानामेकस्रष्टृपरत्वावश्यंभावेन सावकाशनिरवकाशविचारः प्रवर्तनीयः स्यात् । तस्मात्त्वन्मते सृष्टिवाक्यानामनुमानविशेषवचनानुसारेणानेकस्रष्टृपरत्वमवश्यं भवेदेवेति न पूर्वपक्षोपन्यस्तानुमानदूषणं युक्तमिति भावः ॥ ५१ ॥

टि०— १ प्रसिद्ध्यतिक्रमायोगादिति—शब्दसामान्यस्यानेकार्थत्वं वदतस्तव मते वेदवाक्यस्यानेकार्थत्ववर्णनं न विरोधावहमिति भावः । अत्र कश्चिन्मुह्यति—"शास्त्रयोनित्वात्" इति सूत्रस्य शास्त्रं योनिर्ज्ञप्तिकारणं प्रमाणं शास्त्रयोनि । तत्त्वादित्येवार्थः । न तु भगवत्पादभाष्योक्तं शास्त्रस्य योनिरिति । जन्माद्यधिकरण एव सकलप्रपञ्चस्रष्टृत्वस्य ब्रह्मणि सिद्धत्वेनास्मिन्नधिकरणे पुनरतदुक्तिवैयर्थ्यात् । न च जगत्कारणत्वोक्त्याऽर्थलब्धं सार्वज्ञ्यमेव शास्त्रयोनित्वोक्त्या स्फोरयतीति वाच्यम् । तत्रार्थलब्धसर्वशक्त्याद्यस्फुटीकृत्य सार्वज्ञ्यमात्रस्फुटीकरणे विशेषकारणाभावात् । अनन्तजगन्निर्माणोक्त्याऽस्फुटीभूतं सार्वज्ञ्यं तदेकदेशनिर्माणोक्त्या कथमाविर्भवेत " इति । स तु वक्ष्यमाणरीत्या चिकित्सयितव्यः । सार्वज्ञ्यस्फुटीकरणास्फुटीकरणोक्तेरनुक्तोपालम्भात । अस्मद्भाष्ये " तदेव सार्वज्ञ्यं द्रढयन्नाह ' इत्येवोक्तत्वात । दार्ढ्यं च पूर्वसूत्रसिद्धसार्वज्ञ्यस्य "वाचा विरूपनित्यया" [तै० सं० २।६।११।१] इति श्रुत्या वेदनित्यत्वप्रतिपादनेन तत्कर्तृत्वाभावे ब्रह्मणोऽसंभवादित्याक्षेपनिरास एव । स च वेदकर्तृत्वसाधनेनैवेति तदर्थमुत्तरसूत्रप्रवृत्तिः । "शास्त्रं योनिः" इत्यस्यार्थस्य भाष्ये द्वितीयार्थत्वेन संभवदुक्तिकतयाऽङ्गीकृतत्वात् । द्वितीयार्थस्यैव विवक्षायां " शास्त्रादित्येव " सूत्रयितव्यत्वात् । पञ्चम्या ज्ञानज्ञाप्यत्वार्थत्वेन द्वितीयार्थलाभसंभवात् । तथा लघुन्यासं परित्यज्य " शास्त्रयोनित्वात् " इति सूत्रयितुर्बादरायणस्य प्राथमिकार्थ एवाभिप्रेत इति प्रतीतेः । सार्वज्ञ्यवत्सर्वशक्तित्वस्य सूत्रसूचितस्य भाष्यकृद्भिः " निःश्वासित " श्रुत्युदाहरणेन दर्शितत्वात् । " अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः (बृ० २।४।१०] इत्युपक्रम्य " अयं च लोकः परश्च लोकः सर्वाणि भूतानि निःश्वासितानि " इति नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य निःश्वसितवद्प्रयत्नसाध्यब्रह्मकार्यत्वोक्तेः । एतेन—किंचेदं शास्त्रस्येश्वरनिर्मितत्वमर्थमुपलभ्य रचितत्वं वा निःसृतत्वमात्रं वा । नाद्यः । कणादचरणानुसरणप्रसङ्गात् । श्रुत्यादिविरोधाच्च । न द्वितीयः शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गादिति—निरस्तम् । अर्थज्ञानसमकाल एव शब्दोच्चारणस्यैव वेदकर्तृत्वेन विवक्षितत्वात् । अन्यथा भवतोऽपि कणादचरणपङ्कजलेऽद्रत्वप्रसङ्गात् । तस्मात्सूत्रस्योक्त एवार्थ इति संक्षेपः ॥ ५१ ॥.

इति शास्त्रयोनित्वाधिकरणदूषणम् ॥

इत्यप्पदीक्षितकृतौ कृतिनां मतेऽस्मि-
न्नानन्दतीर्थकृतशास्त्रमुखापमर्दे ।
एतत्तृतीयमधिकृत्य नयं प्रवृत्तं
दोषप्रदर्शनमुपस्करणीयमार्यैः ॥ ५२ ॥

इति शास्त्रयोनित्वाधिकरणदूषणप्रकरणम् ॥

रोद्धा नोपक्रमादिः श्रुतिषु नयगणस्त्वन्मतेऽर्थान्तराणां
रोद्धा चेत्कर्मकाण्डे कथमपि न भवेद्ब्रह्मनिष्ठा पदानाम् ।
किंचात्रोपक्रमादावपि तव विसरेद्भूमशब्दस्य रीति-
स्तस्मात्सर्वस्तमेव श्रयति नयगणं स्वस्वसिद्धान्तसिद्ध्यै ॥५३॥

व्या०— अथ समन्वयाधिकरणदूषणप्रकरणम् ।

स्यादेतत्—यदुक्तं विशेषवचनानुसारेण शिवविरिञ्चयोरपि सृष्टिवाक्यानि पर्यवस्यन्तीति । तन्न युक्तम् । समन्वयसूत्रेण तदाशङ्कानिराकरणात् । तत्र हि वेदेऽपि क्वचिदपि पशुपतिहिरण्यगर्भादीनां सम्यग्जगत्कर्तृत्वं प्रतीयत इति पूर्वाधिकरणाक्षेपे सम्यग्विचारितादुपक्रमादितात्पर्यलिङ्गरूपादन्वयाद्विष्णुरेव जगत्कर्तृतया वेदे प्रतिपाद्यत इत्यतोऽन्यथाप्रतीतिरज्ञानमूलेति स्थापितमित्याशङ्कां निराचष्टे—रोद्धेति ।

यद्यप्युपक्रमादयो विष्णौ व्यवस्थिताः स्युस्तथाऽपि ते श्रुतीनां विष्णुपरत्वावगमनमेव कुर्युः, न तु शिवविरिञ्चिपरतानिवारणमपि । अनेकार्थसहिष्णोस्तव मते विरोधाभावेन शिवविरिञ्चिपरत्वस्यापि संभवात् । न हि प्रबलं प्रबलमित्येव दुर्बलस्य बाधकम्, अपि तु सति विरोधे । यद्युपक्रमादयो विरोधाभावेऽपि स्वानीततात्पर्यादर्थान्तरं स्वभावादेव वारयेयुस्तदा त्वन्मते कर्मकाण्डस्थपदानां ब्रह्मपरता न स्यात् । अभ्युपगतं च त्वया-"श्येनेनाभिचरन्यजेत" इत्यादिवाक्येषु श्येनादिपदानां " यथा वै श्येनो निपत्याऽऽदत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्याऽऽदत्ते " इत्याद्युपसंहारप्राबल्यन्यायैः कर्मनामधेयत्वं प्रापितानामपि वसन्तादिवाक्येषु प्रदर्शितया रीत्या ब्रह्मपरत्वमपि । ननु श्रुतीनां शिवविरिञ्चपरत्वे च तदेकवाक्यतापन्नोपक्रमादीनां विष्णौ व्यवस्थितानामन्वयो न स्यादिति चेन्मा भूत् । विष्णुपरत्व एव तेषामन्वयोऽस्तु । नहि त्वन्मते क्वचिदर्थे

टि०— १ शिवविरिञ्चयोरपीति—तथा ह्यथर्वशिखायां—" कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्ये " [ ] " हिरण्यगर्भः समवर्तताग्रे । भूतस्य जातः पतिरेक आसीत् " [नृ० पू० ता० २ । ४] इत्यादीनि सृष्टिवाक्यानीति ।

व्या०—यावतामेकवाक्यतेति नियमोऽस्ति । श्येनादिपदानां ब्रह्मपरत्वे प्रसिद्धश्येनसादृश्यप्रतिपादकवाक्यशेषे तदभावात् । न च वाक्यशेषस्यापि ब्रह्मपरत्वेन तदेकवाक्यता संभवतीति वाच्यम् । कर्मकाण्डस्थपदानां पदविधयैव ब्रह्मणि समन्वयो न तु वाक्यविधयेति त्वया वाक्यान्वयसूत्रे वर्णितत्वात् । वसन्तादिवाक्यस्थपदानामपि तथैव तत्समन्वयस्य प्रदर्शितत्वाच्च । नन्वेवं सति श्येनवाक्यस्थश्येनपदस्य गुणपरत्वमपि स्यात् । तद्वाक्यशेषस्य कर्मनामधेयत्व एवान्वय

टि०— १ प्रदर्शितत्वाच्चेति—एवं च भवन्मते कममात्रतात्पर्यनिर्णायकान्यपि कर्मकाण्डीयोपक्रमादीनि भङ्क्त्वा कर्मकाण्डानां कर्मब्रह्मोभयपरत्वस्य " ज्योतिरुपक्रमाधिकरणे " [ब्र० सू० १ । ४ । १०] व्यवस्थापनेनोपक्रमादीनां तत्र तत्र तत्तदर्थव्यवस्थापकत्वनैयत्याभावाद्विष्णुपराणामपि सृष्टिवाक्यानां हरविरिञ्चिपरत्वमप्यपरिहार्यमिति भावः । एतेन विष्णूत्कर्ष एव श्रुत्यादीनां महातात्पर्यम् । अन्यथाऽनेकश्रुतिस्मृतियुक्तिविरोध एकवाक्यताभङ्गश्चेति कस्यचित्प्रलपनं परास्तम् । विकल्पासहत्वात् । तात्पर्ये महत्त्वं किमितराविषयकत्वमाहोस्विदवान्तरतात्पर्यसहकृतत्वम् । नाद्यः । विष्णूत्कर्षनिरूपणे प्रवृत्तस्य तव नास्तिकत्वापत्तेः । स्वर्गनरकादिप्रतिपादककर्मकाण्डस्थपदानां स्वर्गाद्यविषयकत्वेन स्वर्गादिसिद्ध्यभावेन परलोकसाधककर्माद्यननुष्ठानापत्तेः । न द्वितीयः । विनिगमकाभावेन विष्णाववान्तरतात्पर्यं शिवविरिञ्चयोस्तु महातात्पर्यमित्यस्यैव सुवचत्वात् । उपक्रमादीनामनिर्णायकत्वस्य पूर्वमेव निरूपितत्वाच्च । न च पाशुपतवैरिञ्च्याद्यागमेषु तयोः कारणत्वप्रतिपादनेऽपि न शास्त्रयोनित्वम् । पाशुपतादीनामयथार्थत्वसंभवात् । प्रतीतेरज्ञानमूलकत्वसंभवाच्चेति वाच्यम् । वैरिञ्चपाशुपतादिप्रदर्शितोपक्रमाद्यपेक्षया त्वत्प्रदर्शितोपक्रमादीनां विशेषानवगमात् । येन विष्णोरेव शास्त्रयोनित्वं प्रतिपाद्येत । किंच ब्रह्मणि गुणानामुपासनार्थमेव त्वयाऽङ्गीकृतत्वेनोपासनस्याज्ञानमूलकत्वेन भवदीयप्रतीतेरप्यज्ञानमूलकत्वापरिहारात् । उपक्रमादितात्पर्यलिङ्गैः सम्यङ्निरूप्यमाणे शिवादेरपि शास्त्रगम्यत्वाच्च । एतेन—"मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम् । इत्यस्य हृदयं साक्षान्नान्यो मद्वेद कश्चन " इति । यच्च—व्याख्यानं कर्मविधात्री श्रुतिरपि मां प्रत्येव तद्विधत्ते । इन्द्राद्यभिधात्री च मामभिधत्ते । चत्वारि वागित्यादिश्रुत्याऽहं विविधरूपत्वेन कल्प्यः । " न सुरां पिबेदित्यादिश्रुत्याऽहमेवाप्रियत्वादपोह्यः । एवंभूताया अस्याः श्रुतेरित्यभिप्रायमहं वेद न मत्तोऽन्य इत्यर्थः " इति च निरस्तम् । उक्तश्लोकस्य स्वमात्रहृदयारूढतयाप्रामाणिकत्वात् । तथ्यनानारूपवतोऽनित्यत्वात्कल्पितनानारूपाभ्युपगमे परमतप्रवेशापत्त्या स्वमतहानिप्रसङ्गाच्चेत्याधिकं सुधियो विभावयन्तु ।

स्फारात्तत्तत्पुराणागमवचनशतप्रापिता याऽन्यनिन्दा
तत्तद्भक्त्यादिसिद्ध्यै स्तवनविरचने सा भवेद्द्वारमात्रम् ।

व्या०-इति वक्तुं शक्यत्वादिति चेत्तदपि दूषणं तव मतेऽस्माभिरापाद्यमेव । अस्माकमनेकार्थत्वानङ्गीकारादेव तन्न प्रसज्यते ।

अपि चोपक्रमादीनां विष्णौ व्यवस्थिततत्वमप्यसिद्धम् । शैवादयोऽपि ह्युपक्रमादीनेवावलम्ब्य श्रुतीनां शिवादिपरत्वं वर्णयन्ति । उपपादयन्ति चोपक्रमादीनां शिवादिविषयत्वं तत्तद्गतपदशक्त्याऽपि प्रदर्शनेन । ननु शैवाः शिव एवोपक्रमादयो न विष्णौ विरिञ्चे वेति वर्णयन्ति । एवं वैष्णवा वैरिञ्चाश्च पक्षप्रतिपक्षेण वदन्ति। न चैतानि मतानि परस्परविरुद्धानि सर्वाण्यपि ग्राह्याणि। अतो बलाबलविचारावश्यंभावाद्बलवद्भिर्न्यायैरुपक्रमादीनां विष्णौ व्यवस्थितत्वसिद्धिरिति चेन्नैवम् । यथा भूमशब्दस्तवाविशेषविशेषसहितब्रह्मानन्दवाचकोऽपि तत्तदधिकारिणं प्रति योग्यतानुसारेण किंचित्किंचिद्ब्रह्मानन्दांशमेव बोधयति, तथा सृष्ट्यादिश्रुतयस्तदुपक्रमादयोऽनेककर्तृपरा अपि तत्तद्योग्यतानुसारेणैकैकमेव कर्तारं बोधयन्ति । श्रुतिवाक्ये हि तेषां कर्त्रन्तरबोधानुत्पादस्तु श्रुतिवाक्यानां कर्त्रन्तरपरत्वाभावाभिमानादित्युपपत्तेः । तस्मादुपक्रमादिबलान्न सृष्टिवाक्यानां विष्णौ [1]व्यवस्थितत्वासिद्धिरिति भावः ॥ ५३ ॥

ननु तत्तन्मतस्थानामभिमानमात्रं कथंचिदुपपद्यतां नाम । शैववैष्णववैरिञ्चपुराणागमेषु शिवादीनां परस्परसृज्यत्वसंहार्यत्वाराधकत्वादिना भूयसी निकर्षोक्तिर्दृश्यमाना सर्वेषां समानकक्ष्यतया जगत्कर्तृत्वेऽनुपपन्ना बलाबलविचारमन्तरेण न व्यवतिष्ठते । तद्विचारे च वैष्णवपुराणागमानां बलवत्त्वात्तदनुसारेणोपक्रमादिसहितानां सृष्टिश्रुत्यादीनां विष्णौ व्यवस्थितत्वं सिध्येदित्याशङ्क्याऽऽह—[2]स्फारादिति ।

टि०- १ व्यवस्थितत्वसिद्धिरिति-ततश्च भवन्मतरीत्याऽधिकरणस्यास्य वैयर्थ्यापत्त्या परमतानुसरणमेव ज्याय इति भावः ॥ ५३ ॥

२ स्फारादिति-प्रथमश्लोके सूचितं नहि निन्दान्यायं स्फुटयति-स चायं न्यायस्त्वयाऽवश्यमभ्युपगन्तव्यः। अन्यथा भवदीयपाञ्चरात्रादीना वैष्णवतन्त्राणां प्रामाण्यं न स्यात् । तथा हि कूर्मपुराणे वैष्णवसंहितायां (अ० १४)-" स तेषां मायया जातं गोवधं गौतमो मुनिः । केनापि हेतुना ज्ञात्वा शशापातीव कोपनः ॥ १ ॥ भविष्यथ त्रयीबाह्या महापातकिभिः समाः । " इति गौतमशापान्प्रकृत्य तेषां शिवकेशवसंनिधौ " सर्वे संप्राप्य देवेशं शंकरं विष्णुमव्ययम् । अस्तुवल्लौकिकैस्तोत्रैरुच्छिष्टा इव सेवकाः " इत्यादिना गतिप्रार्थनायां-ततः पार्श्वे स्थितं विष्णुं संप्रेक्ष्य वृषभध्वजः । यत्किं तेषां भवेत्कार्यं प्राप्यं

व्या०— परस्परनिन्दावचनानि "नहि निन्दा निन्द्यं निन्दितुं प्रवर्ततेऽपि तु स्तुत्यं स्तोतुम्" इति न्यायेनोदितानुदितहोमनिन्दादिषु दृष्टेन तत्तद्देवताविषयनिश्चलभक्तिसिद्धिप्रयोजने स्तुतिविरचने द्वारमात्रत्वेनोपपन्नानि । दृश्यते ह्यापस्तम्बसूत्रे—"अथाप्युदाहरन्ति" इत्यारभ्य "तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च

टि०—पुण्यैषिणां भुवि" इति पृष्टो विष्णुः—"न वेदबाह्ये पुरुषे पुण्यलेशोऽपि शंकर । तस्माद्वा वेदबाह्यानां रक्षणार्थं च पापिनाम् । विमोहनाय शास्त्राणि करिष्यावो वृषध्वज । एवं संबोधितो रुद्रो माधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः । कापालं नाकुलं शाक्तं भैरवं पूर्वपश्चिमम् । पाञ्चरात्रं पाशुपतं तथाऽन्यानि सहस्रशः । सृष्ट्वा तानूचतुर्देवौ कुर्वाणौ शास्त्रचोदितौ ॥ इति । ते तु तत्परिग्रहणानन्तरम्—"शिष्यानध्यापयामासुर्दर्शयित्वा फलानि तु । मोहयन्त इमं लोकमवतीर्य महीतले । बुद्धाश्श्रावकनिर्ग्रन्धाः पाञ्चरात्रविदो जनाः । कापालिकाः पाशुपताः पाषण्डा ये च तद्विदः । यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः । न तस्य तद्भवेच्छ्राद्धं प्रेत्येह च न तत्फलम् । वामाः पाशुपताचारास्तथा वै पाञ्चरात्रकाः । भविष्यन्ति कलौ तस्मिन्ब्राह्मणाः क्षत्त्रियास्तथा" इत्यादि । एवं कूर्मपुराणपर्यालोचनया पाञ्चरात्रादिवैष्णवतन्त्राणां मोहशास्त्रत्वं स्पष्टमेवावगम्यते । तथा स्कान्दे सूतसंहितायां—देवतानां मनुष्याणां न कुर्याल्लाञ्छनं बुधः । न कुर्यान्मोहतो वाऽपि यदि कुर्यात्पतत्यधः । श्रौतस्मार्तसमाचारे नाधिकारीति लाञ्छितः । लाञ्छिताश्च न संभाष्या न स्पृश्याश्च तथैव च । अदर्शनीयांस्तान् राजा देशाच्छीघ्रं प्रवासयेत् ।" इत्यादिना शङ्खचक्रादिदेवतालाञ्छनधारिणां पातित्यं दर्शितम् । त्वयैतत्सर्वं पूर्वोक्तन्यायमवलम्ब्यैव निर्वाह्यम् । तथा च प्रकृतेऽपि तथाऽभ्युपगमे बाधकाभाव इति निष्कर्षः ।

१ दृश्यते हीति—आपस्तम्बो हि स्वयं ब्रह्मनिष्ठोऽपि मुमुक्षूनज्ञान् प्रति कर्मानुष्ठापनार्थं स्वीयकल्पसूत्रे कर्माणि प्ररोचयन्संन्यासं निनिन्द । अयमंशस्तदीयाध्यात्मपटलादवगम्यते । तथा हि—आपस्तम्बधर्मसूत्रेऽष्टमेऽध्यात्मपटले "आध्यात्मिकान्योगाननुतिष्ठेन्न्यायसंहितानैश्चारिकान्" इत्युपक्रम्य तत्र श्लोकोदाहरणं प्रतिज्ञाय "पूः प्राणिनः सर्व एव गुहाशयस्य, अहन्यमानस्य विकल्मषस्य । अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः" इत्यादिना कूटस्थनित्यमात्मस्वरूपं विषयसङ्गविधूननपुरःसरं ध्येयमिति चोक्त्वा महता संदर्भेण विषयसङ्गत्यागे कारणमभिधाय "आत्मन्पश्यन्सर्वभूतानि न मुह्येच्चिन्तयन्कविः । आत्मानं चैव सर्वत्र यः पश्येत्स वै ब्रह्मा नाकपृष्ठे विराजति" इति तादृशस्य ब्रह्मात्मैकरूपत्वाभिधानेन स्वात्मानुभवं प्रकटयांमास ।

व्या०-विशिष्टानाश्रमिनितान्ब्रुवते " इत्यन्तेन गार्हस्थ्यनिकर्षमूर्ध्वरेतसां त्रयाणामुत्कर्षं च केषांचिन्मतत्वेनोपन्यस्य त्रैविद्यवृद्धानां तु " वेदाः प्रमाणमिति निष्ठा। तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसंबन्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यन्ते " इति दर्शपूर्णमासादिकर्मानुष्ठानरहितोर्ध्वरेतसामाचारो वेदविरुद्धत्वादनाचार एवेति सकलत्रैविद्यवृद्धसंमतत्वेन स्वमतप्रदर्शनम्। तत्र कर्माण्यनुतिष्ठतामेव ब्रह्मलोकावाप्तिः। आश्रमान्तरप्रशंसतामपि महान्प्रत्यवाय इत्यत्र संमतिवचनोदाहरणं च "अथापि प्रजापतेर्वचनं, त्रयीविद्यां ब्रह्मचर्यं प्रजापतिं (जातिं) श्रद्धां तपो यज्ञमनुप्रदानं, यदा तानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन् " इति। तथा महाभारतेऽपि शान्तिपर्वणि-ज्ञातिवधनिर्वेदात्संन्यासोद्युक्तं युधिष्ठिरं प्रति तद्भ्रातॄणां महर्षीणां भगवतः कृष्णस्य च वचनेषु भूयसी संन्यासनिन्दा दृश्यते। एवं सत्यपि संन्यासस्याऽऽश्रमान्तरतो न काचन हानिस्तव मते। प्रत्युत संन्यासस्य गार्हस्थ्यादुत्कर्ष एव त्वया " कृत्स्नभावात्तु गृहिणोपसंहारः " (ब्र० सू० ३ । ४ । ४७) इत्यधिकरणे समर्थितः। तत्र हि गृहस्थाश्रमः संन्यासादुत्कृष्टश्छन्दोगोपनिषदि " कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः " इति गृहस्थाश्रममुपक्रम्य " स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते, न च पुनरावर्तते " इति तन्मोक्षमुक्त्वोपसंहारात्। उपसंहारत्वेन तत्र तात्पर्यावगमादिति पूर्वपक्षं कृत्वा संन्यास एव गार्हस्थ्यादधिकः। तन्मोक्षस्य गृहस्थमोक्षादधिककालसाध्यत्वेन तदतिशायित्वात्। गृहिणोपसंहारस्तु देवविषयो न मानुषविषयः "कृत्स्ना ह्येव गृहिणो देवाः कृत्स्ना ह्येते यतयः" इति पौत्रायणश्रुतौ। " देवा एव ब्रह्मचारिणो गृहस्था देवा वनस्था यथा ह्येते मुनय एवं सर्ववर्णाः सर्वाश्रमाः सर्वे ह्येते कर्म कुर्वन्तीति " कौण्डरव्यश्रुतौ च सर्ववर्णाश्रमाचारवत्त्वोक्तानां देवानां गृहस्थानां सतामपि मनुष्यसंन्यासिभ्योऽधिकत्वादिति सिद्धान्तितम्। न चाऽऽपस्तम्बादिवचनान्यपि मनुष्यसंन्यासिभ्यो देवोत्कर्षविषयाणि भवन्त्विति वाच्यम्। " तैर्विरुद्ध आचारोऽप्रमाणम् " इत्यापस्तम्बेन संन्यासादेरनाचारत्वस्यैवोक्तत्वात्। कर्मानुष्ठानपुत्रदारादिपोषणव्यग्राणां गृहस्थानाममृतत्वं न संभवतीति संन्यासाद्युत्कर्षवाद्युक्तगार्हस्थ्यनिकर्षहेतूद्धारसमये " अथाप्यस्य प्रजातिममृतमाम्नाय आह-प्रजामनु प्रजायसे तदु ते मर्त्यामृतमिति। अथापि स एवायं विरूढः पृथक् प्रत्यक्षेणोपलभ्यते दृश्यते चापि सारूप्यं,

व्या०—देहत्वमेवान्यत्" (आ० धर्मसू० प्र० २। पटल ९) इति श्रुतियुक्तिभ्यां गृहस्थानां पुत्रपौत्रादिरूपेणैवामृतत्वव्यवस्थापनेन गार्हस्थ्योत्कर्षप्रतिपादनस्य मानुषगृहस्थविषयत्वस्फुटीकरणाच्च । नहि त्वन्मते देवानां पुत्रपौत्रादिरूपेणामृतत्वं संभावनीयम् । त्वया "न देवपदवीं प्राप्ता ब्रह्मदर्शनवर्जिताः" इति सर्वेषां देवानां ब्रह्मसाक्षात्कारवत्त्वस्य स्वीकृतत्वेन तेषां मोक्षरूपामृतत्वस्यैव संभवात् । महाभारतेऽपि "पन्थानं पावनं हित्वा जनकं मौढ्यमास्थितम् । तं ददर्श प्रिया भार्या भैक्ष्यवृत्तिमकिंचनम्" (......) इत्यादिवैदेहसंन्यासनिन्दादिषु मनुष्यगृहस्थस्यैवोत्कर्षप्रतिपादनं स्पष्टमेव । तस्मान्मनुष्यं लोके कर्माण्यनुष्ठापयितुं कल्पसूत्रं कृतवताऽऽपस्तम्बेन कर्मप्ररोचनार्थं संन्यासाद्याश्रममनाचारत्वेन "बुद्धेः क्षेमप्रापणम् । तच्छास्त्रैर्विप्रतिषिद्धम् । बुद्धेश्चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत" (आ० ध० सू० प्र० २ । प० ९) इति ज्ञानसाध्यामृतत्वफलं मिथ्यात्वेन च दूषयित्वा गृहस्थानामेव कर्मानुष्ठानादेव स्वर्गोऽमृतत्वं चेति वर्णितम् । महाभारते च "अथैककालिको वाऽहमेकैकस्मिन्दिनक्षये । चरन्भैक्षं मुनिर्मुण्डः क्षपयिष्ये कलेवरम् । (शां० प०) इत्युक्तवन्तं युधिष्ठिरं संन्यासोद्योगान्निवर्तयितुकामैस्तस्य भ्रातृभिर्गार्हस्थ्यप्ररोचनार्थं संन्यासं दूषयित्वा गार्हस्थ्योत्कर्षो वर्णित इत्येवं गतिर्वक्तव्या । एवं पुराणागमेषु तत्तद्देवताराधनोपासनाद्यनुष्ठापनार्थं प्रवृत्तेषु तत्प्ररोचनार्थं देवतान्तरानिकर्षो वर्णित इति किं न संगच्छते । अङ्गीकृतं च त्वयाऽपि "द्वेषाच्चैद्यादयो नृपाः" इत्यादौ भगवतः कृपालुत्वातिशयतात्पर्येण द्वेषान्मुक्तिवर्णनं, न तु नरकसाधनेन भगवद्द्वेषेण मुक्तिरस्तीति वदता पुराणेष्वन्यार्थतात्पर्येणासदर्थकथनम् । तत्र दृष्टान्तोऽप्यनुव्याख्याने दर्शितः—

"यथा क्रुद्धः पिता पुत्रं मरेत्याक्षेपपूर्वकम् ।
प्रोक्तस्यान्यस्य कृत्यर्थं वदत्येवं पुराणकम् ॥" इति ।

एवमेव ब्रह्मादिषु परस्परनिकर्षवचनानामप्यन्यपरत्वोपपत्तेर्न तत्र बलाबलविचारापेक्षेति भावः । पुराणानां बलाबलविचारेऽपि परस्य न तत्पत्याशेत्युपपादितमस्माभिः शिवतत्त्वविवेके । यत्तु शिवतत्त्वविवेके—

"क्वचिद्ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते ।
नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ॥
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः ।

कर्मानुष्ठापनार्थं किमु निरतिशयां ब्रह्मसंस्थादिनिन्दा-
मापस्तम्बादिवाक्ये न कलयसि ततः काऽस्य हानिस्तवेष्टा॥५४॥
इत्यप्पदीक्षितकृतौ मध्वतन्त्रविमर्दने ।
दृष्ट्वा सन्तोऽनुगृह्णन्तु चतुर्थनयदूषणम् ॥ ५५ ॥

इति समन्वयाधिकरणदूषणप्रकरणम् ॥

न ध्येयं ब्रह्म नेदं यदिदमिति गिरि ह्यभ्युपेतं त्वयाऽतो
ध्येयार्थानां श्रुतीनां क्वचिदपि न च तद्वाच्यमित्यभ्युपेयम् ।

व्या०— पुराणानि प्रणीतानि विद्वांस्तत्र न मुह्यति " ॥
इत्यादिवचनान्युदाहृत्य पुराणेषु त्रयाणां परस्परोत्कर्षापकर्षवचनानि कल्पभेदेन व्यवस्थितार्थानि प्रतीतार्थपराण्येवेत्युक्तं, तद्वस्तुगतिमनुरुध्योक्तम् । इह तु परमते त्रयोऽप्येते विश्वकर्तारः स्युरित्यापादननिर्वाहाय पुराणेषु परस्परं सृज्यत्ववचनान्यप्यर्थवादाः स्युरित्यापादितमिति न विरोधः । एतेन श्रुतिष्वपि त्रयाणां परस्परनिकर्षवचनानि दत्तोत्तराणि । दृश्यन्ते हि श्रुतिष्वप्याश्रमान्तरनिन्दावचनानि—" किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः । पुत्रं ब्रह्माण इच्छध्वं स वै लोको विदाविदः " (......) " नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः । तस्मात्पुत्रो मातरं स्वसारं नाधिरोहति " ( )
इत्यादीनि । एवमेतान्युपपद्यन्त इत्यलमतिविस्तरेण ॥ ५४ ॥

अथेक्षत्यधिकरणदूषणप्रकरणम् ।

एवमुपक्रमादिलिङ्गैः पुराणाद्युपबृंहणैर्वा न सृष्ट्यादिश्रुतीनां विष्णौ व्यवस्थितत्वसिद्धिरिति दर्शितम् । इदानीं परमते विष्णुपरत्वमेव तासां कथंचिदपि न सिध्येदिति दर्शयितुमीक्ष्यत्यधिकरणे व्यवस्थापनीयत्वेन परस्याभिमतं ब्रह्मणो वाच्यत्वं दूषयति—न ध्येयमिति ।

टि०— १ विश्वकर्तार इति—एकमेव चैतन्यं प्रकृतिगतसत्त्वरजस्तमोगुणोपाधिकं सद्विष्णुविरिञ्चिशिवरूपतां भजत इति पूर्वमेव प्रतिपादितं वस्तुतत्त्वमिति ॥ ५४ ॥ ५५ ॥

२ वाच्यत्वमिति—इत्थं हि तदीयमधिकरणम्—न ब्रह्मणः शास्त्रमुख्यार्थत्वमुपपद्यते । यतस्तत् " यतो वाचो निवर्तन्ते " (तै० उ० २ । ४) इत्यादिश्रुतेः शब्दावाच्यम् । नह्यवाच्यस्य शास्त्रमुख्यार्थत्वं संभवति । अतो न शास्त्रोक्तकारणत्वं तस्येति पूर्वपक्षे । राद्धान्तः—" स एतस्मात् " (प्र० ५ । ५) इत्यादिश्रुतिभिर्ब्रह्मण ईक्षणीयत्वावगतेस्तदन्यथानुपपत्त्या वाच्यमेव तत् । अतस्तस्य शास्त्रयोनित्वोपपत्तेः कारणत्वसंभव इति ।

नो चेन्न ध्येयमेतत्कथमिति भवति स्याद्वार्यैव शङ्का
यद्वाचेति श्रुतिश्च क्षिपति तदसनायैव वाच्यत्वमस्य ॥ ५६ ॥

व्या०—त्वया तावदत्यन्तमेव तदव्यक्तं ब्रह्मेत्यभ्युपगम्य तस्य तदव्यक्तत्वमाक्षेपसमाधानाभ्यां स्थापितं "तथाऽन्यत्प्रतिषेधात्" (ब्र० सू० ३ । २ । ३७)। इत्यधिकरणे। तदित्थम्—यदुक्तं "तदव्यक्तमाहेत्यधिकरणे नित्याव्यक्तं ब्रह्मेति"। तदनुपपन्नम्। उपासकानां हृदयेष्वाविर्भूयोपासनाकाले तस्य स्फुरणात्। नहि परमात्मनोऽन्यदुपास्यम्। तदन्योपासनेन मुक्त्ययोगात्। न चोपासनाकाले तत्तद्धृदयस्थतया प्रतीतस्य ब्रह्मत्व उपासकबहुत्वेन तद्बहुत्वापत्तिर्दोषः। स्वरूपभेदाभावेऽपि ब्रह्मरूपाणां विशेषबलेन नानात्वोपपत्तेरिति पूर्वपक्षे राद्धान्तः—यथा जीवानन्दादेरन्यद्ब्रह्म तथोपासनाकाले प्रतीतादपि "यन्मनसा न मनुते येनाऽऽहुर्मनोमतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" (के० उ० १ । ५) इति श्रुतौ ब्रह्मण उपास्यत्वप्रतिषेधात्। जीवानन्दादिष्वल्पत्वस्येवोपासनाकाले प्रतीतेऽपि व्यक्तत्वादेर्भेदहेतोः सत्त्वाच्च। तस्मादुपासकानां हृदयेषु ब्रह्मणः प्रतिबिम्बविषय एवोपासनालम्बनम्। तदुपासनयैव च प्रतिमोपासनयेव तद्गतं ब्रह्म प्रसन्नं सदव्यक्तमप्यचिन्त्यापरिमितस्वशक्तिबलादपरोक्षी भवतीति युक्तम्। तथैव ब्रह्मतर्कवचनं—पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम्। ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम्। यदुपासा च भवती प्रतिमोपासना यथा। दृश्यते त्वपरोक्षेण ज्ञानेनैव परं पदम्" इति। तस्माद्युक्तमव्यक्तत्वं ब्रह्मण इति।

एवमनुपास्यं ब्रह्मेत्यङ्गीकुर्वता त्वयोपासनाप्रकरणेषूपास्यसमर्पकाणां श्रुतिवचनानां तद्वाच्यं न भवतीत्यङ्गीकार्यम्। तद्वाच्यताङ्गीकारे कथं तदनुपास्यमिति शङ्कया अनिवार्यत्वात्। नहि संभवत्युपासनाविधिषूपास्यसमर्पकैः पदैर्ब्रह्मोपास्यतया विधीयत उपास्यं च न भवतीति। एतच्छङ्कानिरसनायैव हि "यन्मनसा न मनुते" इति मन्त्रसंनिधावाम्नायमानं "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" (के० उ० १।४) इति मन्त्रान्तरं ब्रह्मणो वाच्यत्वं प्रतिक्षिपति। तेन हि सर्ववागविषयभूतं ब्रह्मोपासनाविधिप्रकरणेषु "सर्वं खल्विदं ब्रह्म" (छा० ३।१४।१) इत्यादिवाक्यश्रुतानामुपास्यसमर्पकाणां ब्रह्मादिपदानामप्यर्थो न भवतीति प्रदर्शनेनैषा शङ्का नि-

टि०— १ तदित्थमिति—मध्वसिद्धान्तानुसारेणार्थान्तरस्य वर्णनीयतया तन्मतसिद्धसूत्रतदर्थानुवादोऽयम्।

व्या०—रस्ता भवति । तस्मादवाच्यमिति त्वयाऽभ्युपगन्तव्यम् । अनुपास्यं त्वदीयं ब्रह्म सृष्ट्यादिवाक्यस्थसद्ब्रह्मात्मनारायणादिपदानामपि [१]वाच्यं न भवेदिति न तस्य जगत्कर्तृत्वादिसिद्धिरिति भावः ॥ ५६ ॥

नन्वेतावता ध्यानविधिवाक्येषु ध्येयसमर्पकाणां पदानां ब्रह्म प्रतिपाद्यं न भवतीत्यापादितम् । न तु सृष्टिवाक्येषु स्रष्टृसमर्पकाणामपि तेषां तत्प्रतिपाद्यं न भवतीति । उपास्यसमर्पकपदाप्रतिपाद्यत्वमात्रेणैतस्यानुपास्यत्वनिर्वाहात् । तन्निर्वाहाय प्रवृत्तस्य यद्वाचेति मन्त्रस्यापि तावन्मात्रविषयत्वोपपत्तेः । न चोपासनाविधिषूपास्यसमर्पकाणि यानि ब्रह्मनारायणादिपदानि, तान्येव सृष्टिवाक्येषु स्रष्टृसमर्पका-

---

टि०— १ वाच्यं न भवेदिति—तथा चाधिकरणमिदं व्यर्थमिति भावः । यत्तु—उपासनाकालेषूपासकचित्ते प्रतीतप्रतिबिम्बरूपाद्बिम्बभूतं ब्रह्मान्यदित्यङ्गीकारेऽपि सर्वाण्यपि श्रुतिवाक्यान्युपासनापेक्षितब्रह्मगुणसमर्पकाणीति चाङ्गीकारेऽपि ब्रह्मणः सर्वशब्दवाच्यत्वानपायात् । वासनामयरूपस्य मनसाऽवलोकनं ध्यानमिति चित्ते प्रतीतप्रतिबिम्बरूपस्य वासनामयत्वोपगमात् । संस्कारापरनामकवासनायाश्च पूर्वानुभवजन्यत्वादौपनिषदस्य च मानान्तरागोचरस्य वस्तुनोऽनुभवस्य वेदादिशास्त्रेणैवोत्पाद्यत्वादिति । तन्न । "यद्वाचेत्यादिश्रुत्याऽनुपास्यस्य बिम्बभूतस्य ब्रह्मणो वाच्यत्वनिषेधेन सर्वशब्दवाच्यत्वस्य सुतरामसंभवात् । न च वाच्यत्वाभावे तत्प्रमितिर्न स्यादिति वाच्यम् । प्रतिबिम्बमुखेन बिम्बमुखप्रमितिवत्तत्प्रमित्युपपत्तेर्वाच्यत्वस्याकिंचित्करत्वात् । न चाप्रतर्क्यमिति श्रुतिविरोध इति वाच्यम् । तस्याः शुष्कतर्कागम्यत्वपरत्वस्य त्वयैव पूर्वमुक्तत्वात् । प्रतिबिम्बे वासनामयत्वोपगमस्य लोकविरुद्धत्वात् । संस्कारस्यानुभवजन्यत्वेऽपि विभिन्नविषयकत्वेनाप्रयोजकत्वात् ।

एतेन—' उपासनाकालप्रतीतप्रतिबिम्बजनकवासनाहेत्वनुभवोत्पादनायाखिलवेदवाक्यैर्ब्रह्मगुणवर्णनात्तद्वर्णनस्य वचनवृत्तिं विनाऽयोगात् । सर्वस्योपासनार्थस्याप्यखिलवेदविषयश्रवणमननजनितानुभवोत्पन्नसंस्कारद्वारोपासनार्थत्वादित्यभिप्रायात् । सर्वैरप्येवमेव वाच्यत्वात् । बिम्बभूतस्य वस्तुनः साक्षादुपास्यत्वाभावेऽपि ज्ञातव्यार्थत्वेन वाच्यत्वावश्यंभावाच्चेति परास्तम् । श्रुत्या वाच्यवृत्त्या गुणवर्णनस्योपास्यव्यधिकरणत्वात् । ध्यानज्ञानयोः समानविषयत्वेन कार्यकारणभावस्य निरूपणीयतया बिम्बस्याध्येयत्वे तज्ज्ञानस्य वैफल्येन बिम्बस्य वाच्यत्वोक्तेरनावश्यकत्वात् । अत एव—उपासनाङ्गज्ञानस्याप्यावश्यकत्वं प्रत्युक्तम् । उपासनाविधिजनितत्वस्य वासनामयेऽसंभवाद्वाच्यत्वस्यैवोपासनासंभवेनोपासनार्थत्वादित्यस्योक्तार्थकल्पनस्याप्रामाणिकत्वात् । सर्वथाऽपि वाच्यत्वाभ्युपगमे बिम्बस्य व्यक्तत्वापत्त्या "तदव्यक्तमाह हि" इत्यधिकरणविरोधस्तव मते ब्रह्मणाऽपि दुरुद्धरः । तस्माद्द्वैत्यभिमतमधिकरणनिरूपणमेवाकामेनापि त्वयोररीकर्तव्यमिति दिक् ॥ ५६ ॥

ध्येयार्था एव वाच्यास्तव निगमगिरः स्रष्टृतादीन्वदन्त्य-
स्त्वं हि ध्यानैकनिष्ठां गुणगणफणितिं ब्रह्मणो वक्ष्यशेषाम् ।
तत्तासां ब्रह्मणः स्यात्प्रतिफलनभिदा काऽपि वाच्या मते ते
यद्वाचेत्येवमाद्यैः कतिपयवचनैर्ब्रह्म शुद्धं च लक्ष्यम् ॥ ५७ ॥

व्या०—ण्यतस्तेषां क्वचिद्वाच्यं न भवतीति निर्णयेऽन्यत्रापि तद्वाच्यं न स्यादिति वाच्यम् । प्रसिद्ध्यनुसारेण विष्णवाख्यब्रह्मणस्तद्वाच्यत्वेऽप्युपासनाविधिषु तेषामनुपपत्त्या वाच्यार्थमपहाय तत्प्रतिबिम्बलक्षकत्वोपपत्तेरित्याशङ्क्याऽऽह—ध्येयार्था इति ।

त्वन्मते स्रष्टृत्वादिप्रतिपादकान्युपास्यसमर्पकाण्येव वाक्यानि, त्वया सर्वत्रापि ब्रह्मगुणवर्णनमुपासनार्थमेवेति "आध्यानाय प्रयोजनाभावात्" (ब्र०सू० ३।३।१५) इत्यधिकरणे व्यवस्थापितत्वात् । तत्र हि सद्विद्याभूमविद्यादहरविद्यावैश्वानरविद्यादिषु सर्वासु विद्यासु ब्रह्मगुणवर्णनं सर्वविद्योक्तगुणोपसंहारेणोपासना कर्तव्ये त्यत्र प्रमाणम् । अन्यथा तद्वैयर्थ्यात् " इत्युपसंहाराधिकरणोक्तं (ब्र० सू० ३।३।६) अयुक्तम् । तासु ब्रह्मगुणवर्णनस्य तत्तद्गुणश्रवणद्वारा जनलोकादिफलविशेषार्थत्वोपपत्तेः । उपासनार्थत्वे सर्वगुणानामेकत्रैवोक्तिप्रसङ्गेन प्रकरणभेदायोगादित्याक्षिप्य समाहितम् । सर्वस्यापि ब्रह्मगुणवर्णनस्योपासनार्थतया निःश्रेयसरूपमहाफलप्रयोजनत्वे संभवति जनलोकादिक्षुद्रफलप्रयोजनत्वायोगात् । "आध्यानार्था गुणाः सर्वे वक्तव्याश्चैव सर्वशः । नान्यत्प्रयोजनं मुख्यं गुणानां कथने भवेत्" इति ब्रह्मतन्त्रवचनाद्विप्रकीर्णान् ब्रह्मगुणाननेनोपसंहृत्योपासीनस्य तदनुसारेण मुक्तावानन्दातिशयो भवेदिति तद्दौर्लभ्याय बहुषु प्रकरणेषु विप्रकीर्णतया गुणवर्णनोपपत्तेश्च । सर्वमपि ब्रह्मगुणवर्णनं ध्यानार्थमेवेति सर्वविद्योक्तगुणोपसंहारः कर्तव्य इति निरूपितम् । तस्मात्स्रष्टृत्वादिप्रतिपादकानां श्रुतिपुराणेतिहासागमादीनां सर्वेषामुपास्यत्वेन त्वदभिमतब्रह्मप्रतिबिम्बविशेष एव पर्यवसानं स्यादिति तत्रैव वाक्यशेषादिभिर्यूपाहवनीयादिन्यायेन प्राप्तव्युत्पत्तिकानां ब्रह्मनारायणादिपदानां शक्तिः स्यात् । अन्येषां वादिनां साक्षाद्ब्रह्मण्येव ब्रह्मनारायणादिपदानां शक्तिरित्यभ्युपगमस्य तदेव सृष्टिवाक्यादिप्रतिपाद्यमिति भ्रममूलत्वेन भ्रान्तित्वोपपत्तेः । न चैवं "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इत्यादिष्वपि ब्रह्मपदादीनां बिम्बभूतब्रह्मविषयत्वाभावापात इति वाच्यम् । प्रतिबिम्बवाचिनां तेषां लक्षणया तत्र ब्रह्मविषयत्वोपपत्तेः । न चात्र वैपरीत्यं

व्या०—शङ्कनीयम् । ब्रह्मविषयाणि ब्रह्मपदानि मुख्यानि प्रतिबिम्बविषयाणि लाक्षणिकानीति प्रायः सर्वेषां श्रुतिपुराणादीनामुपास्यत्वस्रष्टृत्वसंहर्तृत्वान्तर्यामित्वशौर्योदार्यादिगुणवर्णनपरतया प्रतिबिम्बविषयत्वावश्यंभावेन तेषां भूयसां लक्षकत्वकल्पनाया अयुक्तत्वात् । " यन्मनसा न मनुते " (के० उ० १ । ५) " यतो वाचो निवर्तन्ते " (तै० उ० २ । ४) " एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते " (प्र० ५ । ५) इत्यादीनां त्वदभिमतवीक्षणीयबिम्बभूतब्रह्मविषयाणां कतिपयवचनानामेव लक्षकत्वकल्पनस्योचितत्वात् । तस्मादित्थमत्र तव मतं पर्यवस्येत्—वाङ्मनसपथातीतं नित्याव्यक्तमुपासनानन्तरं मुच्यमानानां मुक्तानां च साक्षात्कारस्यैव विषयभूतं परं ब्रह्म " तदेव ब्रह्म त्वं विद्धि " इत्यादिभिः कैश्चिदेव वचनैर्लक्षणया प्रतिपाद्यम् । तस्य प्रतिबिम्बविशेषस्तु जीववदनादिः कर्तृत्वादिमान् । उपासकहृदयेषूपास्य-

टि०— १ अनादिरिति—एवं च श्रुत्यादिनिरूपितानामुपास्यतावच्छेदकगुणानां सगुणे ब्रह्मण्युपपन्नतया तस्य चोपास्यत्वेन वाच्यत्वमिति भावः । एतेन मध्वमतेऽस्याधिकरणस्यासंगतिः सूचिता । तथा हि—प्रथमाधिकरणे जिज्ञास्यस्य गुणपूर्णत्वं ब्रह्मशब्देनोपक्षिप्य जन्मादिशास्त्रयोनित्वाधिकरणाभ्यां लक्षणप्रमाणोपन्यासेनातिव्याप्तिनिरासपूर्वकं स्फुटीकृत्य समन्वयाधिकरणेन ब्रह्मणो वेदमुख्यार्थत्वमुपपादितम् । उक्तं हि तत्त्वप्रकाशिकायामीक्षत्यधिकरणे—सकलजगज्जन्मादिकारणत्वेन ब्रह्मैव मुख्यार्थ इत्यभिहितम् । " उपक्रमादिभिर्निर्णीतस्य मुख्यार्थत्वात् " इति । ततश्च त्वत्सिद्धान्ते निर्गुणकथैव पूर्वं कुत्रापि न प्रसक्ता । अतः " यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह " (तै० उ० १ । ४) " अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत " (क० ३ । ५) " अवचनेनैव प्रोवाच " (नृ० उ० ता० ७) " यद्वाचाऽनभ्युदितं येन वागभ्युद्यते " " यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् " (के० उ० १ । ७) इत्यादिश्रुतिभिर्न तच्छब्दगोचर इत्याक्षेपस्याप्रसक्तिः । पूर्वमनुपस्थापिते निर्विशेषे वाच्यत्वाक्षेपायोगात् । उपस्थिते च सगुणे शास्त्रप्रामाण्यसमर्थनेन वाच्यत्वस्य दृढीकरणाच्च । अद्वैतमतरीत्याऽऽक्षेप इति चेन्न । त्रैगुणपूर्णस्य ब्रह्मणो वाच्यत्वस्याङ्गीकृतत्वेन तथात्वायोगात् । निर्गुणस्योक्तश्रुत्याऽवाच्यत्वाभ्युपगमेऽपि तस्य त्वया वाच्यत्वं न समर्थितमिति पूर्वपक्षसिद्धान्तयोर्भिन्नविषयकत्वापत्तेः । न च जिज्ञास्यस्यावाच्यत्वात्सविशेषत्वे चाशब्दमित्यादिश्रुतिरनुपपन्ना स्यादिति पूर्वपक्ष इति वाच्यम् । तथा सत्यवाच्यत्वं परित्यज्य निर्विशेषत्वस्यैव निरसनीयत्वेन तदुपजीव्यावाच्यत्वनिरासस्याऽऽकस्मिकत्वापत्तेः । " यतो वाचो निवर्तन्ते " इतिव त "साक्षी

मध्वशास्त्रमुखमर्दने मनागप्पदीक्षितकृताविदं बुधाः ।
पश्यत प्रणयवश्यचेतसः पञ्चमाधिकरणस्य दूषणम् ॥ ५८ ॥

इतीक्षत्यधिकरणदूषणप्रकरणम् ॥

इत्थं त्वत्क्लृप्तयैव प्रतिहतिमयति न्यायमर्यादया ते

व्या०—रूपेणाभिव्यक्तिशाली सृष्टिश्रुत्यादिभिस्तदनुसारिपुराणादिभिश्च शक्त्या प्रतिपाद्य इति ।

एवं च यद्यपि त्वदन्ये सगुणब्रह्मवादिनः स्वस्वाभिमते ब्रह्मणि सृष्टिश्रुत्यादीनामुपक्रमादिकं योजयेयुस्तथाऽपि त्वन्मते तासां सोपक्रमादिकानां त्वदभिमतब्रह्मप्रतिबिम्बमेव वाच्यमिति वक्तव्यमासीदिति ब्रह्मणि तद्योजनमत्यन्तनिरालम्बनमेवेति भावः ॥ ५७ ॥ ५८ ॥

॥ अथोपसंहारप्रकरणम् ॥

ऐवं परमतमर्यादयैव तदीयपञ्चाधिकरणीदूषणं प्रतिज्ञातं नि[1]र्व्यूढमित्युपसंहरन्ननेनैवाग्रिमाधिकरणानामपि दुष्टत्वान्न[2] पृथग्दूषणमिह क्रियत इत्याशयेनाऽऽह—इत्थमिति ।

त्वया हि पञ्चाधिकरण्या अनन्तरस्य प्रथमाध्यायशेषस्य प्रवृत्तिरित्थमुपपा-

---

टि०—चेता केवलो निर्गुणश्च " (श्वे० ६ । ११) "निष्कलं निष्क्रियं शान्तम् " (श्वे० ६ । १९) इत्यादिनिर्विशेषत्वप्रतिपादकश्रुतीनां बहुलमुपलम्भात् । ईक्षणीयत्वस्यावाच्ये निर्विशेषेऽपि सत्त्वेनानैकान्तिकतया वाच्यत्वासाधकत्वात् । न च प्रबलेनेक्षणीयत्वेनाशब्दत्वं बाध्यमिति वाच्यम् । बलवताऽशब्दत्वेनेक्षणीयत्वस्यैव बाध इति वैपरीत्यापत्तेश्च । " ईक्षतिकर्मव्यपदेशात् " [ब्र० सू० १ । ३ । १३] इति सूत्रे कर्मशब्दं प्रणयतः सूत्रकृत ईक्षतेरित्यनेनेक्षणीयत्वलक्षणाकल्पनाया असंमतत्वात् । " वाच्यमीक्षतेः " इति लघुन्यासं परित्यज्य " ईक्षतेर्नाशब्दम् " इति गुरुन्यासे बीजाभावात् । तथा च कारणस्य सतो ब्रह्मणो वाच्यत्वमपरिहार्यमिति पूर्वपक्षानुत्थितेरस्याधिकरणस्य तव मतेऽसांगत्यमिति व्यर्थमिदमधिकरणमिति दिक् ॥ ५७ ॥ ५८ ॥

इति टिप्पण्यामीक्षत्यधिकरणदूषणं समाप्तम् ॥

१ ननु प्रतिज्ञातार्थस्य पञ्चाधिकरणीदूषणस्य समाप्तत्वेनोत्तरग्रन्थस्यानुत्थितिरित्याशङ्क्य पूर्वोपदर्शितयुक्तिजालेनैवोत्तराधिकरणानां निराकरणं सुलभमिति तदकरणे बीजं प्रदर्शयन्नेवोत्तरयति—एवमिति ।

२ निर्व्यूढम्—निर्विघ्नं संपन्नमित्यर्थः । दुष्टत्वात्—दुष्टत्वस्य प्रत्येतुं शक्यत्वादित्यर्थः ।

शास्त्रस्यास्यान्तरङ्गे मुखनयनिकरे दूषणीयं किमग्रे ।
तेनैवाग्रे नया हि स्फुटमतिशिथिलास्ते यदि स्युः समर्था-
स्त्वद्दृष्टैर्वेदवाक्यैर्जहिहि जड तदा न्यायचिन्तां दुरन्ताम् ॥५९॥

व्या०—दिता—"तत्तु समन्वयादिति विष्णोः शास्त्रगम्यत्वे हेतुत्वेनोपक्रमादितात्पर्यलिङ्गरूपः समन्वयः सिद्धवदुपन्यस्तः । न तु तत्रोपक्रमादिर्विष्णावेव स्थित इति न्यायैः स्थापितम्[2] । तद्यावत्तेषां वाक्यशेषानुदाहृत्य पूर्वोत्तरपक्षग्रथनेन समन्वयो न प्रपञ्च्यते तावदयमनुपन्यस्तप्राय एव । अन्यथा शैवादयोऽपि समन्वयादित्येव सिद्धवद्धेतुमुपन्यस्य शिवादीनां शास्त्रगम्यत्वं प्रसाधयेयुः । अतः समन्वयविभागेन प्रपञ्चनार्थमध्यायशेष[3] आरभ्यते" इति ।

तत्रोपरितनेष्वपि सर्वेष्वधिकरणेषु विष्णौ समन्वयप्रपञ्चनरूपः सिद्धान्तः सृष्ट्यादिवाक्यरूपशास्त्रप्रतिपाद्यत्वं विष्णोर्न संभवतीति[4] पञ्चमाधिकरणसिद्धान्तदूषणेन ग्रस्तो नोन्मज्जनमर्हतीति स्पष्टमेव । तत्तद्वाक्यानां तत्तदधिकरणपूर्वपक्षोपपादितदेवतान्तरपरत्वस्य निराकरणमप्यनुपपन्नम् । विष्णौ समन्वितानामपि तत्तद्वाक्यानां तृतीयचतुर्थाधिकरणदूषणोक्तरीत्या देवतान्तरपरत्वस्यापि संभवादित्यपि स्पष्टमेव । यद्यपि तत्तदधिकरणविषयवाक्येषूपक्रमोपसंहाराधिगतानां विष्णुविषयश्रुतिलिङ्गानां निरवकाशत्वेन प्राबल्यं, विद्वद्रूढ्या महायोगेन प्रवृ-

---

टि०— १ अस्य शास्त्रस्य—मध्वसिद्धान्तप्रतिपादकस्य । अन्तरङ्गे—उपोद्घाततया प्रधाने । मुखनयनिकरे—पञ्चाधिकरण्यात्मकन्यायजाले । त्वत्वलक्षया न्यायमर्यादया—पूर्वनिर्दिष्टया तया । प्रतिहतिं—शैथिल्यम् । अयति—प्राप्ते सति । तेनैव न्यायेनाग्रेऽनया हि—अपि शिथिलैव त्वद्दृष्टैर्वेदवाक्यैः—त्वन्मात्रसाक्षिकैः कमठादिभिः । ते यदि समर्थास्तदा दुरन्तां न्यायचिन्ताम्—शास्त्रविचारं त्यज । कल्पितवेदवाक्यैरेव स्वार्थसिद्धेरिति भावः ।

२ स्थापितमिति—एवं च तत्कर्तव्यताया आवश्यकत्वं सूचितम् । उक्तं च तत्त्वप्रकाशिकायामानन्दमयाधिकरणे—"कृत्यान्तराभावेऽपि तत्तु समन्वयादित्युक्तमेवोपक्रमाद्यन्वयात्सम्यङ्निरूपणं शास्त्रीयशब्दानां प्रतिवाक्यग्रहणेन प्रकटयत्यनेनाध्यायेन सूत्रकारः । अन्यथा प्रतिज्ञामात्रस्यासाधकत्वेनान्यदेव समन्वयादित्यपि वक्तुं शक्यत्वात्" इति ।

३ अध्यायशेष इति—प्रथमेत्यादिः ।

४ न संभवतीति—प्रतिबिम्बस्यैवोपास्यत्वेन तत्रैव गुणाद्यपेक्षणात् । तस्याब्रह्मत्वेन विष्णोश्च बिम्बस्यानुपास्यत्वेन त्वन्मते सृष्ट्यादिप्रतिपादकशास्त्रस्य वैयर्थ्यं दुष्परिहरमिति तात्पर्यार्थः ।

व्या०—त्तिनिमित्ततादधीन्येन तत्तदन्तर्यामिगतत्वेन च देवतान्तरविषयश्रुतिलिङ्गानां विष्णौ सावकाशत्वेन दौर्बल्यं तत्तदधिकरणेषु त्वयोपपादितं, देवतान्तरविषयश्रुतीनां विद्वद्रूढ्यादिभिर्विष्णौ परममुख्यतया प्राबल्यं प्रसिद्धार्थेष्वज्ञरूढ्या केवलयोगेन प्रवृत्तिनिमित्ताश्रयत्वेन च मुख्यमात्रतया दौर्बल्यं च तत्तदधिकरणेषु त्वयोपपादितं, तथाऽपि न प्रबलं प्रबलमित्येव दुर्बलस्य बाधकं, दुर्बलस्यानुज्जीवनप्रसङ्गात् । किंतु सति विरोधे, न च त्वन्मते श्रुतिवाक्यानामनेकार्थत्वे विरोधोऽस्तीत्यसकृदावेदितं न विस्मर्तव्यम् । अपि च विद्वद्रूढ्यादयस्ताववद्विष्णौ कुतो व्यवस्थिताः सिद्धाः, येन देवतान्तराविषयश्रुतिलिङ्गानां विष्णौ सावकाशत्वेन प्रसिद्धेषु स्वस्वार्थेषु परममुख्यत्वाभावेन च दौर्बल्यं भवेत् । विष्णुरेव जगत्कर्तृ परं ब्रह्मेति सापेक्षसावधारणनिश्चयाधीना हि तद्व्यवस्थितत्वासिद्धिः। अन्यथा विरिञ्च एव विद्वद्रूढ्यादय इति वक्तारं को वारयेत् ।

तथा हि "आनन्दमयोऽभ्यासात्" (ब्र० सू० १।१।१२) इत्यधिक-

टि०— १ आनन्दमयोऽभ्यासादिति—अत्र तत्त्वप्रकाशिका—" अत्राऽऽनन्दमयो विषयः । स किं ब्रह्मादिजीवसमूह उत चेतनप्रकृतिः ? अथाचेतना किंवा विष्णुः ? । " ब्रह्माणि जीवाः । मम योनिर्महद्ब्रह्म । पञ्चभिः पञ्चभिर्ब्रह्म " इत्यादिना जीवादिषु ब्रह्मशब्दप्रयोगः संशयबीजम् । तत्र सयुक्तिकं पूर्वपक्षानाह…ब्रह्मशब्दादित्यादिना… । आनन्दमयमधिकृत्य " अस्ति ब्रह्मेति चेद्वेद " इति हिरण्यगर्भनिष्ठब्रह्मशब्दश्रवणात्तस्याऽऽनन्दमयत्वं युज्यते । ब्रह्मशब्दस्यान्यात्रापि वृत्तेः । रुद्रस्य वाऽऽनन्दमयत्वप्राप्तिः । " यश्चासावादित्ये " इत्यानन्दमयस्य सूर्ये प्रोक्तत्वाद्रुद्रस्य सूर्याद्यष्टप्रतिमत्वात् । एवमिन्द्रबृहस्पत्यादीनामपि सूर्याधिष्ठातृत्वादिनाऽऽनन्दमयत्वप्राप्तिः । आनन्दमयनिष्ठब्रह्मशब्दस्य " मम योनिर्महद्ब्रह्म " इति चित्प्रकृतौ प्रयोगात् । कथं सावकाशब्रह्मशब्देनायं निर्णय इति चेत, " सोऽकामयत । बहु स्याम् " इत्यानन्दमयस्य बहुभावश्रवणात् । तदभिमानित्वाच्चित्प्रकृतेः । अचित्प्रकृतेर्वाऽऽनन्दमयत्वप्राप्तिर्बहुभावादेव । तत्तद्देहगतसर्वजीवानां वाऽऽनन्दमयत्वप्राप्तिः । बृह—जातिजीवकमलासनशब्दराशिष्विति धातोर्जीवेष्वपि ब्रह्मशब्दात् । न च वाच्यं " ब्रह्मशब्दस्य साधारण्यान्न निश्चायकत्वमिति । " अन्नरसमयः " " प्राणमयः " इत्युक्त्याऽन्नमयादीनामन्नादिविकाराभिमानित्वेन जीवत्वात् । तत्प्रायपठितानन्दमयेऽपि जीवानां प्राप्तेः । यद्यपि ब्रह्मशब्देन विष्णोरप्यस्ति प्राप्तिस्तथाऽपि नासावानन्दमयः । विष्णोरानन्दमयावयवत्वोक्तेः । तस्य चाऽऽनन्दमयत्वे तदवयवत्वविरोधात् । तथा चाऽऽनन्दमयस्याब्रह्मत्वेन तदवपवब्रह्मजिज्ञासा संभवतीत्याशयः । सिद्धान्तयति—तथाऽपीति । यद्यप्येवमन्येषां प्राप्तिस्तथाऽपीत्यर्थः । " असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद "

व्या०-रणे जगत्कर्तृत्वादिना प्रतिपादितोऽन्नमयादिर्विष्णुरेवेति साध्ये ब्रह्मशब्दाभ्यासं हेतूकृत्य ब्रह्मशब्दस्य यद्यप्यन्यत्राप्यज्ञरूढिरस्ति, तथाऽपि तस्य विष्णौ "तदेव ब्रह्म परमं कवीनाम्" (ना० उ० १ । २) इतिश्रुत्योपदर्शितविद्वद्रूढिः प्रबलेति सैव निर्णयहेतुरिति त्वयोक्तम् । तत्र तदेव ब्रह्मेति श्रुतिर्विष्ण्वैकपरेति कुतोऽवसेया? "यमन्तःसमुद्रे कवयो वयन्ति" (ना० उ० १ । १) इति प्रसिद्धलिङ्गादिति चेत् । "प्रजापतिश्चरति गर्भे अन्तः" (ना० उ० १ । १) "हिरण्यगर्भं इत्यष्टौ" (ना० उ० १ । ३) इति प्रजापतिहिरण्यगर्भश्रुतिभ्यां विरिञ्च्यैकपरा सा कुतो नावसेया ? कुतश्च हिरण्यगर्भ इत्यष्टाविति गृहीता । "य ईशे अस्य द्विपदश्चतुष्पदः" इति पशुपतिलिङ्गात् । "पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि" इत्युपसंहाराच्च शिवैकपरा कथं नावसेया ? । तस्मादेतादृशविषयवाक्येषु नानादेवताश्रुतिलिङ्गानां बलाबलविवेचनेन व्यवस्थितैकदेवतापरत्वमन्यैर्व्यवस्थापनीयम् । त्वया तु सर्वश्रुतिलिङ्गानुग्रहलाभाय तावद्देवतापरत्वमेवाभ्युपगन्तव्यम् । श्रुत्यर्थानैकान्त्यवादिनस्तव तत्तद्देवताविषयश्रुतिलिङ्गानां मुख्यार्थमपि परिगृह्य सर्व-

---

टि०-इत्यानन्दमये ब्रह्मशब्दाभ्यासाद्विष्णुरेवाऽऽनन्दमयः । ब्रह्मशब्दस्य "तदेव ब्रह्म" इत्यादिश्रुतिस्मृतिषु विष्ण्वेकनिष्ठत्वोक्तेः । न च तत एव हिरण्यगर्भादीनां प्राप्तिः शङ्क्या । तेषामपूर्णत्वेन ब्रह्मशब्दमुख्यार्थत्वाभावस्याप्युदाहृतश्रुत्यादिसिद्धत्वात् । मुख्यार्थत्यागेनामुख्यार्थग्रहणायोगात" इति । अत्र पूर्वपक्षो न समीचीनः । आनन्दमयशब्दस्योक्तेष्वर्थेषु प्रसिद्ध्यभावात् । ब्रह्मशब्दस्य रूढ्यैव प्रवृत्त्यभ्युपगमात् । योगेन गुणपूर्णत्वस्य विष्णोरन्यत्रासंभवेनाप्रवृत्त्या जन्माद्यधिकरणेन गतार्थत्वात् । तथा हि जन्माद्यधिकरणे तत्त्वप्रकाशिकायाम्-सृष्ट्याद्यष्टकमस्य जगतो यतो भवति तदेव ब्रह्म जिज्ञास्यमुच्यते । तल्लक्षणं च विष्णावेव संभवति न जीवे । अतो ब्रह्मशब्दस्य जीवे रूढत्वेऽपि बाधकसद्भावात्तद्ब्रह्मेति श्रुत्युक्तं ब्रह्म विष्णुरेवेति युक्तैव प्रागुक्तजिज्ञासेत्यर्थः । यद्यपि विष्णौ ब्रह्मशब्दो विद्वद्रूढियुक्तस्तथाऽप्यभ्युपगम्योक्तिरियमिति ज्ञातव्यमिति । "अस्ति ब्रह्म" इत्यादीनां पुच्छब्रह्मविषयकत्वात् । "सोऽकामयत" इत्यादिश्रुत्युक्तजगत्कारणत्वस्य ब्रह्मणोऽन्यत्रासंभवस्य निरूपणाच्च । ततश्च पूर्वपक्षो निर्दलः । एवं सिद्धान्तोऽपि । गुणपूर्णत्वस्य ब्रह्मणोऽन्यत्रासंभवस्य जिज्ञासाधिकरणे निरूपणात् । ब्रह्मशब्दाभ्यासस्याद्यापि विष्णावनिर्णयेन हेतोरसिद्धेश्चेति दूषणजाले जाग्रत्येव दूषणान्तरमाह-तदेवेति । तत्र विष्णुवाचकपदाभावादिति शेषः ।

व्या०—विषयत्वाङ्गीकारसंभवे किंचिदनुरोधेन कस्याचित्प्रसिद्धार्थस्य परित्यागायोगात् ।

ननु तथा सति तत्तद्विषयवाक्यगतब्रह्मशब्दानामप्यनेकार्थत्वस्य वक्तव्यतया " तदेव ब्रह्म परमं कवीनाम् " (ना० उ० १ । २) इत्यवधारणं न घटेतेति चेत् । न । तस्य त्वन्मते भूमशब्दरीत्या पुरुषभेदेन व्यवस्थितार्थबोधकत्वसंभवात् । ननु कथमिह प्रजापतिरपि ब्रह्मशब्दार्थः स्यात् । ' ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः " (तै० उ० २ । ८) इति ब्रह्मप्रजापत्योरानन्दोत्कर्षापकर्षश्रवणादिति चेन्न । "ब्रह्मपुच्छं प्रतिष्ठा " इति ब्रह्मानन्दमययोरवयवावयवित्वश्रवणेऽप्यानन्दमयस्येव प्रजापतेरपि ब्रह्मत्वोपपत्तेः। त्वया ब्रह्मानन्द एव तारतम्यवदनन्तविशेषवत्त्वस्याङ्गीकृतत्वेनैकस्मिन्नुत्कृष्टापकृष्टानन्दवत्त्वं न संभवतीति वक्तुमशक्यत्वाच्च । "अन्योऽन्तर आत्मा प्राणमयः" इत्यादिसाक्षाद्भेदश्रवणमविगणय्यान्नमयादीनामभेदमङ्गीकृतवतस्तव भेदकश्रवणस्यात्यन्तमविगणनीयत्वाच्च । एतेनाग्रिमाधिकरणविषयवाक्येष्वपि तत्तत्प्रतिपाद्यत्वेन पूर्वपक्ष्यभिमतदेवताभ्यो भेदव्यपदेशेन भेदकव्यपदेशेन वा तस्य तस्य विषयवाक्यस्य तत्तद्देवतापरत्वानिराकरणमपि प्रत्याख्यातम् । त्वन्मतेऽन्नमयादिष्विव ब्रह्मानन्दमययोरिव च भेदभेदकव्यपदेशयोरुपपन्नतया तत्तद्देवताविषयसुप्रसिद्धश्रुतिलिङ्गादिस्वारस्यानुरोधेन तस्य तस्य विषयवाक्यस्य पूर्वपक्ष्यभिमततत्तद्देवतापरत्वस्याप्यनिवार्यत्वात् । अन्यश्चायमग्रिमाधिकरणानां विष्णावेव तत्तद्विषयवाक्यसमन्वयस्यार्थस्य व्यवस्थापकानां निराकरणसंक्षेपः । प्रायः सर्वेष्वधिकरणेषु साधारणेन ब्रह्मश्रुतिलिङ्गादिना विष्णुपरत्वनिर्णयः । पूर्वपक्ष्यभिमततत्तद्देवताविशेषश्रुतिलिङ्गानां प्रवृत्तिनिमित्ततादधीन्यादिभिः सावकाशत्वेन निराकरणमिति च दृश्यते । यथा—आकाशस्तल्लिङ्गात् " (ब्र० सू० १ ।

टि०— १ परित्यागायोगादिति—त्यागे च कर्मकाण्डस्य कर्मबोधकत्वासिद्ध्या विष्णूद्देशेनानुष्ठेयकर्मबोधकप्रमाणासंभव इत्यर्थः ।

२ आकाशस्तल्लिङ्गात्—उक्तं च तत्त्वप्रकाशिकायाम्—स चाऽऽकाशोऽत्र विषयः। विष्णुरन्यो वेति संदेहः । आकाशशब्दस्याऽऽनन्दमये प्रयुक्तत्वमन्यत्र प्रसिद्धिश्च संदेहबीजम् । भूताकाश एवायमिति पूर्वः पक्षः । आकाशशब्दस्य तत्र रूढत्वात् । न च वाच्यं योगवृत्त्याऽऽकाशशब्दो विष्णौ सावकाश इति । बाधकं विनाऽमुख्यार्थाङ्गीकारायोगात् । नचाऽऽकाशस्य भगवदधीनत्वेन तत्रैवाऽऽकाशशब्दो मुख्य इति युक्तम् । आकाशस्याचेतनत्वेनान्याधीनत्वायोगात् । चेतनस्य हि चेष्टादावन्याधीनत्वं संभवतीति । आकाशस्याचे-

व्या०–१।२२) इत्यधिकरणे "अस्य लोकस्य का गतिरितिः' 'आकाश इति होवाच" (छा० १।९।१) इत्यादिविषयवाक्यस्य "स एष परोवरीयानुद्गीथः। स एषोऽनन्तः" (छा० १ ।९। २) इत्यादिवाक्यश्रुतपरोवरीयस्त्वादिसाधारणब्रह्मलिङ्गेन विष्णुपरत्वनिर्णयः। आकाशश्रुतेस्तत्प्रवृत्तिनिमित्ततादधीन्यादिना विष्णुवाचकत्वसंभवेन सावकाशतया निराकरणं च।

तथा "ज्योतिश्चरणाभिधानात्" (ब्र० सू० १।१।२४) इत्यधिकरणे

टि०–तनत्वेनाऽऽनन्दानुपपत्तावप्यभिमानिद्वारा तदुपपत्तेरिति भावः। अनेनैवाऽऽकाशशब्दस्याऽऽनन्दमध्ये प्रयुक्तत्वाद्विष्णुराकाशः किं न स्यादिति परास्तम्। रूढेर्बलवत्त्वेन तस्यापि बाधोपपत्तेः। सिद्धान्तयति–इतीति। यद्यपि "अस्य लोकस्य का गतिरिति वाक्ये भूताकाशरयोक्तरीत्याऽस्ति प्रतिपाद्यत्वप्राप्तिस्तथाऽपि नासावत्र वाच्यो युज्यते। अपि तु विष्णुरेव युज्यते। परोवरीयस्त्वादिविष्णुलिङ्गस्याऽऽकाशनिष्ठतया श्रवणात्" इति। अत्रापि पूर्वपक्षो न समीचीनः। रूढ्यपेक्षया विष्णौ योगप्राबल्यस्य जन्माद्यधिकरणे निर्णयात्। न च तत्र जगत्कारणत्वरूपबाधकसत्त्वाद्रूढ्यर्थत्याग इति वाच्यम्। अत्रापि तादृशकारणत्वरूपबाधकसत्त्वात्। "आकाशादेव समुत्पद्यन्ते" इति श्रवणात्। चेतनाचेतनात्मकप्रपञ्चस्य ब्रह्माभिनत्वेन चेतनस्यैवान्याधीनत्वोक्तेर्मोहमूलत्वात्। अचेतनरथादिचेष्टाया एव चेतनाधीनत्वावगमाच्च। अपि च सिद्धान्तोऽप्यनुपादेयः। परोवरीयस्त्वस्याद्यापि विष्णावनिर्णयात्। निर्णये चाधिकरणानुत्थितेः। वेदानामनेकार्थपरत्वस्य तृतीयचतुर्थयोरधिकरणयोर्दीक्षितेन्द्रैर्व्यवस्थापनेन लिङ्गस्याऽऽकाशश्रुतिबाधकत्वासंभवाच्च। तस्मात्परकीयमाकाशाधिकरणं निरालम्बनमिति हृदयम्।

१ ज्योतिश्चरणेति–तथा हि तत्त्वप्रकाशिकायां–ज्योतिरत्र विषयः। किं विष्णुरुताग्निरिति संदेहः। गुहानिहितत्वं ज्योतिःशब्दस्याग्नौ प्रसिद्धिश्च संदेहबीजम्। तज्ज्योतिरग्निरेव भवेत्। एतत्सूक्तस्याग्निसूक्तत्वात्। ज्योतिःश्रुतेरग्नावेव रूढत्वात्। तथा च सावकाशलिङ्गमात्रात्सावकाशश्रुतिप्रकरणयोर्बलवत्त्वादग्निरेवेदं ज्योतिः। ततश्च गुहानिहितत्वमानन्दमयत्वं च तस्यैवेति पूर्वपक्षः। सिद्धान्तस्तु–विष्णुरेवेदं ज्योतिर्भवेत्। कर्णावीनामेतज्ज्योतिर्विरुद्धचरणाभिधानात्। कर्णादिविदूरत्वादिलिङ्गादित्यर्थः। न च प्रकरणबाधः। लिङ्गेन प्रकरणबाधोपपत्तेः। न च श्रुतिविरोधः। श्रुतेर्विष्णौ सावकाशत्वात्। महायोगविद्वद्रूढिसद्भावेन मुख्यत्वाच्च। निरवकाशलिङ्गेन सावकाशश्रुत्यादेर्बाधोपपत्तेः। अतो विष्णुरेवेदं ज्योतिरिति"। अत्र पूर्वपक्षस्यैवानाञ्जस्यात्। प्रकरणाद्बलीयसो लिङ्गस्य गुहानिहितत्वस्य दर्शनात्। न च लिङ्गस्य ज्योतिःश्रुतिर्बाधिकेति वाच्यम्। श्रुतेरप्यनन्य-

व्या०—"विमे कर्णा पतयतो विचक्षुर्वी३दं ज्योतिर्हृदय आहितं यत्" इति मन्त्रस्य (ऋ० सं० ४।५।११।६) कर्णादिविरुद्धाचरणेन कर्णाद्यपरिच्छेद्य-वैभवरूपेण साधारणेन ब्रह्मलिङ्गेन विष्णुपरत्वनिर्णयस्तत्तन्मन्त्रगतज्योतिःश्रुते-र्ज्योतिःप्रकरणसंपादकतत्पूर्वापरमन्त्रगताग्न्यादिश्रुतीनां च पूर्ववद्विष्णौ सावका-शतया निराकरणं च ।

"छन्दोभिधानात्" (ब्र० सू० १।१।२५) इत्यधिकरणे "गायत्री

टि०—थासिद्धलिङ्गेन बाधस्याऽऽकाशाधिकरणे व्यवस्थापितत्वात् । न च परोवरीयस्त्वलिङ्गस्य श्रुतिबाधकत्वं तत्रोक्तम् । न तु गुहानिहितत्वलिङ्गस्येति वाच्यम् । न्यायस्य तुल्यत्वात् । अन्यथा श्रुतिकल्पकस्य तव स्वेष्टसिद्ध्यर्थं शास्त्रान्तरकल्पनाप्रसङ्गात् । तथा सिद्धा-न्तोऽपि न समीचीनपद्धतिमध्यास्ते । कर्णाविदूरत्वलिङ्गस्य शिवसाधारणत्वात् । तदनि-राकरणेन न्यूनत्वात् । "प्राणो वा आशाया भूयान्" (छा० ७।१५।१) इति प्रकरणे प्राणपदस्य मुख्यप्राणपरत्वं विष्णुपरत्वं च व्यवस्थापितम् । उक्तं हि भूमाधिक-रणतत्त्वप्रकाशिकायाम्—न चैतदर्थद्वयं विरुद्धम् । अन्तर्यामिविवक्षया प्राणपदेन विष्णो-रुक्तेः । "आत्मन आकाशः संभूतः" इत्यादिवदिति । ततश्च तद्वदेव ज्योतिःशब्द-स्याग्निपरत्वेऽपि न व्याहतिरिति वृथा तन्निराकरणार्थमधिकरणरचनेति दिक् ॥

१ छन्दोभिधानादिति—अत्र तत्त्वप्रकाशिकायामेवमधिकरणशरीरं वर्णितम्—सा गायत्री विषयः । किं विष्णुरुत छन्दोविशेष इति संदेहः । ज्योतिःश्रुतिर्लोकप्रसिद्धिश्च संदेह-बीजम् । तत्र गायत्री छन्दोविशेष एवेति पूर्वपक्षः । गायत्रीशब्दस्य तत्रैव रूढत्वात् । वाग्वै गायत्रीति वाक्त्वविधानाच्च । न च गायत्रीश्रुतिर्विष्णाववकाशवती । रूढेरभावात् । योगस्य चामुख्यवृत्तित्वात् । सिद्धान्तस्तु—अत्र गायत्रीशब्देन विष्णुरेव निगद्यते । एत-द्गायत्र्या गानत्राणकर्तृत्वलिङ्गश्रवणात्तस्य च छन्दस्यसंभवाद् विष्णुरेव गायत्री । न च गायत्रीश्रुतेरन्यत्र निरूढत्वात्कथं लिङ्गमात्रेण विष्णुत्वनिश्चय इति वाच्यम् । गायत्रीश्रुतेः पौराणिकरूढ्या श्रुत्युक्तयोगेन गायत्र्या भगवदधीनत्वेन च विष्णावेव मुख्यवृत्त्या साव-काशत्वात् । लिङ्गस्यामुख्यवृत्त्याऽप्यन्यत्रानवकाशात् । सावकाशश्रुतेर्निरवकाशलिङ्गेन बाधोपपत्तेर्युक्तो लिङ्गमात्रेणायं निर्णय इति । अत्र पूर्वपक्षो न न्यायपथमवतरति । ज्योति-रधिकरणे ज्योतिःश्रुतेर्विष्णुपरत्वनिर्णयेन तथा गायत्रीश्रुतिबाधात् । न च श्रुतेः श्रुतिबा-धकत्वासंभवः । निर्णीतयाऽनिर्णीतस्य बाधात् । न चोपक्रमस्थगायत्रीश्रुतिः प्रबलेति वाच्यम् । तव मते ब्रह्मतर्कवशादुपसंहारस्य प्राबल्यात् । तेजो वै घृतमितिवत्तेजो वै गायत्रीत्यस्योपपत्तेः । गानत्राणकर्तृत्वेन विष्णावेव योगरूढ्या गायत्रीशब्दप्रवृत्तेः । केव-लरूढ्यपेक्षया योगरूढेः प्राबल्यात् । सिद्धान्तोऽपि न समीचीनः । अग्निगायत्र्यादिश्रु-

व्या०—वा इदꣳ सर्वं भूतम् ” (छा० ३ । १२ । १) इत्यादिविषयवाक्यगतस्य गायत्रीशब्दस्य गानत्राणकर्तृत्वादिसाधारणब्रह्मलिङ्गादिभिर्विष्णुपरत्वनिर्णयः । गायत्रीश्रुतेः पूर्ववद्विष्णौ सावकाशतया निराकरणं च ।

प्राणस्तथाऽनुगमात् (ब्र० सू० १ । १ । २८) इत्यधिकरणे “ ता वा एता शीर्षन् श्रियः श्रिताः चक्षुः श्रोत्रं मनो वाक्प्राणः ” (ऐ० ब्रा०) इत्याद्यैतरेयब्राह्मणे श्रुतस्य प्राणशब्दस्य “ तं देवाः प्राणयन्तः ” तं भूरिति देवा उपासांचक्रिरे ” इत्यादिवाक्यश्रुतदेवोपास्यत्वादिसाधारणब्रह्मलिङ्गैर्विष्णुपरत्वनिर्णयः । तत्र च यन्मुख्यप्राणलिङ्गं “ ता अहिंसन्ताहमुक्थमस्मि अहमुक्थमस्मीति ” ( ) प्राण उपक्रमा(उपक्रा) मत् ”

टि०—ब्दानां विष्णोरन्यत्र रूढानां विष्णुपरत्वे प्रमाणाभावात् । गानत्राणकर्तृत्वरूपप्रवृत्तिनिमित्ततादधीन्यस्य ऋच्येव संभवात् । विष्णावसंभवाच्च । प्रभ्वधीनसेवकधर्मस्य सेवकमात्रनिष्ठत्वेन प्रभ्वधीनत्वाभावात् । दीपगतप्रकाशादेस्तैलाधीनत्वेऽपि तैलादौ दीपपदवाच्यत्वादर्शनाच्च । सर्वशब्दाभिधो ह्येषः सर्वदेवाभिधो ह्यसौ । सर्वलोकाभिधो ह्येषस्तेषां तदुपचारतः । इति पौराणिकरूढेरपि शिवपरत्वेनासाधकत्वाच्च । अतश्छन्दोभिधानाधिकरणरचनाऽतीव हेया ।

१ प्राणस्तथाऽनुगमादिति—उक्तं हि तत्त्वप्रकाशिकायां–प्राणोऽत्र विषयः । किं विष्णुरुतान्य इति संदेहः । पूर्वोक्तन्यायोऽन्यत्र प्रसिद्धिश्च संदेहबीजम् । तत्र न प्राणो विष्णुः, किंतु वाय्वादिरेवेति पूर्वपक्षः । एतत्प्राणस्येन्द्रियगणे गणितत्वात् । न चैतल्लिङ्गं विष्णाववकाशं लभते । उपपद्यते च मुख्यप्राणादिषु । अतस्तेषामन्यतमस्यैतत्प्राणत्वादिति । सिद्धान्तस्तु—“ तद्वै त्वं प्राण इति श्रुताविवात्रापि श्रुतः प्राणो विष्णुरेव । विष्णुलिङ्गानां देवतोपदेश्यत्वादीनामस्मिन्प्राणेऽनुगमात् । अनुवृत्तेरभ्यासादित्यर्थः ” इति । अत्र संदेहो निर्बीजः । उक्तन्यायलोकप्रसिद्ध्योरतुल्यबलत्वात् । तथा पूर्वपक्षोऽसारः । इन्द्रियगणे गणितस्य करणत्वेन वाय्वादिरूपत्वाभावात् । “ न वायुक्रिये पृथगुपदेशात् ” (ब्र० सू० २ । ४ । १०) इति सूत्रविरोधाच्च । सिद्धान्तोऽसारतरः । “ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपतिः ” (ना० उ० २ । १) इति श्रुत्या देवतोपदेश्यत्वस्य शिवेऽपि संभवात् । विष्णावेवेति नियमाभावाच्च । “ विष्णुमेवानयन्देवाः ” इति स्कान्दवचनस्य पौर्वापर्यालोचनायां व्यापकशिवपरत्वात् । भवन्मते प्राणपदस्य ज्योतिरधिकरणन्यायेनानेकपरत्वसंभवाच्च । अनेनाधिकरणेन प्राणपदस्य वायुपरत्वनिषेधे “ न वायुक्रिये पृथगुपदेशात् ” (ब्र० सू० २ । ४ । १०) इत्यधिकरणेन पौनरुक्त्याच्चेति यत्किंचिदेतत् ।

व्या०—इत्यादौ श्रुतविषयमिन्द्रियैः सह कलहमुत्क्रमणं प्रवेशनमित्यादि । यच्च तत्र "त्वामेव विजानीयाम्" इति पृष्टवन्तं विश्वामित्रं प्रति "प्राणो वा अहमस्मीति" इन्द्रवचनं, तत्सर्वान्तर्यामिविषयतया सावकाशमिति निराकरणं च । एवं द्वितीयपादाद्यधिकरणेष्वपि तत्तद्विषयवाक्यानां साधारणब्रह्म-

टि०— १ द्वितीयपादादीति—तथा हि "सर्वत्र प्रसिद्धोपदेशात्" (ब्र० सू० १।२।१) अत्र मध्वभाष्यम्—"ब्रह्म ततम्" इति सर्वगतत्वमुक्तं विष्णोः । तच्च "तस्यैतस्यासावादित्यो रसः" इत्यादिनाऽऽदित्यस्य प्रतीयते । अतोऽब्रवीत्—"स यश्चायमशरीरः प्रज्ञात्मा" इत्यादिना सर्वत्रोच्यमानो नारायण एव । "तदेव ब्रह्म परमं कवीनाम्" परमं यो महद्ब्रह्म "वासुदेवात्परः को नु ब्रह्मशब्दोदितो भवेत्" स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः इति तस्मिन्नेव प्रसिद्धब्रह्मोपदेशादिति । तत्र हि तत्त्वप्रकाशिकायाम्—तत्सर्वगतत्वं विषयः । विष्णोरन्यस्य वेति संदेहः । "ब्रह्म ततम्" इत्युक्तिरादित्यश्रुतिश्च संदेहबीजम् । एवं सति पूर्वपक्षः । तत्सर्वगतत्वमादित्यस्यैव भवेत् । "तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति" इत्यादिबहवादित्यश्रुतेः । "सूर्य आत्मा जगतः" इति सौरमन्त्रोदाहरणाच्च । अत एव न श्रुतेरन्तर्यामिविषयत्वं युज्यते । तस्यापरिच्छिन्नत्वेन सर्वेषु भूतेष्वित्युक्ताल्पौकस्त्वायोगाच्च । अतो विष्णवन्यस्यैव सर्वगतत्वादन्यस्यैव प्राणत्वानन्दमयत्वादिरिति । सिद्धान्तस्तु—स यश्चायमित्यादिवाक्येन पृथिव्यादिषूच्यमानो नारायण एव । "एतमेव ब्रह्मेत्याचक्षते" इति सर्वगते ब्रह्मशब्दोपदेशात् । ब्रह्मशब्दस्य श्रुतौ नारायण एव प्रसिद्धत्वादित्यर्थः । तथा च श्रुतिः—"यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" (ना० उ० १३) इति । अत्र स यश्चायमितिवाक्योदाहरणं पूर्वं विषयवाक्यस्यानुदाहृतत्वात्कृत्रिमशरीरत्वयुक्तिसूचनार्थं च । न हि नारायणेतरचेतनानां स्वतोऽशरीरता संभवतीति । अत्राधिकरणाङ्गसंदेह एव नावतरति । आदित्यश्रुतिसर्वगतत्वलिङ्गयोरतुल्यबलत्वात् । न च ब्रह्मश्रुतिरेवैककोट्युत्थापकः । भवन्मते ब्रह्मशब्दस्य प्राबल्यमानन्दमयाधिकरणे व्यवस्थापितमिति द्वितीयकोट्यनुत्थानप्रसङ्गात पूर्वपक्षोऽपि न समुन्मिषति । उक्तश्रुतीनामन्तर्यामिपरत्वात् । सर्वभूमण्डलाधिपतेरपि रघुनाथस्यायोध्याधिपतित्वमिव सर्वव्यापिनोऽपि तस्याल्पौकस्त्वव्यवहारोपपत्तेः । सिद्धान्तोऽपि न विदुषां चमत्कारमावहति । सर्वत्रोच्यमानत्वस्य शिवसाधारणत्वेन ब्रह्मशब्दस्य योगमर्यादयाऽन्यत्रापि संभवात् । ब्रह्मशब्दरूढेर्विष्णावव्याप्यनिर्णयात् । यच्च किंचेति श्रुतेः । "पतिं विश्वस्याऽऽत्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम्" (ना० उ० १३) इति पूर्वानुसारेण नारायणपदस्य सर्वाधिष्ठानत्ववाचकतया मायाशबलितेश्वरपरत्वात्त्रिमूर्त्यन्तर्गतविष्णुपरत्वाभावादिति ।

व्या०–लिङ्गादिभिर्विष्णुपरत्वनिर्णयः । अन्यविषयश्रुतिलिङ्गानां सावकाशतया निराकरणमित्येतदेव प्रायिकम् । अत्र सर्वत्रापि साधारणब्रह्मशब्दलिङ्गानां विष्ण्वेकविषयत्वमन्यविषयश्रुतिलिङ्गानां प्रवृत्तिनिमित्ततादधीन्यादिभिर्विष्णवावेव सावकाशत्वमित्येतदप्ययुक्तमप्रसिद्धम् । शिवादिविषयत्वमपि संभवतीति शङ्काग्रस्तत्वात् । तन्निराकरणार्थमेव त्वया प्रथमाध्यायशेषस्य प्रारब्धव्यत्वात् । तथा चोपक्रान्तसाधनीयार्थविस्मरणेन सर्वत्र तस्यैव[1] हेतूकरणमत्यन्तमयुक्तमिति स्पष्टमेव ।

द्वित्रेष्वधिकरणेषु त्वया विष्णवसाधारणश्रुतिलिङ्गानि सन्तीति लिखित्वा तैर्निर्णयः कृतोऽपि दृश्यते । यथा "अन्तरस्तद्धर्मोपदेशात्" (ब्र० सू० १ । १ । २०) इत्यधिकरणे "अन्तःप्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः । इन्द्रस्याऽऽत्मानम्

टि०– एवमत्राधिकरणे (ब्र० सू० १ । २ । ९) भवदीये तत्त्वप्रकाशिका–तदनुत्वं विषयः । किं विष्णोरन्यस्य वेति संदेहः । लक्षणसूत्रमदितिश्रुतिश्च संदेहबीजम् । अदितेरेवेति पूर्वपक्षः । तददितिरित्यादिश्रुतेः । न च श्रुतिर्विष्णुविषया किं न स्यादुक्तन्यायादिति वाच्यम् । अदितित्वलिङ्गात् । नह्यदितिभिन्नस्यादितित्वं संभवति । अतो न प्रागुक्तं ब्रह्मलक्षणं युक्तम् । सिद्धान्तस्तु–विष्णुरेवात्रात्तोच्यते । "सर्वं वा अत्तीति" चराचरस्याद्यतया ग्रहणादिति । अत्र विशय एव नोदेतुमर्हति । सूत्रस्य स्मृतिरूपत्वेन श्रुतिस्मृत्योस्तुल्यबलत्वाभावात् । पूर्वपक्षोऽपि न संभवति । अत्तृत्वस्यानन्यथासिद्धब्रह्मलिङ्गत्वेन तेन श्रुतिबाधस्य पूर्वमेव गतत्वात् । अदितित्वस्यादितिनिष्ठस्यापि ब्रह्माधीनत्वेनादितिवाचकपदस्य ब्रह्मण्यपि वृत्तेः । सिद्धान्तोऽपि न संभवद्युक्तिकः । सर्वसंहर्तृत्वस्य कालरुद्रधर्मत्वेन विष्णवसाधारणत्वाभावात् । "स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु । वासुदेवः परः पुंसामितरेऽल्पस्य वा न वा" इतिस्कान्दवचनादसाधारण्यमिति न भ्रमितव्यम् । तद्वचनस्य सर्वकल्पनाधिष्ठानवासुपदार्थमायाशबलब्रह्मपरत्वात् । तस्य–वसतीति वासुः । दीव्यतीति देवः । इति व्युत्पत्तेर्वासुदेवपदार्थत्वात् । अत्र भवद्भाष्यकर्तुः–"यमप्येति भुवनं सांपराये स नो हरिर्घृतमिहायुषेऽत्तु देवः" इति घृतसूक्तमन्त्रे हविःशब्दस्थाने हरिशब्दं प्रक्षिप्य स्वापेक्षितार्थकल्पनायाः समस्तवेदकल्पकस्यातिशोभायमानत्वात् । एवं शास्त्रस्य शिवपरत्वनिराकरणार्थमध्यायशेषप्रवृत्तिमङ्गीकृत्य तदकरणेन शिवसाधारणलिङ्गप्रदर्शनेन च प्रक्रान्तविस्मृतिस्तव सम्यक् मूर्धानमारुरोहेति भावः ।

१ तस्यैवेति––शब्दलिङ्गादेरिति शेषः । अयुक्तमिति–हेतोः पक्षधर्मत्वानिश्चयेन स्वरूपासिद्ध्यादिदोषप्रसङ्गादिति भावः ।

ध्या०—शतधा चरन्तम् ” (तै० आ० ३।११।९) इत्यादिमन्त्रगतस्यान्तःप्रविष्टशब्दस्य विष्णुपरत्वे “ अन्तः समुद्रे मनसा चरन्तम् ” (तै० आ० ३ । ११ । ९) “ यस्याण्डकोशः शुष्ममाहुः प्राणमुल्बम् ” (तै० आ० ३ । ११ । ४) इति समुद्रशायित्वब्रह्माण्डवीर्यत्वरूपं विष्णुलिङ्गमस्तीति । यथा च “ अत एव प्राणः ” (ब्र० सू० १ । १ । २३) इत्यधिकरणे “ तद्वै त्वं प्राणो अभवः । महान् भोगः प्रजापतेः । भुजः करिष्यमाणः । यद्देवान् प्राणयो नव ” (तै० आ० ३ । १४ । ३) इति प्राणशब्दस्य विष्णुपरत्वे “ ह्रीश्च ते लक्ष्मीश्च पत्न्यौ ” (तै० आ० ३ । १३ । २) इति तत्पूर्वानुवाकश्रुतं लक्ष्मीपतित्वलिङ्गमस्तीति । यथा च “ शब्दादेव प्रमितः ” (ब्र० सू० १ । ३ । २४) इत्यधिकरणे “ अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य स एवाऽद्य स उ श्वः (क० ४ । १२) इति श्रुतस्याङ्गुष्ठमात्रशब्दस्य विष्णुपरत्वे “ ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वे देवा उपासते ” (क० उ० ५ । ३) इतिमन्त्रश्रुतवामनश्रुतिरस्तीति ।

अत्र समुद्रशायित्वादिविष्णुलिङ्गप्रतिद्वंद्वि “ अन्तश्चन्द्रमसि मनसा चरन्तम् ” (तै० आ० ३ । ११ । ५) “ अन्तरादित्ये मनसा चरन्तम् ” (तै० आ० ३ । ११ । ६) इत्यष्टमूर्तेः शिवस्यापि लिङ्गमस्तीति, लक्ष्मीपतिविष्णुपरत्वलिङ्गपरिपन्थिनी “ प्रजापतिश्चरति गर्भे अन्तः ” (ना० १ । १) इति प्रजापतिरस्तीति वामनश्रुतिप्रतिपक्षभूता, ईशानश्रुतिरस्तीति कुत उदाहृतश्रुतिलिङ्गैर्विष्णवेकपरत्वनिर्णयः । श्रुत्यर्थानैकान्त्यवादिनस्तव[1] मते विष्णुपरत्वेन योजनायां शिवादिश्रुतिलिङ्गानामन्यथानयनवच्छिवादिपरत्वेन योजनायां विष्णुश्रुतिलिङ्गानामन्यथानयनसंभवात् । न च कठमन्त्रे—ईशानशब्दो भूतभव्यस्येतिपदसमभिव्याहाराद्भूतभव्यप्रतियोगिकेशितृपरो न तु शिवे रूढिमानिति वाच्यम् । तथा सति वामनशब्दोऽपि प्राणापानमध्यस्थतोक्त्या पूर्वापरमन्त्रेषु बहुधाऽङ्गुष्ठमात्रतोक्त्या च ह्रस्वत्वपरो न तु विष्णौ रूढिमानिति त्वदभिमतश्रुतेरपि हानिप्रसङ्गात् । यथा चेशानशब्दः शिवे रूढिमानेव, एवं यथा च समुद्रशायित्वब्रह्माण्डवीर्यत्वलक्ष्मीपतित्वानि विष्णुलिङ्गानि न भवन्ति तथा

टि०— १—श्रुत्यर्थानैकान्त्यवादिन इति—तथा च विनिगमनाविरहेण शास्त्रस्य विष्णुपरत्वमेवेति वर्षशतेनापि निरूपयितुमशक्यत्वात्प्रयासस्तव वृथेति भावः ।

व्या०-समर्थितं चास्माभिः शिवतत्त्वविवेके (शि० वि० श्लो० १८।२१।२४।

टि०- १ शिवतत्त्वविवेक इति-तत्र हि यत्तु शिवेशानादिशब्दानां शिवेऽसाधारण्यं नास्तीत्युक्तं, तत्र पृच्छामः-किं तेषां " पन्थानः सन्तु ते शिवाः " इत्यादिप्रयोगविषयसाधारणशुभतादिरूढिव्यतिरेकेण शिवेऽसाधारणरूपेण शक्तिरेव नास्तीत्युच्यते, उत तत्सत्त्वेऽप्यक्षादिशब्दवदनेकशक्तिकत्वात्स्वतो न निर्णायकत्वमिति । नाऽऽद्यः । शिवः शूली महेश्वरः । ईशानः शशिशेखरः । इत्याद्यनुशासनबलात् । " विष्णुर्नारायणः कृष्णः " इत्याद्यनुशासनबलात् । कृष्णशब्दस्य वर्णविशेषे रूढिव्यतिरेकेण विष्णाविव तेषां तत्र शक्तेरवश्यमभ्युपगन्तव्यत्वात् । अन्यथा पथ्यादिष्विव तत्र पृथगनुशासनानपेक्षणेन तद्वैयर्थ्यापत्तेः । नापि द्वितीयः । केवलयोगेन कुमुदादिषु प्रयुज्यमानस्यापि पङ्कजादिपदस्य योगरूढ्युभयानुग्रहलाभेन पद्मपरत्वस्येव शिवेशानादिशब्दानां शुभत्वसर्वेश्वरत्वादिविशिष्टरूपविषयशक्तिद्वयानुग्रहलाभेन परमेश्वरपरत्वस्यौत्सर्गिकतया प्रकरणोपपदाद्यनुपपीडितात्ततः सर्वत्र परमेश्वरत्वप्रतीतेः स्वत एव तेषां निर्णायकत्वात् । एतेन योगेनान्यत्रापि प्रयुज्यमानानामीश्वरमहेश्वरेशानादिशब्दानामप्यसाधारण्यं व्याख्यातम् । " ईशानशब्दस्य त्वसाधारण्यम् । " शब्दादेव प्रमितः " (ब्र० सू० १ । ३) इति सूत्रे भगवता बादरायणेनैव स्फुटीकृतत्वाच्च । "महेश्वरस्त्र्यम्बक एव नापरः" "यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः' इति । तथा-ईशानेश्वरेतिशब्दाः कथंचिद्योगमात्रेणान्यत्रापि प्रयुज्यमाना योगरूढ्या शिवासाधरणाः । स्फुटप्रयोगप्रख्यापनात् ।

" यस्मादीशो महतामीश्वराणां भवानाद्यः प्रीतिदः प्राणदश्च ।
तस्माद्धि त्वामीश्वरं प्राहुरीशं सन्तो नित्यं सर्वशास्त्रार्थविज्ञाः ॥

इत्यादिहरिवंशादिवचनदर्शनाच्च । अपि च शिवे प्रयुज्यमानाः पदान्तरसमभिव्याहारमनपेक्ष्य स्वयमेव रूढ्या शिवमुपस्थाप्य श्रुतिविधया तत्रावयवार्थमैश्वर्यं प्रतिपादयन्तीति निखिलविनियोजकप्रमाणमूर्धन्यानेकश्रुतिबलान्निरतिशयैश्वर्यविश्रान्तिः शिव एवेति सिध्यतीत्यादिमहता संदर्भेणेशानादिशब्दानां शिवे रूढिमुपवर्ण्योपसंहृतम् । तस्मादुपपदादिसंकोचकरहिताभिरीशानादिश्रुतिभिः शिवस्य निरतिशयैश्वर्यसिद्धिर्वज्रलेपायते " इति ।

एवं समुद्रशायित्वमपि न विष्ण्वेकनिष्ठम् । " अम्भस्यपारे " इत्यादिसूक्ते " यमन्तः समुद्रे कवयो वयन्ति " विद्युतः पुरुषादधि " इत्युपन्यस्तलिङ्गयोः समुद्रशायित्वविद्युत्प्रभत्वरूपयोः-

लिङ्गमूर्तिं महाज्वालामालासंवृतमव्ययम् ।
लिङ्गस्य मध्ये रुचिरं चन्द्रशेखरविग्रहम् ॥
व्योममार्गे तथा लिङ्गे ब्रह्माणं हंसरूपिणम् ।
विष्णुं वराहरूपेण लिङ्गस्याधस्त्वधोमुखम् ॥

टि०- ब्रह्माणं दक्षिणे तस्य कृताञ्जलिपुटं स्थितम् ।
वामे विष्णुं महाबाहुं कृताञ्जलिपुटं तथा ॥
मध्ये लिङ्गं महाघोरं महाब्धेरम्भसि स्थितम् ।
ध्यात्वा प्रदोषसमये शिवसायुज्यमाप्नुयात् ॥
" एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यज्ञानबृंहितः ॥
जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसंभवः ।
ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः ॥
सुष्वाप योगशयन एकीभूयाथ विष्णुना ।
ब्रह्मा कमलवर्णाभो रुद्रः कालाग्निसंनिभः ॥
पुरुषः पुण्डरीकाभो रूपं तत्परमात्मनः ।
तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम् ॥
प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ।

इत्यादिना महता संदर्भेण शिवपरत्वस्यापि वर्णनेन विष्ण्वसाधारणत्वं निराकृतम् ।

एवं लक्ष्मीपतित्वमपि न तथा । " ह्रीश्च ते " इति मन्त्रस्य केषांचिद्ग्रहयज्ञे सोमाधिदैवतगौरीपूजायां विनियोगस्य स्मृत्यर्णवादिषूक्तत्वादन्यत्र च विनियोगानुपलम्भात्प्रथमश्रुतत्वाच्च । हृल्लेखाह्वयभुवननायिकापरत्वात्तदनुरोधेन लक्ष्मीशब्दस्य वायुसंहितायाम्–'तत्र माहेश्वरी लक्ष्म्या मूर्तिर्मूर्तिमतः प्रभोः " इत्यारभ्य " तस्याङ्कमण्डलारूढा शक्तिर्माहेश्वरी वरा । महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा ॥ इति श्रुतायां महेश्वरशक्तिरूपायां पराशक्त्यंशलीलायां वृत्त्युपपत्तेः । " श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति वाजसनेयिपाठे श्रीशब्दस्य समानप्रकरणगतहृल्लेखाश्रुत्यनुरोधेनोमायामेव " श्रियं लक्ष्मीमौपलामम्बिकां गाम् " इत्यायुष्यसूक्ते तत्र प्रयोगदर्शनाद्वृत्त्युपपत्तेः । हृल्लेखायाः कमलायां प्रयोगादर्शनेन वैपरीत्यशङ्कानवकाशात् । लैङ्गे ब्रह्मनारायणकृतशिवस्तोत्रे—" नमोऽस्तु लक्ष्मीपते श्रीपते ह्रीपते नमः " इत्युपबृंहणाच्च । " ह्रीश्च ते लक्ष्मीश्च पत्न्यौ " इत्यनेनोमापतित्वलिङ्गाभिधानप्रतीतेः । इत्यादिसंदर्भेण विष्ण्वेकनिष्ठत्वस्य लक्ष्मीपतित्वलिङ्गे निराकृतत्वात् । एवं ब्रह्माण्डवीर्यत्वमपि विष्ण्वेकनिष्ठमित्यस्य निराकरणं (शि० त० वि० श्लो० ४९) कृतम्—" आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् " इत्यादिना । " अप एव ससर्जाऽऽदौ तासु वीर्यमपासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । इत्युपबृंहणोपन्यासेन पूर्वपक्षमनुभाष्य महता संरम्भेण कृतमिति विस्तरभयान्नेह लिखितम् । विपश्चिद्भिस्तत्रैव द्रष्टव्यमिति दिक् ।

व्या०—४२ । ४९) । यत्तु त्वया चतुर्थपादे प्रवृत्तिनिमित्ततादधीन्यादिना सर्वशब्दानां विष्णौ परममुख्यत्वोपपादनं कृतं तदेव शिवस्य प्रजापतेश्चान्तर्यामित्वेन तयोरपि सर्वशब्दानां परममुख्यत्वोपपादनमिति न तेन समन्वयस्य विष्णौ व्यवस्थितत्वसिद्धिः । परंतु प्रवृत्तिनिमित्ततादधीन्यादिकथैवातीव वितथा । तथा हि—यस्य शब्दस्य प्रवृत्तिनिमित्तं यदाश्रितं तस्यैवार्थस्य स शब्दो वाचक इति न नियमः । किंतु यस्य शब्दस्य प्रवृत्तिनिमित्तमाश्रितत्वेन यथेष्टविनियोक्तृत्वरूपस्वातन्त्र्यविषयत्वेन वा यदधीनं तस्यार्थस्य स शब्दो वाचक इति । अत एव भृत्यगतस्य जयस्य राजानाश्रितत्वेऽपि तदधीनत्वमात्रेण राजा जयतीति व्यवहारः । न चैवं रिपुगतदुःखबन्धमरणादीनां राजाधीनत्वमात्रेण राजा दुःखी मृतो बद्ध इति प्रयोगप्रसङ्गः । तत्प्रयोगप्रयोजकसत्त्वेऽपि राज्ञो दुःखादियोग्यतया राज्ञः सदेव दुःखादिकमुच्यत इति वा राज्ञि तदानीं दुःखाद्यभावनिश्चयेऽपि तस्मिन्दुःखादिकमसदेवाऽऽरोप्यते राजविरुद्धेनोच्यत इति वा संशयापादकत्वेनामङ्गलतया स्वस्थादिशब्दवत्तदप्रयोगोपपत्तेः । यद्वा स्वातन्त्र्यमात्रं शब्दप्रवृत्तौ न प्रयोजकम् , किंतु स्वगतत्वायोग्यत्वविशिष्टदोषत्वराहितं प्रतिस्वातन्त्र्यम् । एवं च जयस्य राजगतत्वयोग्यत्वेऽपि दोषत्वराहितत्वात्तं प्रति

टि०— १ प्रवृत्तिनिमित्तेति—चतुर्थपादे—“ महतः परमव्यक्तम् ” (क० ३ । ११) इति श्रुतिगतस्याव्यक्तादिशब्दस्य विष्णुपरत्वमव्यक्तत्वादीनां प्रवृत्तिनिमित्तानां विष्णवधीनत्वादिति स्थापितम् । “ उक्तं हि त्वद्भाष्ये–(ब्र० सू० १ । ४ । २) तदधीनत्वाच्चाव्यक्तत्वादीनां तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत् ” इति । यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयते । यथा जीवः परात्मेति यथा राजा जयीत्यपि ” इति च स्कान्दे ” इति च । एतादृशतदधीनत्वं शिवादिगतस्वातन्त्र्यविषयत्वरूपमपि संभवतीति भावः ।

२ वैतथ्यमुपादयितुं पूर्वपक्ष्यभिमतमनुभाषते—तथा हीति ।

३ वाचक इतीति—एवकारः शेषः । नियम इत्यनुषङ्गः ॥ अत एव—यथेष्टविनियोक्तृत्वरूपस्वातन्त्र्यविषयत्वरूपाधीनत्वस्य शब्दप्रयोगप्रयोजकत्वादेव ।

४ राजाधीनत्वेति—राजनिमित्तत्वेत्यर्थः ।

५ तत्प्रयोगप्रयोजकसत्त्वेऽपीति—तेषां दुःख्यादिशब्दानां यः प्रयोगस्तत्प्रयोजकस्य राजाधीनत्वस्य दुःखमरणादिषु सत्त्वेऽपीत्यर्थः । राज्ञो दुःखादियोग्यतया—दुःखाद्याश्रयत्वेन । राजविरुद्धेन—राजद्वेषिणा । स्वस्थादिशब्दवत्—शरीरारोग्यवाचकस्यापि तस्य स्वर्गस्थत्वादिबोधकत्वेनामङ्गलतयाऽप्रयोगवदित्यर्थः ।

६ स्वातन्त्र्यम्—शब्दप्रवृत्तौ प्रयोजकमित्यनुषङ्गः । अत्र दोषत्वे स्वगतत्वायोग्यत्व-

व्या०–राज्ञः स्वातन्त्र्यं जयशब्दप्रयोजकम् । दुःखबन्धादीनां राजगतत्वायोग्यत्वाद्दोषरहितत्वाच्च तानि प्रति तस्य स्वातन्त्र्यं दुःखिबद्धादिशब्दप्रवृत्तौ न प्रयोजकम् । आश्रयत्वमपि तन्मात्रं न प्रयोजकम् । धनवोढरि भृत्ये धनाश्रयत्वेऽपि धनीत्यप्रयोगात् ।

एवं च जीवा एव तु दुःखिनः " कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ " (मा० का० १ । ११) इत्यादिश्रुतिगतदुःखिबद्धादिशब्दा जीवगतदुःखबन्धादिस्वतन्त्रस्य विष्णोर्वाचकाः । तेषां विष्णुगतत्वायोग्यत्वात् । दोषत्वेऽपि तानि विष्ण्वपेक्षया स्वगतत्वायोग्यताविशिष्टदोषत्वरहितानि भवन्तीति तानि प्रति तस्य स्वातन्त्र्यं दुःखिबद्धादिशब्दप्रवृत्तौ प्रयोजकमेव । न तु लोके दुःखिबद्धादिशब्दा रिपुगतदुःखबन्धादिस्वतन्त्रस्य राज्ञो वाचका इति व्यवस्था संघटत इति । [1]इदं तावदयुक्तम् । विविधकृष्णप्रतिमानिर्माणचतुरे शिल्पिनि तत्प्रतिमासु कृष्णादिशब्दप्रवृत्तिनिमित्तं कृष्णाद्याकारं प्रति स्वातन्त्र्ये सत्यपि तस्मिन्कृष्णशब्दप्रयोगादर्शनात्[2] । न च[3] प्रतिमासु कृष्णादिशब्दाः कृष्णाद्याकारसादृश्येन गौणा एव न तु वाचका इति न तासु कृष्णाद्याकारः कृष्णशब्दप्र[4]वृत्तिनिमित्तमिति वाच्यम् । " इवे प्रतिकृतौ[5] "

टि०–वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन । अत्र राजगतत्वायोग्यत्वस्य दोषत्वस्य च जयेऽसत्त्वादुभयाभावप्रयुक्तविशिष्टाभावः । ततश्च तादृशाभाववज्जयं प्रति स्वातन्त्र्यं राज्ञि विद्यत एवेति तस्मिञ्जयीति व्यवहारोपपत्तिः । शत्रुगतदुःखादिषु राजगतत्वायोग्यत्वदोषत्वयोर्विशेषणविशेष्ययोरुभयोः सत्त्वेन विशिष्टाभावाभावान्न तत्र तत्पदवाच्यत्वमिति । यद्यपि विष्णौ जीवगतदुःखादिषु स्वगतत्वायोग्यत्वदोषत्वयोः सत्त्वेन दुःखिबद्धादिव्यवहारानुपपत्तिस्तथाऽपि विष्ण्वपेक्षया तेषु दोषत्वाभावमुपगम्य विशेष्याभावात्तादृशव्यवहारो निर्बाध इति तात्पर्यार्थः ।

१ एवं पूर्वपक्ष्यभिमतं तादधीन्यस्य शब्दप्रवृत्तिनिमित्तं प्रदर्श्य दूषयति—इदं तावदयुक्तमिति ।

२ शब्दप्रयोगादर्शनादिति । कृष्णाकारे शिल्पिनः स्वगतत्वायोग्यत्वरूपविशेषणसत्त्वेऽपि दोषत्वरूपविशेष्याभावात् । विशिष्टाभाववदाकारं प्रति स्वातन्त्र्यवतः कृष्णशब्दव्यवहार्यत्वाभावात् पूर्वोक्तनियमे व्यभिचार इति दूषणार्थः ।

३ कृष्णाकारो न कृष्णशब्दप्रवृत्तिनिमित्तमपि तु कृष्णसादृश्यम् । तत्र तस्य दोषत्वेन विशेष्यवद्विशेषणस्यापि सत्त्वेन विशिष्टाभावाभावान्न व्यभिचार इति मत्वाऽऽह–न चेति ।

४ प्रवृत्तिनिमित्तमिति–किंतु कृष्णाद्याकारसादृश्यमेव । तच्च दोषरूपमिति शेषः ।

५ इवे प्रतिकृताविति–कृष्णाद्याकारस्यैव शब्दप्रवृत्तिनिमित्तत्वमुपपादयन्पूर्वोक्तव्यभिचारं द्रढयति–इवे प्रतिकृताविति ।

व्या०-(पा० सू० ५ । ३ । ९६) इत्यधिकारे विहितस्य कन्प्रत्ययस्य "जीविकार्थे चापण्ये " (पा०सू० ५ । ३ । ९९) इति लुपि सति निष्पन्नकृष्णादिशब्दानां कृष्णाद्याकारसदृशाकारवाचकत्वात् । न च प्रवृत्तिनिमित्ताश्रयत्वे सत्यपि धनवोढरि भृत्ये धनीतिप्रयोगादर्शनात्तदपि शब्दप्रयोगप्रयोजकं न स्यात्प्रवृत्तिनिमित्तस्वातन्त्र्यस्यापि शब्दप्रयोगप्रयोजकत्वाभावे भृत्ये जयिनि राज्ञि जयिशब्दप्रयोगश्च न स्यादिति वाच्यम् । यतः " तदस्यास्त्यस्मिन्निति मतुप् " (पा० सू० ५ । २ । ९४) इति विहिता मत्वर्थीयप्रत्ययाः स्वभावात्केभ्यश्चित्प्रातिपदिकेभ्योऽस्यास्तीति षष्ठ्यर्थे एव भवन्ति, केभ्यश्चिदस्मिन्नस्तीति सप्तम्यर्थे एव । षष्ठ्यर्था अप्येकशतं संबन्धाः सन्तीति तेभ्यस्तेभ्यः प्रादिपदिकेभ्यस्तत्तत्संबन्धविशेष एव केभ्यश्चित्षष्ठ्यर्थे सप्तम्यर्थे च भवन्ति । इयं व्यवस्था प्रयोगानुसारेण स्वयमेव लभ्यत इति लाघवार्थं " तदस्यास्त्यस्मिन्निति " सामान्येन विधानम् । यथा " पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु " (पा० सू० ३ । १ । १२९) इत्यादिसूत्रेषु हविःसामिधेनीविशेषादिवाचकानामपि सांनाय्यधाय्यादिशब्दानां सामान्येन हविराद्यर्थेषु विधानम् । एवं च धनप्रातिपदिकान्मत्वर्थीयप्रत्ययाः षष्ठ्यर्थ एव । तत्रापि स्वस्वामिभाव एव भवन्तीति न धनवोढरि धनीति प्रयोगप्रसङ्गः । जयप्रातिपदिकात्तु ते स्वस्वामिभावरूपषष्ठ्यर्थे, आश्रयत्वरूपसप्तम्यर्थे चेति राज्ञि भृत्ये च न जयिशब्दप्रयोगानुपपत्तिः ।

यद्वा भृत्यगतजयस्य तत्फलभाजि राज्ञ्युपचारेण जयिशब्दप्रयोगोऽस्तु । अत एव माघकाव्ये दृश्यते—

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवाऽऽत्मनि ॥ (स० २।५९) इति ।

तस्मात्सर्वेषामेव रूढानां यौगिकानां च शब्दानां प्रवृत्तिनिमित्ताश्रयत्वं तत्स्वातन्त्र्यं चेत्युभयमपि वाचकताप्रयोजकमित्येतत्सकललौकिकपरीक्षकव्यवहारविरोधि तुच्छं वचः । नहि स्वस्थादिशब्दानामारोग्यादिमदित्यादिवाचकत्वे सत्यपि स्वर्गस्थत्वाद्यर्थान्तरप्रत्यायकत्वेनामङ्गलत्वादिवाप्रयोग इतिवत्पूर्णवर्ममारके

टि०— १ प्रातिपदिकेभ्य इति—तत्प्रकृतिकसुबन्तेभ्य इत्यर्थः । सुबन्तात्तद्धितोत्पत्तेः " घकालतनेषु " इतिसूत्रज्ञापितत्वात् ।

व्या०—राज्ञि मृतशब्दस्य वाचके सत्यप्यमङ्गलतयाऽप्रयोग इति कश्चिदपि संमन्यते। एवमादीनि प्रवृत्तिनिमित्ततादधीन्यादिदूषणान्यस्माभिर्ग्रन्थान्तरे वर्णयिष्यन्ते । परकल्पितमर्यादयैव परमतदूषणार्थं प्रवृत्तेऽस्मिन्प्रकरणे तानि न संगृहीतानि । इत्थं पञ्चाधिकरणीदूषणार्थं दर्शितयैव त्वन्मर्यादया समन्वयाध्यायगताधिकरणानां शैथिल्येन त्वदभिमतस्य विष्णौ व्यवस्थितस्य समन्वयस्यासिद्धौ तस्मिन्संभावितयुक्त्यादिविरोधनिराकरणार्थानि द्वितीयाध्यायगताधिकरणान्यभित्तिचित्रायमाणान्याचिन्त्याद्भुतमाहिम्नि तर्कागोचरे परमेश्वरे युक्तिविरोधादिकं न परिपन्थीति वदतस्तव मते तान्यकाण्डताण्डवरूपाणि चेति । तेषां तदुभयोपजीवनेन प्रवृत्तानां साधनफलाध्यायगताधिकरणानां च शैथिल्यं स्पष्टमेव । यदि त्वेतानि त्वच्छास्त्रगतान्यधिकरणानि त्वद्भाष्ये तत्तदधिकरणेषु सुनिर्णीतार्थसंवादकतया त्वदुदाहृतैस्त्वदेकदृष्टैः कमठमाठरकौण्डरव्यादिश्रुतिवाक्यैस्तदुपबृंहणैश्च समर्थनीयानि, तर्हि तवालं न्यायचिन्तया त्वन्मतानुसारेणैव परस्परं व्याहतया प्रत्यधिकरणमनिर्व्यूढया च । नहि प्रत्यधिकरणं तव न्यायव्युत्पादनव्यसनिताऽस्ति । " संभृतिद्युव्याप्त्यपि चातः (ब्र० सू० ३ । ३ । २४) इत्याद्यधिकरणानां वचनमात्रावलम्बनानामपि त्वन्मते दर्शनात् । संभृत्यधिकरणे हि—सर्वमुमुक्षूणामानन्दो ज्ञानं निर्दोषत्वरूपं सत्यत्वं चेति त्रयो गुणा नियमेनोपास्याः प्रधानफलसिद्धये । प्रधानफलस्य मोक्षस्य निर्दोषज्ञानानन्दरूपतया " तं यथा यथोपासते " (... ...) इति श्रुत्यनुसारेण फलानुसारिगुणोपसंहारावश्यंभावात् " इति । "आनन्दादयः प्रधानस्य "(ब्र० सू० ३ । ३ । १२) इत्यधिकरणे प्रतिपाद्यत्वेन तवाभिमतम् । इत्थं त एव सर्वमुमुक्षूपास्या इत्युक्तमयुक्तम् । " उक्षा सन् द्यावापृथिवी बिभर्ति " " एष हि सर्वेषु लोकेषु भाति " इति श्रुतयोः संभृतिद्युव्याप्त्योरपि सर्वमुमुक्षूपास्यत्वान्मोक्षस्वाभाव्यभरणस्य प्रकाशव्याप्तेश्च सर्वापेक्षितत्वेन तयोरपि तत्क्रतुन्यायविषयत्वादित्याक्षिप्य, यद्यप्येवं तथाऽपि ते न सर्वोपास्याः । " देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः । आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद्भवेत् ।

टि०— १ संभृत्यधिकरण इति । अत्र मध्वभाष्ये—देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः । आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद्भवेत् " इति वचनं तत्त्वप्रकाशिकायां भृत्यादिगुणानां देवोपास्यत्वमात्रं कुतः, अन्येषामपि त उपास्या भवेयुरित्यवतार्य देवानामेव ते गुणा उपास्या नान्येषामिति व्याख्यातमस्ति ।

इत्यप्पदीक्षितेनेदं मध्वोपक्रममक्रमम् ।
तद्रीत्यैव मतं ध्वस्तं संक्षेपेण समन्ततः ॥ ६० ॥

तस्माद्यत्तेऽनुपास्यं विमलसुखतनु ब्रह्म कूटस्थमिष्टं
शास्त्रेऽप्यस्मिन्विचार्यं गमितमुपनिषल्लक्ष्यतां मुक्तभोग्यम् ।
सोऽसावानन्द एवेत्युचितमसुमतामावृतो यस्त्वयोक्त-
स्तद्भेदे नास्ति मानं किमपि निगमतो लाघवेनैक्यसिद्धेः ॥६१॥

व्या०—इति वचनात् " इति किंचिद्वचनमेव विलिख्य सिद्धान्तितम् ।

एवमन्यान्यप्यधिकरणान्युदाहरणीयानि । तस्माद्धूर्तकल्पितवचनैकावलम्बनं न्यायविधुरमिदं मध्वमतं सूक्ष्मदृशा न वीक्षणीयमिति भावः ॥ ५९ ॥ ६० ॥

इत्थं कृतेन मध्वमतध्वंसनेन ग्रन्थेनाऽऽत्मनः पौरोभाग्यपदं परिहरन्नेव तत्र युक्तांशान् गृहीत्वा तैर्जीवब्रह्माभेदसिद्धिप्रकरणस्यास्य तत्त्वनिर्णयफलकत्वेन वादकथारूपत्वं संपादनीयं दर्शयति—तस्मादिति ।

त्वया तावत्परं ब्रह्मोपासनाविषयादन्यद्विशुद्धसुखस्वरूपं परिणामादिविकार-रहितं मुक्तानां भोग्यतया निरतिशयपुरुषार्थरूपमिष्यते । तदेव चास्मिञ्छारीरके शास्त्रे विचार्यं त्वयोपेयते । तत्सर्वं युक्तमेव । तच्चानुपास्यं ब्रह्मोपनिषदां वाच्यं न भवतीति तल्लक्ष्यतां नीतमस्माभिः पञ्चमाधिकरणदूषणैः (श्लो० ५७)। प्राणिनां च संसारदशायामविद्यावृतो विशुद्धानन्दोऽस्तीति च त्वयोक्तं, तदपि युक्तमेव । एवं च सति योऽसौ संसारदशायामावृतो जीवानन्दस्त्वयेष्यते, तदेव विशुद्धसुखस्वरूपं ब्रह्म न ततोऽन्यदङ्गीकर्तुमुचितम् । उपनिषत्सु जीव-ब्रह्माभेदाद्घोषदर्शनात् । तत्रैव तर्काणामानुकूल्याच्च । तथा हि—ब्रह्मानन्दो देवदत्तजीवानन्दान्न भिद्यते । तं प्रत्यनादिभावावृतत्वात् । तद्भोग्यत्वाच्च

टि०— १ अन्यान्यपीति । " पुरुषविद्यायामिव चेतरेषामनाम्नानात् " (ब्र० सू० ३ । ३ । २५) इत्यधिकरणे मध्वभाष्यम्—" सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः । अत्रापि नैव सर्वोऽपि तस्मा ...पसंहृतिः " इति वचनमिति । इदं तत्त्वप्रकाशिकायां—"कर्तव्य एव गुणोपसंहारः । सर्वगुणोपास्तियोग्यानामप्यधिकारिणां भावात् । एकस्यामेव विद्यायां सर्वगुणानामनुक्तत्वात्सर्वविद्योत्तमायामपि पुरुषविद्यायां केषांचिदेव गुणानां पठितत्वात्केषां-चिदपठितत्वादिति पूर्वपक्षयित्वा भवेदुपसंहारस्य कर्तव्यता यदि स्यात्पुरुषविद्यायाः सर्वोत्त-मत्वम् । तत्रापि केषांचिद्गुणानामनुक्तत्वात् । तदेव कुत इत्यत आह भाष्ये—सर्वत इति । इत्यवतारितम् । निर्मूलेनैव तेन वचनेनास्याधिकरणस्य सिद्धान्तः ॥ ५९ ॥

व्या०—देवदत्तजीवानन्दवत् । घटादीनां देवदत्तं प्रति कुड्यादिभावावृतत्वे ज्ञानप्रागभावरूपानाद्यभावावृतत्वेऽप्यनादिभावावृतत्वं नास्तीति न तेषु व्यभिचारः । अनादिभावश्चाविद्यारूपः संसारदशायां जीवानन्दस्य ब्रह्मानन्दस्य च तं प्रत्यावारकस्तवापि संमतोऽस्तीति प्रथमाधिकरणदूषणे (श्लो० १२) दर्शितत्वान्न पक्षे हेत्वसिद्धिः । न वा दृष्टान्ते साधनवैकल्यम् । जीवानन्दाद् ब्रह्मानन्दोऽपि मुक्तिदशायामभिव्यक्तो मुक्तानां भोग्य इति " तदेतत्प्रेयः पुत्रात् " (बृ० उ० १ । ४ । ८) इत्यादिश्रुतिं ब्रह्मविषयां वदतस्तवापि संमत इति न द्वितीयहेतोरप्यसिद्धिः । अस्मन्मते यद्यपि संसारदशायामावृतो जीवानन्द एव ब्रह्मानन्दस्तथाऽपि तत्र साध्यनिश्चयाद् दृष्टान्तत्वमुचितम् । साध्यनिश्चयो हि दृष्टान्तत्वे तन्त्रं न पक्षान्यत्वमपि ।

यद्वा जीवब्रह्मानन्दयोर्बिम्बप्रतिबिम्बभावेन व्यावहारिकभेदसत्त्वात्पक्षदृष्टान्तभावः । प्रतिबिम्बे चैतन्यांश एवानावृतः । आनन्दांशस्त्वावृत एवेत्यभ्युपगमान्न साधनवैकल्यमपि ।

नन्वत्र साध्यं जीवानन्दाभेदरूपं जीवानन्दभेदप्रतिषेधरूपं वा । नाऽऽद्यः। मया जीवब्रह्मानन्दयोरसाधारणरूपाभ्यां भेदस्येवाऽऽनन्दत्वादिसाधारणरूपेणाभेदस्यापि स्वीकृतत्वेन सिद्धसाधनतापत्तेः । न द्वितीयः । त्वयाऽपि जीवब्रह्मानन्दयोर्बिम्बप्रतिबिम्बभूतयोर्व्यावहारिकभेदस्याङ्गीकृतत्वेन तत्प्रतिषेधे बाधापत्तेरिति चेत् । उच्यते । देवदत्तजीवानन्दगतासाधारणधर्मावच्छिन्नप्रतियोगिताकस्तद्भेदः साध्य इति नाभेदसाध्यपक्षे सिद्धसाधनं, नापि भेदप्रतिषेधसाध्यपक्षे बाधः । त्वया ब्रह्म जीवाद्भिद्यते सर्वज्ञत्वादित्याद्यनुमाने व्यावहारिकभेदेन सिद्धसाधनपरिहाराय यद्विशेषणं निवेश्यते तद्विशिष्टभेदप्रतिषेधस्यात्र साध्यत्वाङ्गीकारात् । त्वया हि तत्र धर्मिसमसत्ताकत्वं धर्मिज्ञानाबाध्यत्वं वा विशेषणं निवेश्यते । तद्विशिष्टभेदप्रतिषेधोऽत्र साध्यत इति न किंचिदनुपपन्नम् ॥ १ ॥ एवमग्रिमानुमानेष्वप्यभेदशब्दार्थो वर्णनीयः ।

ब्रह्म जीवाभिन्नं निर्दुःखत्वे सति सुखवत्त्वात् । निर्विकारत्वे सति ज्ञानवत्त्वा-

टि०— १ घटादीनामिति—घटादीनां देवदत्तं प्रति कुड्यादिभावावृतत्वेन तेषु साध्याभावेन व्यभिचारवारणायानादित्वस्य हेतौ प्रवेशः । तेषामेव देवदत्तीयज्ञानप्रागभावावृतत्वेन व्यभिचारवारणाय भावत्वस्य निवेश इति भावः । प्रागभावस्य विषयावारकस्य स्वीकर्तृमतेनेदम् । अन्यमते द्वितीयो हेतुः प्रथमहेतावेव भावपदानिवेशो वेति ।

व्या०—र्जीववत् । मतद्वयेऽपि ब्रह्मणि जीवे च स्वरूपसुखस्य स्वरूपज्ञानस्य च धर्म्यभिन्नत्वेऽपि विशेषबलादविद्यावशाद्वा धर्मत्वमप्यस्तीति न पक्षदृष्टान्तयोर्विशेषासिद्धिः । नापि विशेषणासिद्धिः । मतद्वयेऽप्यन्तःकरणस्यैव दुःखादिसकलविकाराश्रयत्वात् । यद्यप्याध्यासिकदुःखादिविकाराश्रयत्वं जीवस्य प्रपञ्चाश्रयत्वं च तदुपादानस्य ब्रह्मणोऽप्यस्ति, तथाऽपि वस्तुतो निर्दुःखत्वं निर्विकारत्वं च विशेषणम् । तच्च धर्मिसमसत्ताकदुःखविकारशून्यत्वरूपम् । वैषयिकसुखाश्रये वृत्तिज्ञानाश्रये चान्तःकरणे व्यभिचारवारणाय रूपादिषु तद्वारणाय हेतुद्वयेऽपि विशेष्यभागः ॥ २ ॥

ब्रह्म देवदत्तजीवाभिन्नं तत्कर्मफलभोक्त्रा स्वेनाभिन्नत्वात् । त्वन्मते तस्य तत्कर्मफलभोक्तृत्वस्य गुहाधिकरणे व्यवस्थापितत्वात् । अस्मन्मते तथाभूतेन जीवेनाभिन्नत्वान्मतद्वयेऽपि हेतोर्नासिद्धिः । न चास्मन्मते हेतोः साध्यावैषम्यं साध्ये जीवस्य जीवत्वेन हेतौ कर्मफलभोक्तृत्वेन निवेश इति विशेषणभेदेन तयोर्भेदात् । यद्यपि भोक्त्रभिन्नत्वादित्येतावताऽपि न व्यभिचारस्तथाऽपि तत्कर्मफलभोक्तृत्वं तदभेदमन्तरेणानुपपन्नमिति विपक्षे बाधकतर्कोत्थापकतया व्याप्तिग्रहानुकूलत्वान्न विशेषणवैयर्थ्यम् ॥ ३ ॥

" हिरण्यगर्भादिजीवा ब्रह्माभिन्नाः । तदीयदेहेन्द्रियैर्भोक्त्राऽभिन्नत्वाद् ब्रह्मवत् " । " ब्राह्मेण जैमिनिरुपन्यासादिभ्यः " (ब्र० सू० ४ । ४ । ५) इत्यधिकरणे त्वया ।

" आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति ।
गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवेत् "

टि०– १ ब्राह्मेणेति–तथा हि तत्त्वप्रकाशिकायां—भोगो विषयः । मुक्तानां युक्तो न वेति संदेहः । न युक्त इति पूर्वपक्षः । किं मुक्तानां देहोऽस्ति न वा । नाऽऽद्यः । तेषां संसारपारंगतत्वेन शरीरानुपपत्तेः । अन्यथा मुक्तत्वस्यैवायोगात् । न द्वितीयः । शरीराभावे भोगासंभवात् । इति पूर्वपक्षं प्रापय्य युज्यते मुक्तस्य भोगः । न चोक्तविकल्पः । देहाभावाभ्युपगमात् । सर्वदेहपरित्यागेनैव मुक्तत्वात् । न चोक्तदोषः । मुक्तस्य स्वदेहाभावेऽपि परमात्मानं प्रविष्टस्य तद्देहेनैव ग्रहवद्भोगसंभवादिति जैमिनिराचार्यो मन्यते । कुत एतदित्याह–स इति श्रुतेः । ननु " स्वयं देहविधुरस्य कथमन्यदेहेन भोगो युज्यते प्रलयादावभावादित्यत आह " इति । " गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या च दर्शनम् " इत्यादिपूर्वस्मरणान्मुक्तस्यैतद्भविष्यतीति ब्रह्मतन्त्रोक्तयुक्तेश्च " इति भाष्यग्रन्थमवतार्य सिद्धान्तितम् । एतेन परेषां ६४ तमश्लोके प्रदर्श्यमानासुरत्वरूपणे हेतुः प्रकटीकृत इति ।

व्या०—इत्यादिवचनानि लिखित्वा सायुज्यमुक्तिं गता हिरण्यगर्भादयो ब्रह्मणो देहं प्रविष्टास्तद्देहेन्द्रियैरेव भुञ्जत इति व्यवस्थापितत्वान्न त्वन्मते हेत्वसिद्धिः । नास्मन्मते तदसिद्धिः । अस्माभिरपि पर्यङ्कविद्याप्रतिपादितया रीत्या ब्रह्मणो देहेन्द्रियाणां भोगस्य च स्वीकृतत्वेन तद्देहेन्द्रियैर्भोक्त्रा ब्रह्मणा हिरण्यगर्भादीनामभिन्नत्वस्याङ्गीकृतत्वात् । पूर्ववद्विशेषणभेदेन हेतुसाध्ययोर्भेदः ॥ ४ ॥

जीवा ब्रह्माभिन्नास्तदिन्द्रियैर्भोक्त्राऽभिन्नत्वात्, आकाशादिप्रपञ्चस्रष्टृत्वाद् ब्रह्मवत् । यद्यपि मुक्तहिरण्यगर्भादीनामिव सर्वेषां जीवानां ब्रह्मदेहगतैरिन्द्रियैर्भोक्तृता नास्ति, तथाऽप्यस्मदादिदेहगतान्यपीन्द्रियाणि ब्रह्मण एव करणानि । अस्मदादीनां तु स्वामिनः कुठारैर्भृत्यानामिव ब्रह्मकरणैरेव व्यवहार इति त्वया "ज्योतिराद्यधिष्ठानं तु तदामननात्" (ब्र० सू० २ । ४ । १५) इत्यधिकरणे व्यवस्थापितत्वात् । त्वन्मते नाऽऽद्यहेतोरसिद्धिः । नापि द्वितीयहेतोरसिद्धिः । ध्यानमनोराज्यविषयप्रपञ्चेषु जीवानां स्रष्टृत्वस्य त्वयाऽङ्गीकृतत्वात् । "अहमेव जगत्स्रष्टा ब्रह्मेति" जीवानां ध्यानादिसंभवाच्च । वासिष्ठरामायण ऐन्दवोपाख्याने (उत्पत्ति० प्र० ८६ । ३७—३८ ।

"अन्तःस्थेनैव मनसा चिन्तयामासुरादृताः ।
ब्रह्माऽहं जगतां स्रष्टा कर्ता भोक्ता महेश्वरः ॥
लोकपालपुरैः सार्धं भुवनानि चतुर्दश ।
निर्मितानि मयैतानि तेषामन्तरहं स्थितः ॥"

इतीन्दुनामकब्राह्मणपुत्राणां तथा ध्यानप्रतिपादनाच्च । अस्मन्मते पूर्ववद्धेतोरसिद्धिः साध्या वैशिष्ट्यनिरासः । न च ब्रह्मजीवयोर्गुणोत्कर्षापकर्षसत्त्वाद्विरुद्धगुणाक्रान्त्या भेदः शङ्कनीयः । ब्रह्मगतगुणोत्कर्षस्य तदभिन्नजीवसाधारण्येऽपि जीवे त्वदभिमतस्य ज्ञानबलानन्दोत्कर्षस्येव संसारदशायामावृतत्वेन प्रकाशासंभवस्य त्वन्मते ब्रह्मणोऽचिन्त्याद्भुतशक्तिमहिम्ना तस्य तर्कागोचरत्वमहिम्ना च विरुद्धगुणाक्रान्तेस्तद्भेदासाधकत्वस्य च प्रथमद्वितीयतृतीयाधिकरणदूषणावसरे (श्लो० २० । २१ । २३ । ४१ । ५०) प्रपञ्चितत्वात् ।

वस्तुतस्तु त्वदभिमते ब्रह्मणि जीवगुणविरुद्धत्वेनाऽऽशङ्कनीयः कोऽपि गुणः श्रुतिसिद्धो न लभ्यते । त्वया ह्यस्मिञ्छारीरकशास्त्रे विचारणीयं शुद्धं ब्रह्मोपास्यस्य प्रतिबिम्बरूपस्य बिम्बरूपं न तु स्वयमुपास्यमिति निरूपितं "तथाऽन्यत्प्रतिषेधात्" (ब्र० सू० ३।२।३७) इत्यधिकरणे । एवमङ्गीकुर्वतस्तव मते

व्या०—सृष्ट्यादिवाक्यमन्यच्च सकलं गुणवाक्यमुपास्यप्रतिबिम्बपरमेव, न तु विशुद्धब्रह्मपरम् । विशुद्धं ब्रह्म "यतो वाचो निवर्तन्ते" (तै० उ० २।४) "यद्वाचाऽनभ्युदितम्" (केन० १ । ४) इत्यादिभिः कैश्चिदेवास्मदभिमतनिर्गुणवाक्यैर्लक्षणया प्रतिपाद्यमभ्युपगन्तव्यमित्युपपादितमस्माभिः पञ्चमाधिकरणदूषणे (श्लो० ५६) । ततश्च कुतो विशुद्धे ब्रह्मणि जगत्कर्तृत्वादिविरुद्धगुणसिद्धिर्येन तस्य जीवभेदः शङ्क्येत । न च तदा सर्वाकाशादिप्रपञ्चस्रष्टृत्वादित्यादिजीवब्रह्माभेदसाधकानुमानानां दृष्टान्ते साधनवैकल्यं पक्षे हेत्वसिद्धिर्वा स्यादित्याशङ्कनीयम् । परमर्यादया पराभ्युपगन्तव्यार्थविरुद्धमपि पराभ्युपगममात्रमनुसृत्य हेतूकरणसंभवात् । त्वं ह्युपासनार्थमेव सर्वासु श्रुतिषु जगत्सृष्ट्याद्याम्नानं विशुद्धं ब्रह्मोपास्यं न भवतीति वदन्नपि विशुद्धस्य ब्रह्मणः स्रष्टृत्वं कर्मफलभोक्तृत्वं देहेन्द्रियादिमत्त्वमस्मदादिकरणस्वामित्वमित्यादिकमुपासनार्थं श्रुत्याऽऽम्नातत्वेन तवाभिमतं गुणजातमङ्गी करोषि । त्वदभ्युपगन्तव्यार्थाविरुद्धास्त्वनादिमायावृतत्वादित्याद्या अतीताश्चत्वारो हेतवः । त एव "आवृतो यस्त्वयोक्तः" "मुक्तभोग्यं" "कूटस्थनित्यं" "विमलसुखतनु" इति विशेषणैर्मूलश्लोके (६१) संगृहीताः ।

अथापि स्याज्जीवानां सुखादिव्यवस्थया भिन्नानां कथमेकेन ब्रह्मणा समभेदः स्यादितीदमपि दत्तोत्तरमर्जुनाखण्डलादीनां सुखादिवैचित्र्ये सत्यपि त्वदीयाभेदाभ्युपगमप्रदर्शनेन त्वन्मते ब्रह्मशक्त्यादिमहिम्ना विरुद्धगुणवत्त्वस्य भेदासाधकत्वस्य च व्यवस्थापनेन च ।

एवं च "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्नाः" इत्यादिश्रुतिभिर्जीवब्रह्मणोर्जीवानां चाभेदसिद्धिरप्रत्यूहेति न भेदशङ्कावकाशः । न च भेदश्रुतिष्वपि सतीषु कुतोऽयमभेदश्रुतिवाक्यपक्षपात इति शङ्क्यम् । विरुद्धगुणवत्त्वादेरकिंचित्करत्वे स्थिते साधकतर्कानुग्रहेणाभेदश्रुतीनां प्राबल्यात् । न चैवमपि जीवाभिन्नमखण्डं त्वदभिमतं ब्रह्म श्रुतिभिर्न सिध्येत्, वाक्यानां पदार्थसंसर्गपरत्वस्य पदानां प्रवृत्तिनिमित्तसंसर्गपरत्वस्य व्युत्पत्तिसिद्धत्वेन जीवपरवाक्यानां ब्रह्मपरवाक्यानां च तत्तत्पदार्थसंसर्गपरतायास्तदन्तर्गतपदानां प्रवृत्तिनिमित्तसंसर्गपरतायाश्च वक्तव्यतया सखण्डविषयत्वावश्यंभावादिति वाच्यम् । त्वया जीवे ब्रह्मणि च निर्विकारे गुणक्रियादीनां नित्यत्वेन धर्म्यभिन्नत्वेन समवायाश्रयाश्रयिभावादिसंसर्गरहितत्वेन चाभ्युपगततया त्वन्मतेऽपि श्रुतीनां तत्संसर्गविषयकप-

मध्वादिभिर्मुषितमत्र सदद्वितीयं
प्रत्याहरन्तादिदमागममौलिरत्नम् ।
आच्छाद्य गोपितमसारतरैस्तदर्थै-
स्तत्क्षुल्लकाधिकरणस्थलमर्दनेन ॥ ६२ ॥

व्या०—सक्त्यभावात् । न च तेषां संसर्गाभावेऽपि संसर्गव्यवहारनिर्वाहकत्वेन मद्भ्युपगतो विशेष एव तत्र पदार्थविधया वाक्यार्थविधया च भासमानः सन्नखण्डत्वविरोधी स्यादिति वाच्यम् । विशेषस्यापि त्वया धर्म्यभिन्नत्वस्योक्तत्वात् । तदङ्गीकारवैयर्थ्यस्य चास्माभिः प्रथमाधिकरणभङ्गे (श्लो० २३ । २४) व्यवस्थापितत्वात् ।

एतेन—महावाक्यार्थोऽपि जीवब्रह्माभेदविषयत्वेन सखण्ड इति—निरस्तम् । अभेदस्यापि धर्मिभिन्नस्याभावात् । धर्मिण एव संसर्गविधया प्रतीतिश्चेत्तावता द्वैतापत्त्यभावेनाविरोधाच्च । तस्मात्त्वदीयतत्तदधिकरणमर्यादापर्यालोचनयैवाशेषोपनिषन्महातात्पर्यवेद्यं सच्चिनन्दैकरसमद्वितीयं ब्रह्म सिद्धम् ॥ ६१ ॥

चोरापहृतरत्नप्रत्याहरणसादृश्यप्रदर्शनेनोपसंहरति—मध्वादिभिरिति । यथा खलु त्रासादिदोषराहिततया सदृशान्तरराहितं सम्राजः किरीटरत्नमासन्नसेविभिः किरातैर्मुषित्वा क्षुद्रेषु स्वगृहेषु तृणदारुशलाकादिभिरत्यन्तासारैस्तदुपकरणैराच्छाद्य संगोपितं तदीयगृहभूम्याक्रमणेनान्विष्य दृष्ट्वा राजकीयैः प्रत्याश्रीयेत, तथैवाद्वितीयमत एव भयरहितं निगमशिरसामलंकारभूतं परं ब्रह्म

टि०— १ एतेनेत्यस्यार्थं स्फुटयति—अभेदस्येति । ननु किमभिमतमायुष्मतः । अभेदस्य महावाक्यार्थत्वाभ्युपगमेऽखण्डत्वहानिरिति वदतः, किमभेदस्याऽऽत्मभिन्नत्वात्सत्यत्वेऽद्वैतहानिर्मिथ्यात्वे तत्त्वमसीत्यादेरतत्त्वावेदकत्वापत्तिरिति वाऽऽत्मस्वरूपत्व एकतरपरिशेषापत्तिः, सापेक्षस्याभेदस्य निरपेक्षात्मरूपत्वायोगश्चेति वा । उभयथाऽपि तादृशाभेदबोधकमहावाक्यस्याखण्डत्वहानिरभिप्रेता ? तत्राऽऽद्यपक्षोऽनभ्युपगमपराहतः । द्वितीयपक्षस्तु समीचीनोऽभ्युपगतश्च । न हि तदानीमेकतरपरिशेषापत्तिर्दोषः । ज्ञानानन्दयोरात्माभेदेऽपि यथा नैकतरपरिशेषाद्विकं, कल्पितानन्दत्वादिधर्मात्, तथा प्रकृतेऽपि संभवात् । नापि निरपेक्षात्मरूपत्वायोगः । अभेदस्यापि निरपेक्षस्वभावत्वात् । ततश्च तादृशाभेदबोधकमहावाक्यस्य नाखण्डत्वहानिरपि । धर्मिरूपस्याभेदस्यासंसर्गत्वात् । संसर्गबोधकत्वे ह्यखण्डत्वं हीयेत, न धर्मिस्वरूपबोधकत्व इत्याह—अभेदस्यापीति ।

आद्रियध्वमिदमध्वदर्शनं
व्यध्वनं त्यजत मध्वदर्शनम् ।
शांकरं भजत शाश्वतं मतं
साधवः स इह साक्ष्युमाधवः ॥ ६३ ॥
असुरान्विजिगीषोः स्वयमद्वैतब्रह्मरत्नहरान् ।
विबुधेन्द्रस्य सखायो मरुत इव सन्त्विमे मुख्याः ॥६४॥

व्या०—मध्वजयतीर्थादिभिर्मुषित्वा युक्त्यसहिष्णुभिर्जीवब्रह्मणोः सविशेषाभिन्नगुणादिभिर्भेदवदवभासमानैः स्वकल्पितार्थैराच्छाद्य गोपितं तदीयानिर्युक्तिकाधिकरणानां मथनेनास्माभिः प्रत्याहृतमित्यर्थः । अत्रसदित्यत्र प्रकृतार्थे—अत्रेति सदिति च पदद्वयम् ॥ ६२ ॥

इत्थं मध्वदर्शनदूषणस्य तन्मतमर्यादयैवाद्वैतसिद्धेश्च मार्गप्रदर्शनमात्रं कृतम् । तच्च सद्भिरादरणीयमाप्तमूलत्वादित्याह——आद्रियध्वमिति । इह मध्वदर्शनमार्गप्रवृत्तिं त्यक्त्वा शांकरमतं तु शाश्वतं सेवनीयमित्यर्थे स एव गौरीपतिः साक्षी । यः स्वयमेव शंकराचार्यरूपेणाद्वैतं व्यवस्थापितवानिति " चतुर्भिः सह शिष्यैस्तु शंकरोऽवतरिष्यति " इत्याद्याप्तवचनेषु प्रसिद्ध इत्यर्थः ॥ ६३ ॥

एते श्लोकाः परविजयोन्मुखस्य परीक्षकस्य मुखवर्तितयोपकारकाः, पूर्वदेव विजयोद्युक्तस्येव सुपर्वनायकस्य नासीरवर्तितया मरुत इत्येतदाह—असुरानिति । असुराः खलु वैरोचनीमुपनिषदमाश्रिता देहात्मवादिनः प्राकृताः । परेऽपि

टि०— १ मध्वेति——वस्तुतस्तु मध्वाचार्यैर्मन्दाधिकारिण उद्दिश्य मुखतो द्वैतमभ्यधायि, न तु तेषां तत्र परमतात्पर्यं किंत्वद्वितीये ब्रह्मण्येव । अत एवोक्तं पूर्वश्लोकव्याख्याने—" त्वदीयतत्तदधिकरणमर्यादापर्यालोचनयैवाशेषोपनिषन्महातात्पर्यवेद्यं सच्चिदानन्दैकरसमद्वितीयं ब्रह्म सिद्धमिति । तेषां द्वैते परमतात्पर्यमुपेत्यैवमुक्तमिति विभावनीयम् ॥ ६२ ॥

२ वैरोचनीमिति—तथा हि छान्दोग्ये (छा० ८ । ८ । ४ । ५) " स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम । तेभ्यो हैतामुपनिषदं प्रोवाचाऽऽत्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोति इमं चामुं चेति " ॥ ४ ॥ " तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति संस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते " ॥ ५ ॥ " एवं श्रुतिप्रसिद्धासुरभावमाश्रिता वैरोचनाः । तथाऽपरेऽपि जीवानां विष्णोश्च सकलकर्मेन्द्रियज्ञानेन्द्रियदेहानभ्युपगच्छन्तस्तैरेव मुक्तौ भोगं च वदन्तोऽसुराश्चार्वाकाग्रेसरा इत्यसुरत्वेन रूपणं

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥ ६५ ॥
सोऽयं शिवपदमकरोन्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः श्रीकामाक्षीसमेतस्य ॥ ६६ ॥

इत्युपसंहारप्रकरणं समाप्तम् ॥

व्या०—जीवस्यैव करचरणादिसकलकर्मज्ञानेन्द्रियसहितदेहरूपत्वं तेनैव देहेन स्वप्ने मुक्तौ च व्यवहारानपि वदन्तो देहात्मवादिन इति साम्यादसुरशब्देनातिशयोक्त्या परे निर्दिष्टाः । मुख्याः—मुखे वदने भवाः सेनामुखवर्तिनश्च ॥ ६४ ॥

अथ स्वनाम ग्रन्थनाम च कीर्तयन् ग्रन्थसमाप्तिं दर्शयति—विद्वदिति । सोऽयमिति च ।

इति श्रीभरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्या-
जिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृति
र्मध्वतन्त्रमुखमर्दनं तद्व्याख्यानं मध्वमत-
विध्वंसनं च परिपूर्णतामगात् ॥

टि०— कृतम् । परेषां तथाऽभ्युपगमः " ब्राह्मेण जैमिनिरुपन्यासादिभ्यः " (ब्र० सू० ४।४।५) इत्यधिकरणभाष्यतत्त्वप्रकाशिकोदाहरणेन प्रदर्शित एव । परंतु ते स्वासुरभावमाच्छादयितुकामाः श्रुतिप्रामाण्यमभ्युपगच्छन्ति । तस्मात्प्रच्छन्नासुरभावत्वात्तेषां प्रच्छन्नचार्वाकत्वव्यवहारः । इदं च सौरपुराणोपन्यासेनोपक्रमप्रकरणे प्रपञ्चितमस्माभिः । दीक्षितवर्यैरपि " अतिशयोक्त्या परे निर्दिष्टाः " इत्यनेन स्पष्टीकृतमेवेति शिवम् ॥

श्रीमत्सह्याद्रिमध्ये विलसति विततो द्राविडैर्यः सुधीभिः
क्षीरारण्या(पालघाट्)ख्यदेशो गुणगणमहितो दर्शनात्पावनात्मा ।
तस्मिन्नारामसेतोरपि विदितयशोभिस्तुषाराद्रिमूलाद्
ग्रामो मात्तूर(मात्तूर)मिख्यः सकलनयविदामग्रणीभिश्चकास्ति ॥ १ ॥

टि०- अस्ति द्विजवरसुब्रह्मण्यार्याद्युदित इह लक्ष्म्याम् ।
मौद्गल्यान्वयजलधेरिन्दुर्नारायणाभिख्यः ॥ २ ॥

गोष्ठीपुरवरविहरद्धरिहरशास्त्र्यनुग्रहादेव ।
जैमिनिव्यासमुनीश्वरपाणिनितन्त्रेषु लब्धगतिरेषः ॥ ३ ॥

श्रीमत्कर्नाटभूपे यदुकुलतिलके कृष्णराजेन्द्रवर्ये
विश्वं स्वर्नायके द्रागिव विबुधगणैः शासति क्षात्रनीत्या ।
शाला गीर्वाणवाणीपठनसुखपदा तत्कृपापोषिता या
तस्यामद्वैततत्त्वप्रवचनधिषणः स्यात्तदास्थानविद्वान् ॥ ४ ॥

तेन निर्मितमिदं सुटिप्पणं दर्शिताध्वमनुसृत्य सर्वतः ।
सन्त एव विमृशन्तु संततं भूषणं हि मखिवर्यभूषणम् ॥ ५ ॥

अर्पितैषा कृतिर्भूषा दीक्षितेन्द्रपदद्वये ।
तत्कृपालेशकणतः संतुष्टचै रचिता सताम् ॥ ६ ॥

क्वाहं मन्दमतिः पूज्यो दीक्षितेन्द्रः क्व सर्ववित् ।
क्षम्यतां मम चापल्यं क्षमाशीला हि साधवः ॥ ७ ॥

इति श्रीसर्वतन्त्रस्वतन्त्रमहामहोपाध्यायाद्यनेकबिरुदविभूषितश्रीगोष्ठीपुराभिजनह-
रिहरशास्त्र्यनुग्रहलब्धाद्वैतविद्यावैशद्येन श्रीमन्महीशूरकृष्णराजेन्द्रास्थानमहा-
विदुषा तत्रत्यसंस्कृतमहापाठशालायामद्वैतप्रधानाध्यापकेन पालघाट्अ-
भिजनेन नारायणशास्त्रिणा विरचितं मखिवर्यभूषणं
नाम टिप्पणं समाप्तिमगात् ॥

सटिप्पनीकस्य सव्याख्यस्य भक्ष्यमाणप्रखमर्दनस्य

शुद्धाशुद्धपत्रम् ।

—:+×+:—

अशुद्धम् ।	शुद्धम् ।	पुटे ।	पङ्क्तौ ।
टिप्पणी	टिप्पनी	१	२
गम: " इति	गम " इति	४	५
भक्ष्यमाण	भक्षमाण	८	२४
पतिबलेन	पतिर्बलेन	९	३
ऊर्जपशू	ऊर्जं पशू	९	६
प्रेषितेन	प्रेरितेन	१०	२५
सार्वणि	सर्वाणि	११	२०
न्तन्मत	न्तैन्मत	१२	११
ईक्षते	ईक्षतेः	"	१७
करयो:	करणयो:	"	२५
नुभावा	नुभवा	"	२६
नित्यं स्फु	नित्यस्फु	१५	३
नैतदपेक्षि	नापेक्षि	१६	३
यानेकावान्त	यावान्त	१९	१७
पूर्वपक्षः । न	पूर्वपक्षः, प्रत्यग्ब्रह्मणो-रैक्यमिति विवरणमतेऽ-पि तथैव नाऽऽरम्भणी-यमिति पूर्वपक्षः । न	२०	७
र्विभूतं	विर्भूतं	२१	२८
ऽनारम्य इति	ऽनारम्भ्यमिति	२२	१३
गतार्थं मतः	गतार्थं	"	१४
वाच्या ब्रव्य	वाच्यस्यं ब्रव्य	२४	१८
विशेषेऽपि	विशेषोऽपि	२५	४
ऽप्ययम	ऽप्ययम	"	७
वृत्बेष्यते	वृत इष्यते	"	११

अशुद्धम् ।	शुद्धम् ।	पृष्ठे ।	पङ्क्तौ ।
ङ्गाच्चेति	ङ्गाच्च	२६	१०
रोद्धुं शक्नोति	रोद्धुं न शक्नोति	,,	२०
नन्दतद्ब्र	नन्दवद्ब्र	२७	१
बिम्बवैचि	बिम्बावैचि	,,	१२
नन्दस्यैव	नन्दस्येव	२७	२४
जनमिव	जलमिव	,,	२८
ज्ञानस्य	ज्ञातस्य	२८	४
विशेषता	विषयता	,,	४
तदा लोके	तदालोके	,,	२३
दर्शितन्याय–	दर्शितन्यायै–	,,	२७
वेदान्तानामिति	वेदान्तानामित्यादि	२९	१७
मेवोप	मेवौप	३०	२१
तादृशानेव	तादृशैरेव	,,	२२
शिष्टम् ।	शिष्टः ।	३१	२२
बह्वादान	बह्ववदान	३२	१४
पत्तेश्च	पत्तेः	३३	१६
विषय	विषम	३६	३
ब्रह्मनिषेध	ब्रह्मभेदनिषे	३७	१७
पादकः " ना	पादक " ना	,,	२७
षेधकः " ने	षेधक " ने	,,	२९
मान एव	मानस्यैव	३९	२५
शक्तिरङ्गी	शक्तेरङ्गी	,,	३०
धेयता "	धेयत "	४०	१७
इति । सत्यं,	इति सत्यं,	४३	१०
यत्वेनाप	यत्वेन प	५०	१०
एवमन्याऽपि	एवमन्योऽपि	५१	२३

अशुद्धम् ।	शुद्धम् ।	पृष्ठे ।	पङ्क्तौ ।
देशाद्यान्ये "	देशाद्यान्य "	५५	१५
प्राण्यप्रापक	प्राप्यप्रापक	५६	२१
उपजीव्यं	उपजीव्य	"	२५
ब्रह्मणैश्वर्य	ब्रह्मण ऐश्वर्यं	५७	९
सन्धास्या	सन्धानस्या	५९	१२
नाप्रयोजकत्वं	नत्वाप्रयोजकत्वं	"	२५
तद्भावे	तदभावं	६४	१७
स्तत्क	स्वत्क	७०	२७
मलापश्च	मलोपश्च	७१	२४
करूपरूप्य	करूप्य	७४	१७
संसिद्धबु	संसिद्धिबु	७६	१
एव	एकः	"	३
धीतत्व	धीनत्व	८४	२०
बन्धत्वा	बन्धनत्वा	८८	६
पूर्णत्वं स	पूर्णत्वं न स	९१	१२
पेक्षतया	पेक्षया	"	१५
स्योत्तमत्वस्य	स्योत्तमत्वाभावस्य	"	२४
मास्त्येव	नास्त्येव	९२	२
लेऽव्रत्व	लेङ्गत्व	९३	२८
त्याधिकं	त्यादिकं	९५	२८
शक्त्याऽपि	शक्त्या अपि	९६	७
बुद्धाश्रावक	बुद्धाश्शावक	९७	१०
श्रममूल	भ्रममूल	१०३	२७
नीयम् । ब्रह्म	नीयं ब्रह्म	१०४	१
नीति प्रायः	नीति । प्रायः	"	२
शिथिलैव	शिथिला एव	१०६	२०
मत्राधिकरणे	मत्रधिकरणे	११४	११
पतिरस्ती	पतिंश्रुतिरस्ती	११५	१९

अशुद्धम्।	शुद्धम्।	पृष्ठे।	पङ्क्तौ।
पाधनिरवस्य	पाधीनत्वस्य	११८	२४
दोषरहितत्वाच्च	दोषत्वाच्च	११९	२
निमित्तं	निमित्तत्वं	,,	२३
विशेष्यवद्विशेषण	विशेषणवद्विशेष्य	,,	२९
दिश्यतम्	दिश्यताम्	१२०	११
ष्टयनिरासः	ष्टयं च निरस्ये	१२५	२०
व्यध्वनं	व्यध्वगं	१२८	२
तथाऽपरे	तथा परे	,,	२९

८९ काव्यप्रकाशः—संकेताख्यटीकासमेतः ।	३	४
९० शाङ्खायनारण्यकम्—ऋग्वेदान्तर्गतमाश्वलायनीयम् ।	०	९
९१ गौतमप्रणीतन्यायसूत्राणि—भाष्यवृत्तिभ्यां समेतानि ।	४	८
९२ श्रीमद्भगवद्गीता—सटीकरामानुजभाष्ययुता ।	७	८
९३ दर्शपूर्णमासप्रकाशः—किंजवडेकरोपाह्ववामनशास्त्रिकृतः ।	६	१२
९४ संस्कारपद्धतिः—अभ्यंकरोपाह्वभास्करशास्त्रिविरचिता ।	२	८
९५ काश्यपशिल्पम्—महेश्वरसंप्रदिष्टम् ।	३	१
९६ करणकौस्तुभः—कृष्णदैवज्ञविरचितः ।	०	९
९७ मीमांसादर्शनम्—सतन्त्रवार्तिकशाबरभाष्योपेतं भागपञ्चकात्मकम्।	२१	९
९८ धर्मतत्त्वनिर्णयः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः ।	०	९
९९ भास्करीयबीजगणितम्—नवाङ्कुराटीकासहितम् ।	२	०
१०० प्रायश्चित्तेन्दुशेखरः—नागेशभट्टविरचितः। कुण्डार्कयुतः।	१	१०
१०१ शांकरपादभूषणम्—पर्वतेइत्युपाह्वरघुनाथशास्त्रिकृतम्	४	१३
श्रीमत्पद्मपुराणम्—महापुराणान्तर्गतं चतुर्भागात्मकम् ।	२०	०
सिद्धान्तदर्शनम्—महर्षिवेदव्यासप्रणीतं निरञ्जनभाष्ययुतम् ।	१	४
आधानपद्धतिः—किंजवडेकरोपाह्ववामनशास्त्रिभिः कृता ।	१	१४
पश्वालम्भमीमांसा—किंजवडेकरोपाह्ववामनशास्त्रिविरचिता ।	०	१०
शिवभारतम्—कवीन्द्रपरमानन्दविरचितम् ।	१	५

आनन्दाश्रममुद्रणालयमुद्रितग्रन्थावल्या अकारादिवर्णानुक्रमेण ग्रन्थाङ्केन मूल्याङ्केन च सहितं सूचीपत्रम् ।

ग्रन्थाङ्काः		मूल्यम् रू०	आ०
४१	अग्निपुराण १	५	४
८७	अग्निहोत्रचन्द्रिका	२	१४
८४	अद्वैतामोदः	२	०
५७	आचारभूषणम्	४	६
५८	आचारेन्दुः	४	०
	आधानपद्धतिः	१	१४
८१	आश्वलायनश्रौतसूत्रम्	४	११
६२	ईशकेनकठाद्युप०(रामा०)	२	८
७६	ईशकेनकठोपनिषदः	१	०
५	ईशावास्योपनिषत्	०	१४
२९	उपनिषदां समुच्चयः	६	१२
३२	ऐतरेयब्राह्मणम्	१०	१०
३८	ऐतरेयारण्यकम्	३	०
११	ऐतरेयोपनिषत्	१	४
९६	करणकौस्तुभः	०	९
७	काठकोपनिषत्	१	४
६६	काव्यप्रकाशः	६	४
८९	काव्यप्रकाशः	३	४
९५	काश्यपशिल्पम्	३	१
६	केनोपनिषत्	१	०
५२	गणेशगीता	२	०
१	गणेशाथर्वशीर्षम्	०	६
७३	गायत्रीपुरश्चरणपद्धतिः	१	८
६१	गौतमसूत्रम्	२	८
१४	छान्दोग्योपनिषत् (शां०)	५	०
६३	छान्दोग्योपनिषत्(रामा०)	३	१२
७९	छान्दोग्योप०(मिताक्षरा०)	२	०
२०	जीवन्मुक्तिविवेकः	३	१२
२४	जैमिनीयन्यायमालाविस्तरः	८	०
६९	ज्ञानार्णवतन्त्रम्	१	४
८५	ज्योतिर्निबन्धः	३	१५
३७	तैत्तिरीयब्राह्मणम्	१४	८
४२	तैत्तिरीयसंहिता	४८	१०
३६	तैत्तिरीयारण्यकम्	९	१
१२	तैत्तिरीयोपनिषत्	१	१२
१३	तैत्तिरीयोपनिषद्भाष्यवार्ति०	२	२
७८	त्रिस्थलीसेतुः	३	१२
९३	दर्शपूर्णमासप्रकाशः	६	१२
७४	द्राह्यायणगृह्यसूत्रवृत्तिः	१	०
३३	धन्वन्तरीयनिघण्टुरा०स०	६	४
९८	धर्मतत्त्वनिर्णयः	०	९
५६	नित्याषोडशिकार्णवः	३	४
८८	निरुक्तम्	१६	४
३०	नृसिंहपूर्वोत्तरतापनीयोप०	१	१२
९१	न्यायसूत्राणि	४	८
	पद्मपुराणम्	२०	०
	पश्वालम्भमीमांसा	०	१०
७२	परिभाषेन्दुशेखरः	२	६
४७	पातञ्जलयोगसूत्राणि	३	०
३	पुरुषसूक्तम्	०	८
५५	पुरुषार्थचिन्तामणिः	४	०
८	प्रश्नोपनिषत्	१	०

ग्रन्थाङ्काः		मूल्यम् रू०	आ०
१००	प्रायश्चित्तेन्दुशेखरः	१	१०
१५	बृहदारण्यकोपनिषत्	८	०
६४	,, (रामानुजटी०)	३	४
३१	,, (मिताक्षरा)	२	१२
१६	बृहदारण्यकोपनिषद्भा.	२२	८
७१	बृहद्योगतरङ्गिणी	१०	१२
६८	बृहद्ब्रह्मसंहिता	१	१२
२८	ब्रह्मपुराणम्	६	४
२१	ब्रह्मसूत्राणि (शां०)	१२	०
६७	,, ब्रह्मामृतवर्षिणी-दीपिकासमेतानि	४	८
८२	ब्रह्मसूत्रवृत्तिः	२	७
३४	भगवद्गीता (शां०)	२	०
३४	,, (सटीकशां०)	६	४
४४	,, (पैशाचभाष्य०)	१	८
४५	,, (मधुसूदनीश्रीधरीटी.	५	४
९२	,, (रामानुजीया)	७	८
९९	भास्करीयबीजगणि.सटी.	२	०
७५	भाष्यार्थरत्नमाला	४	४
५४	मत्स्यपुराणम्	६	०
१०	माण्डूक्योपनिषत्	२	५
९७	मीमांसादर्शनम्	२१	९
९	मुण्डकोपनिषत्	०	१०
६०	यतिधर्मसंग्रहः	१	१२
५०	यतीन्द्रमतदीपिका	१	४
४६	याज्ञवल्क्यस्मृतिः	१३	०
४	योगरत्नाकरः	५	०
१९	रसरत्नसमुच्चयः	३	१२

ग्रन्थाङ्काः		मूल्यम् रू०	आ०
२	रुद्राध्यायः	१	६
८०	वाक्यवृत्तिः	०	८
८९	वायुपुराणम्	४	१२
८६	विधानमाला	४	४
२७	वृन्दमाधवः	६	१२
७७	वेदान्तसूत्रमुक्तावलिः	२	६
४३	वैयाकरणसिद्धान्तकारिकाः	०	१२
२३	वैयासकन्यायमालाविस्तरः	१	१२
२२	शंकरदिग्विजयः	६	०
१०१	शांकरपादभूषणम्	४	१३
६५	शाङ्खायनब्राह्मणम्	१	४
९०	शाङ्खायनारण्यकम्	०	९
	शिवभारतम्	१	५
५९	श्राद्धमञ्जरी	२	०
१७	श्वेताश्वतरोपनिषत्	२	४
९४	संस्कारपद्धतिः	२	८
८३	संक्षेपशारीरकम्	९	१
३५	संगीतरत्नाकरः	१०	४
५३	सत्याषाढश्रौतसूत्रम्	२८	५
५१	सर्वदर्शनसंग्रहः	२	०
४०	संध्याभाष्यसमुच्चयः	२	०
३९	संस्काररत्नमाला	१२	८
	सिद्धान्तदर्शनम्	१	४
२५	सूतसंहिता	११	८
१८	सौरपुराणम्	३	०
४८	स्मृतीनां समुच्चयः	५	[illegible]
७०	स्मृत्यर्थसारः	१	१०
२६	हस्त्यायुर्वेदः	७	६